# Bhaktimanjari

# ભક્તિમઞ્જરી

## Document Information

Text title : Bhakti Manjari by Sri Rama Varma Kulasekhara Perumal, Maharaja of Trvancore

File name : bhaktimanjarI.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Swati Tirunal Sv￿titirun￿l, 1813-1846, published 1904

Proofread by : Proofread by PSA Easwaran (dashaka 1-2 initially proofread by DKM Kartha)

Latest update : December 28, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# ભક્તિમઞ્જરી

॥ શ્રીઃ ॥

શ્રીગણેશાય નમઃ ।

સ્વાતિ શ્રીરામવર્મવઞ્ચિમહારાજપ્રણીતા ભક્તિમઞ્જરી ।

## અથ પ્રથમશતકમ્ ।

આનન્દામૃતસારસન્તતિમયસ્વારાજ્યમૂર્ધાભિષિ-
ક્તાત્મન્નમ્બુજનાભ! તે૧ ચરણયોર્નત્વા મુહુઃ સાદરમ્ ।
એતાવત્ પુનરર્થયે કુરુ કૃપામાપત્સુ સમ્પત્સુ વા
ભૂયાત્ ત્વત્પદપદ્મયોરવિરતં ભક્તિર્મમાચઞ્ચલા ॥ ૧.૧॥

૧. ”તે” ઇતિ તવેત્યસ્યાર્થેઽવ્યયમ્ ।
યદિ તુ આત્મન્નિતિ પૃથક્ પદં કૃત્વા
તદર્થઃ પરમાત્મા વિશેષ્યત્વેનાશ્રીયતે,
તદા”નામન્ત્રિતે સમાનાધિકરણે સામાન્યવચનમ્” (૮-૧-૭૩)
ઇતિ વિશેષ્યવાચિપદસ્યામન્ત્રિતાવિદ્યમાનવદ્ભાવપ્રતિષેધાત્
ષષ્ઠ્યન્તયુષ્મચ્છબ્દસ્યૈવાયમાદેશઃ”તે” ઇતિ ।

૧યામાહુઃ શ્રુતિશેખરાધ્વપથિકાઃ ૨પારાશરાદ્યા દૃઢં
ત્વત્કારુણ્યરસાભિસિદ્ધ૩લતિકામવ્યાજમોદપ્રદાં
કિઞ્ચાશેષસમીહિતાર્થઘટનાનૈપુણ્યયુક્તાં નૃણામ્ ।
તસ્યૈ ન સ્પૃહયેત કો નુ ભુવને પાપાદૃતે શ્રીપતે !॥ ૧.૨॥

૧. યત્પદેન પૂર્વોક્તા ભક્તિઃ પરામૃશ્યતે ।
૨. પરાશરસ્યેમૌ પારાશરૌ વ્યાસશુકૌ તદાદ્યાઃ
૩. સિદ્ધલતિકા સિદ્ધૌષધિઃ ।

કિઞ્ચ ત્વં ચ કિરીટિને સ્વસુહૃદાં મુખ્યાય યુદ્ધાઙ્ગણે

બન્ધૂનાં નિધનોત્થપાતકભયોદ્વિગ્નાય તત્સારથિઃ ।
શ્રેયોમાર્ગશતેષુ શંસસિ હિ યદ્યામેવ મુખ્યાં દૃઢં
તત્ તામેવ મમ સ્થિરીકુરુ જવાદમ્ભોજનાભાધુના ॥ ૧.૩॥

જાત્યા યાસ્ત્વબલા હરે! પરમનાઘ્રાતાત્મવિદ્યારસાઃ
સ્વૈરિણ્યો રહિતાઃ સતામઘહતા સઙ્ગેન ચાનારતમ્ ।
ગોપ્યો ૧જારધિયાપ્યવાપ્ય નનુ યાં ભક્તિં પદામ્ભોરુહે
ભાવત્કે તુતુષુર્ભવેત્ કથમિયં નો તાપહન્ત્રી નૃણામ્ ॥ ૧.૪॥

૧. કામાદ્દ્વેષાદ્ભયાત્ સ્નેહાદ્યથા ભક્ત્યેશ્વરે મનઃ ।
આવેશ્ય તદઘં હિત્વા બહવસ્તદ્ગતિં ગતાઃ ॥

ગોપ્યઃ કામાદ્ભયાત્ કંસો દ્વેષાચ્ચૈદ્યાદયો નૃપાઃ ।
સમ્બન્ધાદ્વૃષ્ણયઃ સ્નેહાદ્યૂયં ભક્ત્યા વયં વિભોઃ ॥”
ઇતિ શ્રીભાગવતમ્ ।

આસ્તાં તાવદિદં સદા રિપુધિયાપિ ત્વાં સ્મરન્તઃ ખલા
ભૂપાશ્ચૈદ્યમુખાશ્ચરાચરજગજ્જાલૈકબન્ધું હરે ! ।
ત્વામાપુર્બત તાદૃશે ત્વયિ હરૌ લબ્ધા હિ ભક્તિઃ પરા
કં નાજ્ઞાનિનમપ્યવાપ્તકુશલં કુર્યાદ્વિભો ! માદૃશમ્ ॥ ૧.૫॥

લક્ષ્મીકાન્ત ! ૧ગુરુર્ગુરુર્ગુણનિધેર્યસ્યોદ્ધવસ્ય ધ્રુવં
ધર્મિષ્ઠાવલિહારમધ્યતરલો યો વા બુધૈઃ કીર્તિતઃ ।
સોઽપ્યેષ ત્વયિ વીક્ષ્ય ભક્તિમચલાં ગોપાઙ્ગનાનામગાદ્-
વિસ્મેરત્વમિમાં ત્વદીયચરણે ભક્તિં પરાં દેહિ મે ॥ ૧.૬॥

૧. બૃહસ્પતિઃ ।

લીલામાનુષવિગ્રહેણ ભવતા સમ્પ્રેષિતા દેવ ! યે
ગોપા હન્ત નિરાકૃતા દ્વિજવરૈરન્નાર્થિનો યષ્ટૃભિઃ ।
ભૂયસ્તદ્ગૃહિણીજનાર્પિતમદન્ ભક્તં ચ ભક્તિં વિલો-
૧ક્યાદા મુક્તિમહો તદીયદયિતવ્રાતોરુલજ્જાવહામ્ ॥ ૧.૭॥

૧. દત્તવાન્ તદ્ગૃહિણીજનાયેતિ શેષઃ ।

પ્રહ્લાદોઽસુરવંશજઃ શિશુરપિ ત્વત્પાદપઙ્કેરુહે
ભક્તિં પ્રાપ્ય જહૌ ૧ગુરૂક્તમશુભાયૈવેતિ જાનન્નસૌ ।
લેભે નૈવ રુજાં ચ તાતકલિતાં ત્વત્પ્રેમપાત્રેષુ ચા-

પ્યાસીદ્યત્ પ્રથમો મમાપિ દિશ તદ્ભક્તિં પરાં તાદૃશીમ્ ॥ ૧.૮॥

ગુરુણા અસુરાચાર્યેણ પિત્રા વા ઉક્તમુપદિષ્ટમ્ ।

બાલ્યે કામમરુન્તુદૈ૧ર્નિગદિતૈર્માતુઃ સપત્ન્યા ગૃહાદ્-
    યાતો હન્ત વનં સ નારદમુનેર્લબ્ધત્વદારાધનઃ ।
સર્વોત્કૃષ્ટમવાપ તદ્ધ્રુવપદં ૨ચૌત્તાનપાદિર્યયા
    સા ભક્તિસ્તવ પાદયોઃ કિમિવ ન શ્રેયઃ સમાપાદયેત્ ॥ ૧.૯॥

૧. વચનૈઃ । ૨. ધ્રુવઃ ।

ભાસ્વદ્વંશપયોધિપાર્વિકવિધૌ ૧નાભાગસૂનૌ કૃતઃ
    શાપોઽભૂન્નનુ મોઘ એવ મુનિના ક્રુદ્ધેન દુર્વાસસા ।
ભૂયસ્ત્વં શરણાર્થિનેઽપિ મુનયે ચક્રાયુધોપદ્રુતા-
    યારાદાશુ ૨શશંસિથાસ્ય નૃપતેરેવેહ સમ્પ્રીણનમ્ ॥ ૧.૧૦॥

૧. અમ્બરીષનામકે રાજ્ઞિ । ૨. શરણત્વેન કથિતવાન્ ।

એવં ત્વત્પદપદ્મયોરનુદિનં ન્યસ્તાત્મનામાત્મનો-
    ઽપ્યુત્કર્ષે નનુ વાઞ્છસિ ત્વમધિકં યત્ સિન્ધુકન્યાપતે ! ।
તત્ કારુણ્યસુધામ્બુધૌ ત્વયિ પરે સત્ત્વૈકસાન્દ્રે સ્થિરાં
    ભક્તિં ભક્તજનપ્રિયાદ્ય વિતર શ્રીપદ્મનાભ ! પ્રભો !॥ ૧.૧૧॥

સન્ત્યેવાત્ર બહૂનિ કૈટભરિપો! વર્ત્માન્યહો દેહિનાં
    સંસારાનલકીલતાપશમને દક્ષાણિ નિસ્સંશયમ્ ।
તાન્યેતાનિ ૧સમ્મીક્ષિતાન્યપિ ૨યથા ભક્તૌ તથા તેષુ ચેત્
    સૌકર્યં સહસા જગત્ત્રયપતે! તાન્યેવ ગૃહ્ણીમહે ॥ ૧.૧૨॥

૧. સમીક્ષિતાન્યપિ સમ્યગ્ગુરુલઘુભાવં પ્રતિ પર્યાલોચિતાનિ ચેત્યર્થઃ ।
૨. યથેત્યાદિવાક્યસ્ય કિન્ત્વિત્યાદિર્યોધ્યઃ સૌકર્યાભાવાત્
તાનિ ન ગૃહ્ણીમ ઇતિ તદ્વાક્યતાત્પર્યમ્ ।

યોગઃ કર્મ તપઃ સમાધિરનિશં ગઙ્ગાદિતીર્થાટનં
    દાનં વાત્ર હરે ! વ્રતાન્યપિ તથા ચાન્દ્રાયણાદીન્યહો ।
સર્વોત્કૃષ્ટતમાન્યપિ ત્વસુકરત્વં નામ વચ્મ્યાદરા-
    દેતેષ્વેકશ એકમેકમધુના યાવન્મતિ શ્રીપતે !॥ ૧.૧૩॥

લક્ષ્મીકાન્ત! મુમુક્ષવોઽથ કતિચિત્ ત્વષ્ટાઙ્ગયોગાધ્વના
    ત્વામેવાત્ર ભજન્તિ ૧તારમનુચિન્ત્યાન્તઃ પરં નિર્મલમ્ ।

પ્રાણાનપ્યભિયમ્ય હન્ત વિષયાદાહત્ય સર્વેન્દ્રિયા-
 ણ્યુત્ક્ષિપ્યાથ રસુષુમ્ણયા નનુ ૩ષડાધારૈસ્તથા મારુતમ્ ॥ ૧.૧૪॥

૧. સંસારતારકં પ્રણવરૂપં વા । ૨. નાડીવિશેષેણ ।
૩. નાભિઃ, હૃદયમ્, ઉરઃ, તાલુમૂલં, ભ્રૂમધ્યં, મૂર્ધા ઇત્યેતે ષડાધારાઃ ।

માર્ગોઽસૌ સુતરામનિન્દિતતરોઽપ્યાસ્થૈ તવાસ્મિન્ કલૌ
 નેતા તાદૃશવર્ત્મનિ પ્રથમતઃ પ્રાયો ગુરુર્દુર્લભઃ ।
૧લબ્ધેઽપ્યેવમનુષ્ઠિતૌ હિ કુશલા ન સ્યુર્નરા યત્તતઃ
 સર્વેષાં સુકરત્વમત્ર ભગવન્ ! પશ્યામિ નો વર્ત્મનિ ॥ ૧.૧૫॥

૧. અર્થાદ્ગુરાવિતિ વિશેષ્યસ્ય લાભઃ ।

કેચિત્ કર્મણિ નિષ્ઠિતાઃ શુભતમે વેદોદિતે સાધવઃ
 સ્વર્ગાસ્થૈ ક્રતુભિર્યજન્તિ વિવિધૈસ્ત્વામેવ યજ્ઞેશ્વરમ્ ।
સ્વાહાકારસમુજ્જ્વલૈશ્ચરુપુરોડાશાગ્રવિશ્રાણિત-
 પ્રાજ્યાજ્યાપ્તહવિસ્સુતૃપ્તવિકસત્સેન્દ્રામરાસ્યામ્બુજૈઃ ॥ ૧.૧૬॥

લોકોત્કૃષ્ટતમાન્યમૂન્યપિ વિભો! કર્માણ્યમીષાં પર-
 ન્ત્વાચાર્યઃ પુનરૃત્વિજોઽભિજનતા દ્રવ્યં ૧તથાપેક્ષિતમ્ ।
લુપ્તે કર્મણિ કિઞ્ચિદાશુ ભવિતા કર્તુશ્ચ દોષો મહાં-
 સ્તસ્માત્ સર્વજનીનતાં ન દધતે કર્માણ્યમૂનિ ધ્રુવમ્ ॥ ૧.૧૭॥

૧. ઇદમાચાર્યાદિષ્વન્વેતિ,
"નપુંસકમનપુંસકેનૈકવચ્ચાસ્યાન્યતરસ્યામ્" (૧-૨-૬૯)
ઇત્યેકશેષ એકવત્ત્વં ચ ।

એકે સદ્ગુરુભાષિતાઞ્જનલસદ્વિજ્ઞાનદૃષ્ટ્યા જગન્-
 મિથ્યારૂપમવેક્ષ્ય ચાત્ર સહસા સર્વાર્થસન્ત્યાગિનઃ ।
ધન્યાઃ પર્વતગહ્વરેષુ સતતં કાલં નયન્તો વિભું
 ત્વામેવેહ ભજન્તિ નિસ્પૃહધિયો વાય્વમ્બુપર્ણાશનાઃ ॥ ૧.૧૮॥

માયામોહિતચેતસામિહ કલૌ લક્ષ્મીપતે! પ્રાણિનાં
 નિત્યં વિત્તકળત્રપુત્રવિષયેષ્વત્યન્તસક્તાત્મનામ્ ।
આસ્થાસ્મિન્ પથિ ભો નિકામમયુતે સ્યાદ્વા ન વા કસ્યચિત્
 સર્વેષાં ન વિલોકયામિ હિ તતઃ સૌકર્યમન્ત્રાધ્વનિ ॥ ૧.૧૯॥

ધત્તે યત્સ્મૃતિરપ્યઘૌઘતિમિરે લીલાં પરાં ભાસ્વતો

યામદ્યાપિ બિભર્તિ સાદરમુમાનાથઃ સ્વયં મૌલિના ।
તસ્મિન્ જહ્નુસુતામ્ભસીહ સકૃદપ્યામજ્જતાં દેહિનાં
પુણ્યં વક્તુમહીશ્વરોઽપિ બિભૃયાત્ કિં દેવ! પર્યાપ્તતામ્ ॥ ૧.૨૦॥

ક્લાન્તિં નિસ્તુલિતાં શરીરમનસોર્દેશાટનપ્રાપિતાં
ક્ષુત્તટ્તાપમપારમન્નસલિલાદીનામભાવાત્ ક્વચિત્ ।
સોઢું શક્તિમતૈવ સાધ્યમમલં પુણ્યં તદેતત્તતઃ
સૌકર્યં સકલસ્ય નૈવ કલયે ૧કર્મણ્યમુષ્મિન્નપિ ॥ ૧.૨૧॥

૧. તીર્થયાત્રારૂપે ।

દારિદ્ર્યાતપજન્યતાપતતિહૃદ્વિત્તસ્વરૂપાતપ-
ત્રાભાવેન સુદુસ્સહેન નિતરાં વિપ્રાય સંસીદતે ।
તત્તાપોઘદપારતૃટ્પ્રશમનાસક્તા અનૂનાનિ યે
દાનાનિ પ્રતિપાદયન્તિ સજલં તે પુણ્યવન્તો ૧દૃઢમ્ ॥ ૧.૨૨॥

૧. અસંશયમ્ ।

ગોભૂવસ્ત્રહિરણ્યહસ્તિતુરગાદીનિ પ્રભો ! ભૂતલે
દાતુઃ પાતકખણ્ડનાનિ બહુશો દાનાનિ સન્તિ ધ્રુવમ્ ।
૧અપ્યેવં ધનશાલિનૈવ ભુવને સાધ્યાન્યથૈતાનિ યત્
સૌકર્યં સકલસ્ય નૈવ કલયામ્યત્રાપિ માર્ગે તતઃ ॥ ૧.૨૩॥

૧. એવમપિ ।

મુચ્યન્તે ખલુ રૌરવાદિનરકેભ્યો હિ ધ્રુવં પાપિનો-
૧અપ્યારાદારચરણેન ગર્હિતતમા યસ્યોચ્ચકૈરચ્યુત! ।
તસ્યાથો વ્રતસઞ્ચયસ્ય મહિમા ચાન્દ્રાયણાદ્યસ્ય વૈ
જાયેતામ્બુજવાસિનીધવ ! વિભો ! વાગ્ગોચરઃ કસ્ય વા ॥ ૧.૨૪॥

૧. દૂરાત્ ઇદં ચ મોચનક્રિયાયામન્વેતિ । ૨. ઇદં મોચનક્રિયાયાં કરણમ્ ।

એવં સત્યપિ માર્ગ એષ વિમલો મર્ત્યૈરિહાસ્માદૃશૈ-
ર્વાચૈવાલમુપાસિતું હિ સુલભો નો કર્મણા જાતુચિત્ ।
તસ્માન્નો કલયામિ વિશ્વજનતાસૌકર્યમત્રાપ્યહો
માર્ગે હન્ત મહીયસા હિ વપુષઃ ખેદેન લભ્યે પ્રભો !॥ ૧.૨૫॥

ત્વદ્ભક્તિસ્તુ તવાવતારચરિતાદ્યાકર્ણનેન સ્વયં
પ્રાપ્યા ખેદલવં વિનૈવ વિમલજ્ઞાનામૃતાપાદિની ।

સ્યાનન્દૂરપતે! જયત્યહહ યા સૈવાચિરાત્ ત્વત્પદ-
    દ્વન્દ્વામ્ભોરુહયોશ્ચકાસ્તુ હૃદયે પ્રેમાર્દ્રિતા મામકે ॥ ૧.૨૬॥

પૂર્વોક્તાન્યપિ ચ વ્રતાદિમમહાકર્માણ્યહો દેહિનાં
    પાપાન્યેવ લુનન્તિ નો ચિરતરાં શૌરે! દૃઢાં ૧વાસનામ્ ।
ત્વદ્ભક્તિઃ ખલુ ૨તદ્દ્વયીમપિ હરત્યાનન્દમૂર્ત્તે! યત-
    સ્તસ્માત્ સૈવ સદા સ્થિરા મમ ભવત્વિત્યર્થના મામિકા ॥ ૧.૨૭॥

૧. પાપવાસનામ્ । ૨. પાપં તત્પ્રયોજકવાસના ચેત્યેતદ્દ્વયમ્ ।

યસ્માન્માનસસારસાન્તરુદિતે ભક્તિપ્રકર્ષે નરઃ
    પુણ્યૈરચ્યુત! કોટિજન્મરચિતૈઃ કારુણ્યલબ્ધૈસ્તવ ।
આનન્દસ્ફુટહર્ષબાષ્પપુળકી સર્વાધિકો જૃમ્ભતે
    તસ્માદ્ભક્તિરસાત્ પરં સુમધુરં નો વસ્તુ જાનામ્યહમ્ ॥ ૧.૨૮॥

સદ્યઃ ક્ષાળિતપાપકર્દમકુલાસ્ત્વદ્ભક્તિરૂપામૃત-
    સ્રોતશ્શીતળધારયાનવરતં ત્વય્યેવ રક્તાશયાઃ ।
૧નિર્દ્વન્દ્વા વિષયેષુ નિસ્પૃહધિયો યે સાધવઃ સઞ્ચર-
    ન્ત્યેતાન્ ધન્યતમાનવાપ્તકુશલાન્ વિશ્વેશ! મન્યામહે ॥ ૧.૨૯॥

૧. દ્વન્દ્વં સુખદુઃખાદિરૂપં, તસ્માન્નિષ્ક્રાન્તાઃ

યેષામાનનનિસ્સૃતં ખલુ જગત્કર્ણામૃતં તાવકં
    નામાનન્તપુરેશ! સાન્દ્રસુખદં તાપત્રયોન્મૂલનમ્ ।
તૈઃ સાકં મમ સઙ્ગમોઽસ્ત્વવિરતં ભક્તોત્તમૈસ્તાવકૈ-
    રજ્ઞાનામિહ માદૃશામપિ નૃણાં સન્માર્ગસન્દર્શિભિઃ ॥ ૧.૩૦॥

ત્વય્યેવાર્પિતચેતસઃ ખલુ દૃઢં સર્વાત્મના યે જના-
    સ્ત્વદ્ગાથામૃતસિદ્ધભેષજવિધૂતાશેષપાપામયાઃ ।
જાત્યા વા નનુ કર્મણાથ ભુવને તે ગર્હિતા અપ્યહો
    નૂનં મે ગુરવસ્ત્વમી ઇતિ દૃઢા ભૂયાન્મદીયા મતિઃ ॥ ૧.૩૧॥

અમ્ભોદેષ્વિહ ચાતકાવલિરિવ પ્રોત્ફુલ્લપદ્માકરે
    હંસાનાં નિકરો યથા હિમકરે યદ્વચ્ચકોરવ્રજઃ ।
માકન્દેષુ મધૌ યથા પિકતતિઃ પુષ્પેષુ ભૃઙ્ગો યથા
    સ્વામિન્ ! મામકમાનસં વિહરતાં ત્વય્યેવ નિત્યં હરે !॥ ૧.૩૨॥

ભુઞ્જાનસ્ય સરોજનાભ! પિબતઃ સ્નાનૈષિણઃ ખાદતો

નિદ્રાલોરટતો વયસ્યનિકરૈઃ સમ્ભાષમાણસ્ય વા ।
અધ્યાસો હૃદિ મે સદા વિલસતુ ૧શ્રીપદ્મનાભાત્મકો
યો વા વાગ્વિષયેતરામિતસુખં સૂતે ક્ષણાત્ પ્રાણિનામ્ ॥ ૧.૩૩॥

૧. ભગવદભિન્નોઽહમિતિ જ્ઞાનમ્ ।

જાયન્તે નનુ જન્તવોઽત્ર બહવો બ્રહ્માણ્ડભાણ્ડોદરે
જીવન્ત્યપ્યુદરૈકપોષણરતાઃ સ્તોકાન્યહાનિ ધ્રુવમ્ ।
ક્ષીયન્તે સહસા પુનર્જનિમૃતિપ્રોત્તુઙ્ગભઙ્ગાકુલે
સંસારામ્બુનિધૌ પતન્તિ ચ ભવદ્ભક્તિપ્લવાભાવતઃ ॥ ૧.૩૪॥

કામક્રોધમુખૈસ્તિમિઙ્ગિલકુલૈર્ઘોરૈરલં દુસ્તર-
સ્ત્વદ્ભક્ત્યૈવ ભવામ્બુધિઃ સુગહનઃ સોઽયં તરીતું ક્ષમઃ ।
સા ભક્તિસ્તુ ગુરૂપદેશજનિતાજ્જન્યા વિવેકોદયાત્
૧સ સ્યાન્માનુષજન્મનીશ્વર ! યતઃ શ્લાઘ્યં રતદેવ ધ્રુવમ્ ॥ ૧.૩૫॥

૧. વિવેકોદયઃ । ૨. માનુપજન્મૈવ ।

આસાદ્યાપિ રમેશ ! દુર્લભતરં જન્મૈતદત્યુત્તમં
ત્વત્સેવામયભૂરિભાગ્યસુખદે લબ્ધ્વા ચ વંશે જનિમ્ ।
યો વા હન્ત યતેત નૈવ મનુજઃ કારુણ્યલાભાય તે
ધિગ્ધિગ્જન્મ ચ તસ્ય કૂપકુહરે મગ્નસ્ય યદ્વત્પશોઃ ॥ ૧.૩૬॥

લોકે વર્ષશતં નૃણાં પરિમિતં લક્ષ્મીપતે! જીવિતં
તસ્યાર્ધે ભગવન્ ! નિશાત્મકતયા યાત્યેવ નિસ્સંશયમ્ ।
શેષાર્ધે વિનિયુજ્યતે ધનસુતાગારાદિકે યેન વા
ત્વત્પાદસ્મરણં વિનૈવ ભુવને કોઽન્યોઽત્ર ગર્હ્યસ્તતઃ ॥ ૧.૩૭॥

સન્ત્યેકે ભુવનૈકનાથ ! વિષયાસક્તા મનુષ્યાધમા
યે સ્વપ્નેઽપિ ભવત્કથામૃતકણાસ્વાદં ન જાનન્ત્યહો ।
પ્રાપ્યાપિ સ્વયમશ્રમેણ ભગવન્ ! જન્માન્વવાયે વરે
નૂનં હ્યાત્મહનસ્ત્વમી મધુરિપો ! સદ્ભિર્વિનિન્દ્યા૧ યતઃ ॥ ૧.૩૮॥

૧. નિન્દાયા વધપર્યાયત્વાદાત્મઘાતિત્વમભક્તાનાં યુક્તમિતિ ભાવઃ ।

આયુર્નીરરુહચ્છદોપરિલસત્પાનીયલોલં તદ-
પ્યાધિવ્યાધિકુલૈઃ સુદુસ્સહતરૈઃ પ્રાયેણ દુઃખપ્રદમ્ ।
લબ્ધ્વા ત્વાં ન ભજેત યો ગતિરહો કા સ્યાદિહાસ્યામ્બુધૌ

વાતોદ્ધૂતવિકર્ણધારતરણેર્લીલામલં બિભ્રતઃ ॥ ૧.૩૯॥

મન્યન્તે સુદૃઢં સ્વધર્મ ઇતિ યે હા હન્ત વિત્તાર્જનં
યોષિત્સઙ્ગિજનૈશ્ચ સઙ્ગતિરહો સર્વાર્થદાત્રીતિ ચ ।
પૈશુન્યં પરપીડનં નનુ પરા વિદ્યેતિ મર્ત્યાધમા-
સ્તેષાં કા ગતિરન્તતોઽથ કુધિયાં નૈવાવગચ્છામ્યહમ્ ॥ ૧.૪૦॥

વર્તન્તે ભુવિ ૧નિષ્ક્રયાઃ સુબહુશો વેદોદિતાઃ પાપ્મનાં
ઘોરાણામપિ ભક્તવત્સલ ! હરે ! ગઙ્ગાવગાહાદિકાઃ ।
લબ્ધ્વા માનુષજન્મ સર્વસુખદં યો વા ન સંસેવતે
પાદામ્ભોજયુગં ત્વદીયમમલં ૨કા વાસ્ય વૈ નિષ્કૃતિઃ ॥ ૧.૪૧॥

૧. પ્રાયશ્ચિત્તાનિ । ૨. ત્વદસેવાપાતકસ્ય પ્રાયશ્ચિત્તં નાસ્તીતિ ભાવઃ ।

દૈત્યારે! ભવદીયમન્દિરવરોપાન્તે વસન્તોઽપ્યહો
કેચિજ્જાતુચિદાલયે તવ પદન્યાસં ચ૧ નો કુર્વતે ।
અન્તઃ શ્રીહરિપાદપદ્મયુગલં નો ધ્યાયતાં જ્ઞાનિનાં
કિં દેવાલયયાત્રયેતિ વચસા સમ્મોહયન્તો જડાન્ ॥ ૧.૪૨॥

૧. અયમવધારણે ।

ગાથાયાઃ શ્રવણે તવેહ કુહચિદ્ધન્યૈઃ પ્રસક્તે જનૈ-
સ્ત્વલ્લીલામકરન્દપાનવિષયે મત્તદ્વિરેફાયિતૈઃ ।
સદ્યઃ કેચન લૌકિકોક્તિકથનાન્યેવારભન્તે જના
મૂઢા હન્ત કુતૂહલેન મહતા સાર્ધં સ્વતુલ્યૈઃ ખલૈઃ ॥ ૧.૪૩॥

ગાયન્તં ભવદીયદિવ્યચરિતાન્યુચ્ચૈર્વિલજ્જં તથા
નૃત્યન્તં ગલિતાશ્રુગદ્ગદગિરં ભક્તોત્તમં તાવકમ્ ।
લોકે હન્ત હસન્તિ કેચન ખલાઃ સદ્યો બ્રુવન્તો મિથઃ
પ્રોન્મત્તં ત્વવલોકયૈનમવશં નિર્લજ્જમિત્યઞ્જસા ॥ ૧.૪૪॥

યો નામાનિ જપત્યનન્ત ! ભવતોઽસૌ જલ્પકો ગણ્યતે
યો મૌની તવ પાદચિન્તનરતઃ સોઽયં જડાત્મેતિ ચ ।
મૂર્ખૈર્યન્ન તદીશ! ચિત્રમવનૌ ઘોરામયૈઃ પીડિતા
અધ્યસ્યન્તિ હિ તિક્તતાં સુમધુરેષ્વપ્યુચ્ચકૈર્વસ્તુષુ ॥ ૧.૪૫॥

દૃષ્ટે તાવકપાદપદ્મયુગલાસક્તે વિરક્તે જને
સર્વૈઃ પૂજ્યતમે જના હિ કતિચિ૧ત્તદ્ધેલનં કુર્વતે ।

દૌષ્ટ્યોપાર્જિતવિત્તસમ્ભવમદસ્તબ્ધાશયાનાં પુરઃ
    કુર્વન્ત્યઞ્જલિમાદરેણ ચ પુનર્હા હન્ત મોહાન્ધતા ॥ ૧.૪૬॥

૧. તસ્ય હેલનમનાદરમ્ ।

લોકે કર્મસુ નિર્મલેષ્વલમનુષ્ઠેયં હિ મૌનવ્રતં
    ત્વન્નામાક્ષરકીર્તનૈકવિષયે કુર્વન્તિ ૧નામ ધ્રુવમ્ ।
ચિત્તે રચોપરતિં સમસ્તવિષયાત્ પ્રાપ્યાં વિહાયાશ્રિમાં
    ત્વત્પાદસ્મરણાદ્રમાવર! વહન્ત્યેકે મનુષ્યાધમાઃ ॥ ૧.૪૭॥

૧. નામેતિ પ્રાકાશ્યે ।    ૨. નિવૃત્તિમ્ ।

સર્વજ્ઞોઽસ્મિ મહત્તમે નનુ કુલે જાતોઽસ્મિ તુલ્યો મયા
    કો વાસ્મિન્ ૧જગતીતિ દેવ! કુધિયઃ કેચિન્મદાન્ધાશયાઃ ।
વિત્તસ્યૈવ હિ લિપ્સયા બહુવિધૈર્યજ્ઞૈર્યજન્તો મુધા
    ત્વાં વિસ્મૃત્ય પતન્તિ હન્ત વિવશા અન્ધે તમસ્યાવિલે ॥ ૧.૪૮॥

૧. મન્યમાના ઇતિ શેષઃ ।

અત્યુત્કૃષ્ટકુલોદ્ભવોઽસ્તુ નિતરાં ૧વિજ્ઞાતષડ્દર્શનો
    વિશ્વૈર્માન્યતમે સ્થિતોઽસ્તુ મહતિ સ્થાને ચ કિં તાવતા ।
યસ્યાન્તઃ સમુદેતિ નૈવ ભગવન્! ભક્તિસ્ત્વયિ શ્રીપતે!
    પૂર્વોક્તોઽસ્ય ગુણવ્રજઃ ખલુ વૃથા યદ્વદ્ધુતં ભસ્મનિ ॥ ૧.૪૯॥

૧. વિજ્ઞાતાનિ ષડ્દર્શનાનિ

ન્યાયવૈશેષિકસાઙ્ખ્યયોગમીમાંસાવેદાન્તાત્મકાનિ યેન સઃ ।

શાસ્ત્રાભ્યાસસમાર્જિતઃ સુવિમલો બોધોદયો દેહિભિઃ
    કર્માણ્યાચરિતાન્યપીહ ભુવને ૧યત્સાધનાન્યેવ હિ ।
તામપ્રાપ્ય રમેશ ! ભક્તિમમલાં તેષ્વેવ રજ્યન્તિ યે
    નૂનં યાન્તિ સદૃક્ષતામહહ તે વ્યર્થે તુષાઘાતિભિઃ ॥ ૧.૫૦॥

૧. બોધોદયઃ કર્માણિ ચ યસ્યા ભક્તેઃ સાધનાન્યેવ ભવન્તિ,

ન તુ સ્વાતન્ત્ર્યેણ પુરુષાર્થં સાધયિતું ક્ષમાણિ ભવન્તીતિ તાત્પર્યમ્ ।

અમ્ભોજાક્ષ ! નરસ્ય યસ્ય પિબતઃ કર્ણૌ જગન્મઙ્ગલં
    ત્વદ્ગાથામૃતમત્ર નૈવ ભુવને તૌ ગર્તતુલ્યૌ ધ્રુવમ્ ।
જિહ્વા યસ્ય ચ નો જપત્યવિરતં રમ્યાણિ નામાનિ તે

મણ્ડૂક્યેવ હિ સા વૃથા પ્રલપતિ પ્રાપ્તૌ પરં પ્રાવૃષઃ ॥ ૧.૫૧॥

મૌલિર્યસ્ય ચ પાદપદ્મયુગલે કુર્યાત્ પ્રણામં ન તે
લક્ષ્મીકોમલપાણિયુગ્મમૃદિતે નિર્વ્યાજહર્ષાકુલમ્ ।
ઉન્નમ્રદ્યુતિરત્નદીપ્રમકુટેનાપ્યઞ્ચિતં તં વૃથા
ભારં તાવદવૈમિ નૂનમવનેઃ શ્રીપદ્મનાભ ! પ્રભો !॥ ૧.૫૨॥

સન્તપ્તોત્તમહેમકઙ્કણવરેણાલઙ્કૃતાવપ્યહો
યૌ બાહૂ જલજાક્ષ ! નૈવ કુરુતઃ પ્રેમ્ણા સપર્યાં તવ ।
તૌ મન્યે વિપિને ભયાનકતમૈઃ શાર્દૂલમુખ્યૈર્મૃગૈ-
ર્જુષ્ટે રિક્તજને સમુચ્છ્રિતતરોઃ શાખોપમાવિત્યહમ્ ॥ ૧.૫૩॥

નેત્રે યસ્ય ન પશ્યતઃ સકુતુકં દિવ્યાનિ રૂપાણિ તે
વિશ્વાનન્દકરાણિ દાનવરિપો ! ૧પિઞ્છાયિતે તે ધ્રુવમ્ ।
પાદૌ યસ્ય ચ મન્દિરં ન ભજતઃ શૌરે ! મુહુસ્તાવકં
નૂનં હન્ત મહીરુહાં વનભુવાં તૌ જન્મભાજૌ હરે !॥ ૧.૫૪॥

૧. વર્હસ્થિતનેત્રકવન્નિષ્ફલે ઇત્યર્થઃ

યત્સઙ્ગાત્ સમવાપ જહ્નુતનયા સર્વાઘવિધ્વંસને
વૈદગ્ધ્યં મુનિમાનસાબ્જનિલયે યે રાજહંસાયિતે ।
સમ્પર્કાન્નુ૧ તયોસ્ત્વદીયપદયોઃ સ્ફીતં તુલસ્યાઃ પરં
સૌરભ્યં ન હિ વેદ યોઽત્ર મનુજો ૨જીવન્મૃતોઽસૌ દૃઢમ્ ॥ ૧.૫૫॥

૧. નુશબ્દ ઉત્પ્રેક્ષાયાં અબ્જાધિવાસિતપદસમ્પર્કો હિ તુલસ્યાઃ
સૌરભસમૃદ્ધૌ હેતુઃ સમ્ભાવ્યતે ।
૨. અનેન વ્યર્થઘ્રાણેન્દ્રિયત્વં પ્રતિપાદ્યતે ।

સ્યાનન્દૂરપુરેશ ! સાધુ કલિતૈસ્ત્વન્નામધેયાક્ષરૈ-
ર્વિશ્વેષાં શ્રવણદ્વયીપુટસુધાધારાભિષેકપ્રદૈઃ ।
નો વા વિક્રિયતે મુખં ન કુતુકં નાનન્દબાષ્પો દૃશોઃ
સર્વાઙ્ગે પુલકં ચ યસ્ય ન મનસ્તસ્યાશ્મતુલ્યં ધ્રુવમ્ ॥ ૧.૫૬॥

રમ્યાપિ ધ્વનિમણ્ડિતાપિ યમકપ્રાસોજ્જ્વલાપિ પ્રભો !
પ્રૌઢાર્થાપ્યનવદ્યગદ્યગણયુક્પયાન્વિતાપિ ધ્રુવમ્ ।
શ્રીજાને ! યદિ સાહિતી તવ ગુણાલાપૈરલં વર્જિતા
ધિક્ તાં મોઘતમાં વૃથાપ્રલપિતપ્રાયામિહાધોક્ષજ !॥ ૧.૫૭॥

નિર્દોષેણ સતાં મતેન વિધિના સમ્યક્ત્તયાનુષ્ઠિતં
વૈકલ્યં ચ વિના વિરોધફલદં મન્ત્રસ્ય તન્ત્રસ્ય વા ।
અન્યૂનોત્તમદક્ષિણં ચ સુમહત્ કર્માપિ નો ચેદહો
લક્ષ્મીનાથ! ભવત્પરં વિફલતામેવાપ્નુયાત્તદ્ધ્રુવમ્ ॥ ૧.૫૮॥

દેશે યત્ર વસન્તિ નૈવ ભગવંસ્ત્વત્પાદભક્તા જના
યત્રાહો ન ગૃહે ગૃહે સકુતુકં પ્રસ્તૂયતે તે કથા ।
કલ્પ્યન્તે ન ચ યત્ર તાવકમુદે સર્વોત્તમાશ્ચોત્સવા
દેશોઽયં ત્રિદિવોપમોઽપિ સહસા ત્યાજ્યો નરૈઃ સાધુભિઃ ॥ ૧.૫૯॥

યસ્મિન્નીશ ! દિને ક્ષણાર્ધમપિ વા નાસ્વાદ્યતે સાદરં
ત્વદ્ગાથામયનિર્ભરામૃતઝરી સંસારતાપાપહા ।
તન્મન્યે બત દુર્દિનં ભુવિ નૃણાં ભોગીન્દ્રશાયિન્ ! મુધા
મેઘચ્છન્નદિનસ્ય દુર્દિનમિતિ ખ્યાતિર્બુધૈઃ કલ્પિતા ॥ ૧.૬૦॥

અન્નં સ્વાદ્વપિ ષડ્રસોજ્જ્વલતરૈઃ પીયૂષસંસ્પર્ધિભિ-
ર્યુક્તં વાપ્યુપદંશકૈશ્ચ વિવિધૈઃ શ્રદ્ધાવિતીર્ણં ચ વા ।
ભક્ત્યા ચેત્ તદનર્પિતં હિ ભવતે નિશ્શેષવિશ્વાત્મને
ચણ્ડાલાલયકૂપતોયવદપિ૧ ત્યાજ્યં બુભુક્ષાન્વિતૈઃ ॥ ૧.૬૧॥

૧. અપિર્ભિન્નક્રમઃ બુભુક્ષાન્વિતૈરપીતિ યોજ્યમ્ ।

લોકાન્ ૧વાનુપપીડ્ય હન્ત વિવશાન્ ન્યાયેન ચૈવાર્જિતં
પાત્રાપાત્રવિવેકસંયુતતયા ૨દેદીયમાનં ચ વા ।
દ્રવ્યં સ્યાદ્યદિ નાર્પિતં નનુ યથાશક્તીહ તુભ્યં મુદા
નૂનં તત્તુ કપાલસંસ્થજલવત્ ત્યાજ્યં પરં સાધુભિઃ ॥ ૧.૬૨॥

૧. અપીડયિત્વા ।
૨. અતિશયેન દીયમાનમ્ ।

સમ્ફુલ્લોત્પલપદ્મગર્ભવિલસત્કિઞ્જલ્કસંવાસિતં
સંયુક્તં ૧ત્રિગુણાત્મકેન સલિલેનાધ્વન્યખેદાવહમ્ ।
રમ્યં ચાપિ સરઃ સ્વપાદરજસા વિશ્વં પુનાનૈર્ન ચે-
જ્જુષ્ટં ભાગવતૈસ્તુ ૨વાયસસરઃપ્રાયં વિદુસ્તદ્બુધાઃ ॥ ૧.૬૩॥

૧. શૈત્યલઘુત્વમાધુર્યરૂપગુણત્રયવતેત્યર્થઃ ।
૨. ક્ષુદ્રસારતુલ્યમિત્યર્થઃ ।

તન્ત્રી નાદવિમિશ્રિતં લયયુતં તારસ્વનાત્યુજ્જ્વલં
શ્રોત્રાનન્દકરં ચરિષ્ણુભિરલં ૧ગ્રામત્રયેઽપિ સ્વરૈઃ ।
ગીતં તાવકનામનિર્ભરસુધાજુષ્ટં ન ચેત્તત્પુન-
ર્વ્યર્થં વ્યર્થમરણ્યરોદનમિવ પ્રાયો રમાવલ્લભ !॥ ૧.૬૪॥

૧. ગ્રામાણાં સ્વરસન્દોહાનાં ત્રયે “ષડ્જગ્રામો ભવેદાદૌ મધ્યમગ્રામ
એવ ચ । ગાન્ધારગ્રામ ઇત્યેતદ્ગ્રામત્રયમુદાહૃતમ્ ॥”
ઇત્યુક્તરૂપે । ૨. ઉદ્વેગાદ્વિરુક્તિઃ ।

દાતા ચાશ્રિતવત્સલશ્ચ સદયઃ સત્યક્ષમામણ્ડિતો
જ્ઞાતા ધીરગુણો જિતેન્દ્રિયગણો ગમ્ભીરચેતાસ્તથા ।
ત્રાતા ચાપ્યનુજીવિનોઽથ નિખિલાદાપત્સમૂહાત્ પ્રભુઃ
પાતા ત્વચ્ચરિતામૃતસ્ય ન યદિ ત્યાજ્યો દૃઢં સજ્જનૈઃ ॥ ૧.૬૫॥

દાનામ્ભસ્સ્રવસિક્તગણ્ડવિલસન્માતઙ્ગષણ્ડં પુન-
ર્વાવલ્ગત્પવમાનવેગતુરગાન્ સૌધાંસ્તથાભ્રઙ્કુષાન્ ।
બિભ્રાણોઽપ્યથ સમ્પદં ચ ભુવને સઙ્ખ્યાતિગાં માનવ-
સ્ત્વદ્ભક્ત્યા રહિતો યદીહ સ દૃઢં ગર્હ્યોઽતિનિઃસ્વાદપિ ॥ ૧.૬૬॥

સ્યાનન્દૂરપતે! ૧વ્યયેન મહતા તન્તન્યમાના ભૃશં
વાદિત્રારવગીતનર્તનમુખૈરાનન્દસન્દાયિનઃ
વિશ્વોત્કૃષ્ટમહોત્સવા અપિ કૃતાસ્ત્વત્પ્રીતયે નો યદિ
ભ્રાજન્તે ન હિ ચન્દ્રિકેવ વિતતા શૂન્યે મહાકાનને ॥ ૧.૬૭॥

૧. ધનત્યાગેન ।

સર્વજ્ઞસ્ય ગુરોરપીહ વચનં ત્વદ્ભક્તિલાભાય નો
હેતુઃ સ્યાદ્યદિ હેયમેવ તૃણવત્તત્સારમપ્યઞ્જસા ।
બાલેનાપિ યદુક્તમેતદિહ ચેત્ત્વદ્ભક્તતાસાધકં
તદ્વેદોદિતવદ્રમેશ ! સમુપાદેયં મુહુઃ શ્રદ્ધયા ॥ ૧.૬૮॥

નૈવેયં જનની ન ચૈષ જનકો ન સ્યાદયં સદ્ગુરુ-
ર્નૈતન્મિત્રમિદં ન શાસ્ત્રમમલં ન સ્યાદયં ચ પ્રભુઃ ।
૧યા સંસારમહામ્બુરાશિતરણસ્યોપાયભૂતાં હરે !
ભક્તિં પ્રાપયિતું ત્વયીહ બિભૃયાન્નૈવેશ ! ૨નિષ્ણાતતામ્ ॥ ૧.૬૯॥

૧. યત્પદસ્ય યથાયોગં લિઙ્ગવિપરિણામો બોધ્યા । ૨. કુશલતામ્ ।

૧ઉત્પત્તિપ્રમુખા મુકુન્દ ! ૨સદૃશાઃ ષડ્ભાવભેદા નૃણાં
    સ્થાસ્નૂનામિહ ભૂરુહાં ખગમૃગાદીનામપિ પ્રાણિનામ્ ।
ભક્ત્યૈવ ધ્રુવમેકયાત્ર પુરુષસ્તેભ્યો ૩વરીયાન્ સ્મૃત-
    સ્તસ્યાઃ પ્રાપ્તિમૃતે સ્થિતસ્ય પુરુષસ્યૈષાં ચ ભેદો હિ કઃ ॥ ૧.૭૦ ॥

૧. ઉત્પત્તિસત્તાવૃદ્ધિપરિણામાપક્ષયનાશાઃ । ૨. સાધારણાઃ ।
૩. અતિશયેન ઉરુર્મહાન્ ।

વાચા કિં બહુનાત્ર યદ્યદવનૌ દત્તં તથેષ્ટં હુતં
    કર્માનુષ્ઠિતમુત્તમં સુમહતા ક્લેશેન તપ્તં તપઃ ।
તત્તત્ ત્વન્નિરતેન હન્ત મનસા નો ચેદિહાનુષ્ઠિતં
    શ્રીજાને ! સમવાપ્નુયાદ્ધિફલતામેવેતિ નિસ્સંશયમ્ ॥ ૧.૭૧ ॥

તસ્માન્નૂનમનન્તપુણ્યનિવહૈર્જન્મોત્તમં માનવં
    પ્રાપ્તેનેહ શરીરિણા૧ન્યવિષયાનાસક્તચિત્તં ભૃશમ્ ।
સાધ્યા યત્ત્વયિ ભક્તિરેવ સતતં સર્વાત્મના સર્વથા
    તત્તામેવ દિશ ત્વદેકશરણસ્યામ્ભોજનાભાદ્ય મે ॥ ૧.૭૨ ॥

૧. ઇદં સાધનક્રિયાવિશેષણમ્ ।

સા ભક્તિર્યદિ પદ્મનાભ ! પદયોઃ શૌરે ! તવાસાદિતા
    સદ્યસ્તદ્વશગો ભવાન્ સ્વવશગબ્રહ્માણ્ડભાણ્ડોઽપ્યહો ।
અન્તઃપ્રોદ્યદપારદિવ્યકરુણાપૂરો હિ તેષાં નૃણાં
    કિં કિં વાઞ્છિતમાશુ ન પ્રદિશતિ સ્વીયાઙ્ઘ્રિસંસેવિનામ્ ॥ ૧.૭૩ ॥

લોકે દુસ્સહશીતવાતતપનક્લેશાંસ્તૃણીકૃત્ય તે
    કારુણ્યામૃતલિપ્સયૈવ ચરતોઃ પૂર્વં કિલોગ્રં તપઃ ।
ભક્તિં વીક્ષ્ય હરે! પ્રસન્નહૃદયો ૧યદ્દેવકીરશૂરયોઃ
    પુત્રત્વં ગતવાન્ સ્વયં ત્રિજગતાં કર્તુશ્ચ કર્તા ભવાન્ ॥ ૧.૭૪ ॥

૧. યસ્માદિત્યર્થઃ તસ્માદિતિ ચ પૂર્વપદ્યે ગમ્યમ્ । ૨. શૂરેતિ વસુદેવપરમ્ ।

અઙ્કે ત્વામધિરોપ્ય મૂર્ધ્નિ ચ સમાઘ્રાયાચ્યુતાનુક્ષણં
    સ્વાઙ્ગુલ્યગ્રતલેન હન્ત ચિબુકે ૧તૌ સ્પૃષ્ટવન્તૌ યદા ।
તાવત્કોમળસૃક્કયુગ્મવિગલદ્દોક્ષીરબિન્દ્વન્વિતં
    દૃષ્ટ્વા તે હસિતં ભૃશં જહૃષતુઃ કોઽન્યો હિ ધન્યસ્તતઃ૨ ॥ ૭૫ ॥

૧. દેવકીવસુદેવૌ । ૨. દેવકીવસુદેવાભ્યામ્ ।

મય્યેવાર્પિતદૃષ્ટિરેષ પૃથુકો મન્દં હસત્યાદરા-
 દિત્યેવં સવિવાદયોઃ કિલ મિથઃ પિત્રોસ્તવાનુક્ષણમ્ ।
ભાગ્યં વર્ણયિતું બતોદ્યમકૃતાં લોકે કવીનામતિ-
 પ્રૌઢાનામપિ પદ્મનાભ ! શિથિલાયન્તે ન કેષાં ગિરઃ ॥ ૧.૭૬॥

લાલાસ્યન્દિમુખારવિન્દવિગલદ્વ્યક્તેતરં ભાષિતં
 પાયમ્પાયમતીવ કર્ણયુગલેનામ્બેતિ તાતેતિ તે ।
રોમાઞ્ચોદયહર્ષબાષ્પસહિત૧સ્તાભ્યામવાપ્તો હિ યઃ
 ૨સ્વાનન્દસ્તમિહાપ્નુયાત્ કિમુ નરો લોકાધિપત્યેઽપિ વા ॥ ૧.૭૭॥

૧. પિતૃભ્યામ્ । ૨. આત્માનન્દઃ ।

શૌરે ! પ્રાક્તન એવ જન્મનિ દૃઢં ત્વત્પાદસંસેવયા
 સમ્પ્રાપ્તત્વદુપાન્તસેવનમહાભાગ્યોદયાનાં હરે ! ।
ગોપીનાં ચ ૧તથા નિકામમકરોઃ કં કં પ્રસાદં ન વા
 લોકે યત્સુમહીયસાપિ તપસા હન્તાનવાપ્યં જનૈઃ ॥ ૧.૭૮॥

૧. યથા પિત્રોસ્તથા ।

નૃત્યન્ પલ્લવકોમલેન ચરણેનાસાં પુરો મઞ્જુલં
 ગાયન્ વેણુરવેણ કિઞ્ચ નવનીતાપ્ત્યૈ તદઙ્કે લગન્ ।
તદ્ગેહસ્થિતશિક્યસંસ્થિતપયશ્ચૌર્યેષુ તાસાં પુનઃ
 શ્રુત્વા કોપવચાંસિ મોદમગમઃ સ્તોત્રે યથા ૧સાત્વતામ્ ॥ ૧.૭૯॥

૧. ભાગવતાનામ્ ।

કાલિન્દીપુલિને રમેશ! દિવસમ્મન્યાસ્વહો યામિની-
 ષ્વેકૈકત્ર તુષારદીધિતિરુચા તાભિઃ પ્રવૃત્તો મુદા ।
કર્તું રાસરતોત્સવં પરમદાઃ કં કં પ્રમોદં ન વા
 ૧તાસાં યસ્તુ બભૂવ કેશવ! સુરર્ષીણામપીર્ષ્યાસ્પદમ્ ॥ ૧.૮૦॥

૧. સમ્બન્ધસામાન્યે પષ્ઠી । તાભ્ય ઇત્યર્થઃ ।

૧તૈસ્માદેવ મુહુર્મુહુઃ સવિનયં કારુણ્યવારાન્નિધિં
 ત્વાં સર્વજ્ઞમપીહ મન્દધિષણઃ સોઽહં ત્વદેકાશ્રયઃ ।
યાચે ત્વત્પદભક્તિમેવ સતતં સર્વાર્થદાં સસ્પૃહં
 તત્પ્રાપ્તૌ ન વિલમ્બલેશમપિ હા સોઢું સમર્થોઽસ્મ્યહમ્ ॥ ૧.૮૧॥

૧. ભક્તેર્મહાફલત્વાદેવ ।

સા ભક્તિશ્ચ મતા દ્વિધા બુધજનૈસ્ત્વત્તત્ત્વસન્દર્શિભિ-
સ્તત્રૈકા તુ સકામભક્તિરપરા નિષ્કામભક્તિઃ સ્મૃતા ।
ત્રૈલોક્યેશ! તયોર્વૃણે પરમહં નિષ્કામભક્તિં દૃઢં
તચ્છ્રૈષ્ઠ્યાવગમેન હેતુભિરિતઃ સંવક્ષ્યમાણૈઃ પરમ્ ॥ ૧.૮૨॥

સેવાં પ્રાપ્ય તવાઙ્ઘ્રિપઙ્કજયુગસ્યૈકે જનાઃ સસ્પૃહં
યાચન્તે ભુવિ ૧કામિતં ૨હલહલ ક્ષુદ્રં સુખાભાસદમ્ ।
લબ્ધ્વા કલ્પતરું સમસ્તફલદં મર્ત્યો યથા યાચતે
સ્તોકં વસ્તુ દરિદ્રભોગ્યમવમં ભાગ્યેન હીનો ભૃશમ્ ॥ ૧.૮૩॥

૧. અભીષ્ટવસ્તુ । ૨. હલહલેતિ રલયોરભેદાત્ કષ્ટે દ્વિરુક્તિર્હરશબ્દસ્ય,
યથા “શિવ શિવ” ઇતિ શિવશબ્દસ્ય ।
સ્મર્યતે ચ કષ્ટાશ્ચર્યાદૌભગવન્નામ ।
તથા ચ પાદ્મપુરાણં “આશ્ચર્યેऽપિ ભયે શોકે ક્ષુધિતે નામ વા મમ ।
વ્યાજેન વા સ્મરેદ્યસ્તુ મમ સાયુજ્યમાપ્નુયાત્” ઇતિ એતત્કવિનાન્યત્રાપ્યયં
શબ્દઃ પ્રયુક્તઃ, યથા “હરસિ મુધા કિમુ હલહલ કાલમ્” ઇતિ ।

પાદામ્ભોજયુગં સ્વકીયમનિશં સર્વાત્મનાભ્યર્ચતાં
મર્ત્યાનાં સકલાર્થદં દૃઢમમી ત્વામર્થયન્તે તુ યત્ ।
ભોગાન્ ક્ષુદ્રતમાન્ જગત્ત્રયપતે! નૈતદ્વિચિત્રં ઘટો
ગૃહ્ણાતિ ધ્રુવમલ્પમેવ સલિલં પૂર્ણેऽપિ રત્નાકરે ॥ ૧.૮૪॥

રાષ્ટ્રે હસ્તગતે ધનેऽપિ વિપુલે ભોગેષુ ચાન્યેષુ વા
ત્વત્સેવાભવસમ્મદસ્ય કણમ૧પ્યદ્ધા ન વિન્દેત યત્ ।
મર્ત્યો હન્ત વરીયસી નનુ તતો નિષ્કામરૂપૈવ તે
ભક્તિઃ સૈવ મમોરદયત્વવિરતં લક્ષ્મીપતે! ચેતસિ ॥ ૧.૮૫॥

૧. સત્યમ્ ।
૨. અનુદાત્તત્ત્વલક્ષણમાત્મનેપદમનિત્યમિતિ પરસ્મૈપદસાધુતા ।
ઇટકિટકટી ગતાવિત્યત્ર પ્રશ્લિષ્ટસ્યેધાતોર્વા રૂપમ્ ।

તત્રાપીશ! પરં ત્રિમૂર્તિષુ તવૈવાઙ્ઘ્રિદ્વયારાધનં
સર્વોત્કૃષ્ટમિતિ સ્મ વેદિતુમલં સન્તિ પ્રમાણાન્યહો ।
લક્ષ્મીનાથ! બહૂનિ વેદવચસાં સારાત્મકેષુ પ્રભો !
શ્રીમદ્ભાગવતાદિષુ પ્રતિપદં દૃશ્યાનિ નિસ્સંશયમ્ ॥ ૧.૮૬॥

ભક્તાધીન ! પુરાણસઙ્ગ્રહ ઇતિ ખ્યાતે હિ સર્વોત્તમે
 ગ્રન્થે સર્વપુરાણસન્તતિવચસ્સારાત્મકે સાદરમ્ ।
નૂનં ત્વન્મહિમૈવ કૈટભરિપો! નિસ્સંશયં વર્ણ્યતે
 તચ્ચાસીદયિ નઃ પ્રમાણમમલં ત્વન્મુખ્યતાવેદને ॥ ૧.૮૭॥

સ્યાનન્દૂરપુરાધિનાથ! ભગવન્ ! યન્મન્ત્રશાસ્ત્રસ્ય ચા-
 પ્યાદૌ નીલતનોસ્ત્રિમૂર્ત્યધિકતા ૧પ્રોક્તા તવૈવ સ્ફુટમ્ ।
શૌરે ! ૨તૈન્નિજગાદ કિઞ્ચ ૩સકલં ત્વામેવ નાન્યં યત-
 સ્તસ્માત્ ત્વત્પદભક્તિરેવ સકલશ્રેયઃ પ્રદેતિ ધ્રુવમ્ ॥ ૧.૮૮॥

૧. “અનન્તભોગે વિમલે ફણાયુતવિરાજિતે શયિતં શાર્ઙ્ગિણં
શર્વશૌરિપદ્મભુવસ્તદા તુષ્ટુવુર્હૃષ્ટમનસો વિષ્ટરશ્રવસં
વિભું સૂક્તિભિઃ સ્તુતિભિઃ પ્રીતઃ સ્વમૂર્તિં સ વ્યદર્શયત્ ॥

નીલોત્પલદલપ્રખ્યાં નીલકુઞ્ચિતમૂર્ધજામ્ ।”
ઇત્યાદિપ્રપઞ્ચસારવચનૈઃ પ્રકટિતેત્યર્થઃ ।
૨. મન્ત્રશાસ્ત્રમ્ । ૩. પૂર્ણમ્ ।

સ્વામિન્ ! વર્જિતપક્ષપાતકણિકાઃ ૧શ્રીશઙ્કરસ્વામિન-
 સ્ત્વામેવાચ્યુતમામનન્તિ સકલેષ્વાદ્યં જગત્કારણમ્ ।
ત્વન્નિષ્ઠોરુસહસ્રનામવિલસદ્વ્યાખ્યાસ્વરૂપં પુન-
 શ્ચક્રુસ્તજ્જયમઙ્ગલાભિધમહો ગ્રન્થં ચ તે તુષ્ટયે ॥ ૧.૮૯॥

૧. શ્રીશઙ્કરભગવત્પાદાઃ ।

એકૈકં વિબુધવ્રજે ત્વદિતરાનારાધ્ય શૌરે! નરા
 એકૈકં સમવાપ્નુયુર્નનુ વરં ગોવિન્દ ! નાતોઽધિકમ્ ।
ભક્તાનાં સકલેષ્ટદે ત્વયિ પરાનન્દૈકમૂર્તૌ સ્થિતે
 તાનેવેહ ભજન્તિ કેચિદથ તત્તેષાં ન કિં મન્દતા ॥ ૧.૯૦॥

તસ્માદ્યત્તવ સેવયૈવ મનુજસ્તાપત્રયાદૂરતો
 મુક્તઃ સર્વસુખં શ્રમેણ રહિતો ૧ભુઙ્ક્તેઽન્યથા દુર્લભમ્ ।
તન્મે ત્વત્પદભક્તિરેવ સહસા ભૂયાદિતિ શ્રીપતે !
 યાચે ત્વામરવિન્દનાભ! જગતિ સ્વાદીયસી સા હિ મે ॥ ૧.૯૧॥

૧. અન્યથા દુર્લભં ત્વત્સેવાવિરહે દુષ્પ્રાપમ્ ।

ભક્તાશ્ચ ત્રિવિધાઃ સ્મૃતાસ્તવ પદદ્વન્દ્વૈકરક્તાશયા

લોકેષૂત્તમમધ્યમાધમગુણૈર્યુક્તા બતાધોક્ષજ! ।
તેષાં ભેદમહં ત્વદીયકૃપયા કિઞ્ચિદ્વદામિ પ્રભો !
શ્રીમદ્ભાગવતેઽનુદૃષ્ટમધુના સ્કન્ધે કિલૈકાદશે ॥ ૧.૯૨॥

સર્વેષ્વત્ર ચરાચરેષુ ભગવન્ ! ભૂતેષુ પશ્યેત્ સુધી-
સ્ત્વદ્ભાવં ભુવનેઽમ્બુજાક્ષ ! રહિતો યો ભેદદૃષ્ટ્યા પુમાન્ ।
સર્વાણિ ત્વયિ યશ્ચ દેવ! કલયેદ્ભૂતાનિ વિશ્વાત્મકે
સાન્દ્રાનન્દસુધામ્બુધૌ મુરરિપો! ભક્તોત્તમોઽસૌ સ્મૃતઃ ॥ ૧.૯૩॥

ઈશે તં સમનુશ્રિતેષ્વથ જડેષ્વદ્ધા દ્વિષત્સુ ક્રમાદ્-
ભક્તિં ૧સૌહૃદભાવમઙ્ગ! કરુણાં કુર્યાદુપેક્ષાં ચ યઃ ।
૨ભાવેનાચ્યુત! તારતમ્યસહિતેનામ્ભોજનાભ! પ્રભો !
૩પૂર્વોક્તેષ્વથ તેષુ તેષ્વયમહો ભક્તઃ સ્મૃતો મધ્યમઃ ॥ ૧.૯૪॥

૧. સૌહાર્દભાવનામ્ । ૨. ભાવનયા । ૩. ઈશાદિષુ ।

ચિત્તામ્ભોરુહસમ્ભૃતપ્રતિનવપ્રેમોદયેનાદરાત્
ત્વદ્રૂપાર્ચનમેવ યો ભુવિ પુમાન્ શ્રદ્ધાલુરત્રેહતે ।
ત્વદ્ભક્તેષુ તથેતરેષુ રહિતો મૈત્ર્યા નિકામં બુધૈઃ
સોઽયં વિશ્વજગન્નિવાસ ! ભગવન્! ભક્તઃ સ્મૃતઃ પ્રાકૃતઃ ॥ ૧.૯૫॥

તાસુ ત્વં વિતરાશુ કૈટભરિપો! સર્વોત્તમામેવ મે
ભક્તિં કામમ૧હમ્મમેત્યતિદુરાધર્ષાભિમાનાપહામ્ ।
કારુણ્યામૃતધારયા નિજપદાનમ્રાવનોદ્યુક્તયા
સ્વામિન્ ! દુસ્તરમોહવારિધિમહાવર્તે પરિભ્રામ્યતે ॥ ૧.૯૬॥

૧. અહમ્મમેત્યાકારસ્યાતિદુર્ધર્ષાભિમાનસ્ય નાશિકામ્ ।

શૌરે ! સ્યાદધિકારિતા મમ કથં ભક્તેરિહાસ્યાઃ ૧પરં
પ્રાપ્યાયાઃ પુરુપુણ્યરાશિભિરિતિ પ્રાપ્નોમિ નો ૨કુણ્ઠતામ્ ।
લોકે યન્ન હિ દુર્લભં કિમપિ સમ્પ્રાપ્તે ત્વદીયે પુનઃ
કારુણ્યે ૩ભવિનામધોક્ષજ! સમસ્તાભીષ્ટસન્દાયકે ॥ ૧.૯૭॥

૧. કેવલં ઇદં પુરુપુણ્યરાશિભિરિત્યનેનાન્વેતિ । ૨. ભગ્નોત્સાહતામ્ ।
૩. સંસારિણામ્ ।

૧વાચાટો ભવતિ ક્ષણેન મનુજો મૃકોઽપિ યદ્વૈભવાત્
મૂર્ખઃ પણ્ડિતતામુપૈતિ સહસા પઙ્ગુર્ગતૌ પાટવમ્ ।

ભિક્ષાશી ચ કુબેરતાં મુરરિપો! લોકે દરિદ્રઃ પુમાં-
સ્તત્તાદૃક્કરુણારસે તવ પુનર્લબ્ધેઽત્ર કિં દુર્લભમ્ ॥ ૧.૯૮॥

૧. બહુભાષી ।

આરૂઢે દિનનાયકે સતિ તમસ્તિષ્ઠેન્નુ૧ પૂર્વાચલં
મેઘે વર્ષતિ નિર્ભરં ન વિરમેત્ કિં ચાતકાનાં તૃષા ।
રોગાઃ કિં પ્રશમં ન યાન્તિ સહસા લબ્ધે હિ દિવ્યૌષધે
પ્રાપ્તે ત્વત્કરુણારસે કિમુ લયં નો યાન્તિ સર્વાપદઃ ॥ ૧.૯૯॥

૧. તિષ્ઠેન્નુ ન તિષ્ઠેદિત્યર્થઃ ।

અન્તર્યામિતયા સમસ્તજગતાં તે પ્રેરકસ્યાધુના
કિં વાચ્યં બહુ દેવ ! મન્દમતિના ભોગીન્દ્રશાયિન્ ! મયા ।
કારુણ્યામૃતવારિરાશિલહરીસમ્પ્લાવિતાઙ્ઘ્રિદ્વયા-
મ્ભોજાનમ્રસમસ્તલોક ! કુરુ માં ૧ત્વદ્ભક્તિપૂર્ણાન્તરમ્ ॥ ૧.૧૦૦॥

૧. ત્વદ્ભક્તિપૂર્ણં આન્તરં મનો યસ્ય તમ્ ।

ઇતિ સ્વાતિશ્રીરામવર્મવઞ્ચિમહારાજવિરચિતાયાં
ભક્તિમઞ્જર્યાં પ્રથમશતકમ્ ।

## અથ દ્વિતીયશતકમ્ ।

શ્રાવં શ્રાવં પરમકરુણાવૈભવં તાવકીનં
ભક્તેષ્વદ્ધા પ્રકટિતમયે હન્ત સઙ્ખ્યાતિગેષુ ।
૧ઉદ્ભ્રાન્તાતિપ્રચુરપુલકં પદ્મનાભાધુના મે
ચેતો મજ્જત્યતુલિતતમે સાન્દ્રમોદામ્બુરાશૌ ॥ ૨.૧॥

૧. ઇદં શ્રવણક્રિયાયા વિશેષણં મજ્જનક્રિયાયા વા ।

સર્વેષ્વસ્મિન્નજિત ! ભુવને વસ્તુષુ સ્તોકભાવં
પ્રાપ્તેષ્વંહોદલન! કરુણાપેક્ષયા તે મુરારે! ।
વક્ષ્યે સામ્યં સુદૃઢમવનૌ કેન વા માધવાસ્યા
૧નિશ્શેષાર્તિપ્રસરવનદાવચ્છટાકાલિકાયાઃ ॥ ૨.૨॥

૧. નિશ્શેષાર્ત્તિપ્રસરસ્યૈવ વનદાવચ્છટાયાઃ કાલિકા મેઘમાલા તસ્યાઃ ।

ધ્યાતું ૧વા ત્વન્નિરુપમકૃપાપૂરપીયૂષસિન્ધુ-

प्रौढस्रोतोगतिमहह यन्नैव शक्तं मनो मे ।
લક્ષ્મીજાને! તવ ગુરુકૃપાભારમીશાદ્ય વોઢું
સામર્થ્યં સ્યાદપિ કથમણોરસ્ય મે રમાનસસ્ય ॥ ૨.૩॥

૧. અપ્યર્થે વાશબ્દઃ । ૨. પુનર્મનસો નામગ્રહણમનાદરાર્થમ્ ।

૧વાચાપ્યેતાં કથમપિ હરે ! શંસિતું રચેદ્યતિષ્યે
વાચો દિવ્યા અપિ ન પટવો વર્ણને હન્ત તસ્યાઃ ।
એવમ્ભાવે ગિરિધર ! પરં મૌનમેવાત્ર કાર્યં
યદ્યપ્યેતં નિશમય તથાઉપ્યાશયં મે મુરારે !॥ ૨.૪॥

૧. કૃપામ્ । ૨. અસ્ય વાક્યસ્યાનન્તરં"તન્ન શક્યતે"
ઇત્યધ્યાહારો બોધ્યઃ ।

અશક્યત્વે હેતુદ્વિતીયપાદેનોપપાદ્યતે । ૩. અભિસન્ધિ વક્ષ્યમાણમ્ ।
જાતં પુષ્ટં વરદ ! રહિતં ચાથ રોગૈરસહ્યૈ-
રેતદ્વર્ષ્મ ત્રિભુવનજનારાધ્ય ! શક્ત્યૈવ યસ્યાઃ ।
શૌરે ! તસ્યા નુતિમિહ યથાશક્ત્યહો ત્વત્કૃપાયા
નો કુર્વે ચેદ્ભવતિ હિ કથં શારદા મે ત્વનિન્દ્યા ॥ ૨.૫॥

નિત્યં લક્ષ્મીમુરસિ સરસં બિભ્રતાપિ ત્વયાતિ-
પ્રીત્યા મુષ્ટિઃ પૃથુકકલિતા સ્વીકૃતા યત્ કુચેલાત્ ।
તસ્માદજ્ઞસ્ય ચ મમ વચઃ પ્રીતયે નો કથં તે
દેવર્ષીણામપિ નુતિપદાતીતભૂમ્નોઽપ્યજસ્રમ્ ॥ ૨.૬॥

ઇન્દ્રદ્યુમ્નાહ્વયનરપતિશ્ચન્દનાદ્રૌ રમેશ !
ત્વત્સેવાયાં નિરતહૃદયઃ પ્રાગપશ્યન્મુનીન્દ્રમ્ ।
પ્રાપ્તોપાન્તં મહિતતપસં ૧ત્વૌર્વશેયં પ્રશમ-
સ્તેન શ્રીમન્નતુલિતરુષા રહસ્તિભૂયં પ્રપેદે ॥ ૨.૭॥

૧. અગસ્ત્યમ્ । ૨. રાજત્વમ્ ।

ભૂયસ્તાવત્ સુબહુ વિહરન્ શૈલવર્યે ત્રિકૂટે
દુગ્ધામ્ભોધેરયિ! સહચરૈર્મધ્યભાજિ સ્વકીયૈઃ ।
પ્રાપ્તે ગ્રીષ્મે મિહિરકિરણૈર્વ્યાકુલાત્મા નિકામં
સ્વેચ્છં સ્વચ્છે સરસિ કુહચિદ્યૂથપોઽવાતરત્ સઃ ॥ ૨.૮॥

હૂહૂનામા મુરહર! તદા કોઽપિ ગન્ધર્વવર્યો

નક્રાત્મત્વં સપદિ ગમિતો દેવલસ્યાથ શાપાત્ ।
તિષ્ઠંસ્તસ્મિન્ સરસિ સહસા તં ગજેન્દ્ર પદાગ્રે
જગ્રાહાસૌ હહહ દશનૈર્લોહસૂચીશિતાગ્રૈઃ ॥ ૨.૯॥

ભૂયો ૧યુધ્યન્ સ તુ ગજપતિસ્તેન સાર્ધં સહસ્રં
વર્ષાણ્યાર્તો હૃદિ સમુદિતાતીતજન્મોત્થભક્તિઃ ।
ત્વામભ્યર્ચંસ્તરનુતરતનુઃ પુષ્કરૈઃ પુષ્કરાત્તૈ-
રપ્યસ્તાવીત્ પ્રણતસુખદં ૩નિર્ગુણેન સ્તવેન ॥ ૨.૧૦॥

૧. અનુદાત્તેત્ત્વલક્ષણસ્યાત્મનેપદસ્યાનિત્યત્વાદકરણમ્ ।
૨. આહારાભાવાદતિકૃશશરીરઃ । ૩. ગુણાતીતસ્વરૂપપરેણ ।

શ્રુત્વા સ્તોત્રં પ્રમુદિતમના વૈનતેયાધિરૂઢઃ
પ્રાપ્યોપાન્તં નિહતતમસા હન્ત ચક્રેણ નક્રમ્ ।
હત્વા સદ્યો જગદભયસન્દાયિના પાણિના તં
સ્પૃષ્ટ્વા દન્તીશ્વરમગમયઃ સ્વીયસારૂપ્યમાશુ ॥ ૨.૧૧॥

લીલાલોલાં જલધિતનયામપ્યનાદૃત્ય તાવ-
ન્મુઞ્ચન્ દેવીમયિ! સરભસં હન્ત નીલામિલાં ચ ।
મઞ્ચં ચારાત્ ફણિપતિમયં તેઽત્યજદ્યો હિ ૧વેગઃ
સન્ત્રાણેઽસ્ય દ્વિપકુલપતેઃ કં ન સમ્મોદયેત્ રસઃ ॥ ૨.૧૨॥

૧. ત્વરા ૨. વેગઃ

આર્તત્રાણે તવ હિ ભગવન્ ! બદ્ધદીક્ષત્વમુચ્ચૈ-
ર્લોકેશાતઃ પરમયિ હરે! કિં ત્વયા દ્યોતનીયમ્ ।
યદ્વોમું તં ગજપરિવૃઢં વેગતોઽગાઃ પ્રિયાચ્ચ
ત્યક્ત્વા મઞ્ચાત્ ક્ષુધિતતૃષિતં વત્સકં ગૌરિવાર્ત્તમ્ ॥ ૨.૧૩॥

તસ્માન્નૂનં તવ ચરણયોર્યઃ સમાસક્તચેતા
એષોઽનાથોઽપ્યહહ ન ભજેદ્વાચ્યતાં ૧તત્પદસ્ય ।
યન્નાથેનાચ્યુત! સ ભવતા વિષ્ટપાનાં ત્રયાણાં
સ્યાનન્દૂરાધિપ ! દૃઢતરં નાથવત્તામુપૈતિ ॥ ૨.૧૪॥

૧. અનાથશબ્દસ્ય ।

મધ્યેભૂપં ૧વિધુતવસના યાજ્ઞસેની સુદીના
કૌરવ્યેણાચ્યુત! કુમતિના હન્ત દુશ્શાસનેન ।

હા કૃષ્ણેતિ વ્યસનભરિતા દેવ! ચુક્રોશ યાવત્
    તાવત્ પ્રાદાઃ સદયમમિતાં માલિકાં વાસસોઽસ્યાઃ ॥ ૨.૧૫॥

૧. હૃતવસ્ત્રા

પ્રાપ્તે તસ્યાઃ સદયિતતતેર્હન્ત ઘોરેઽવમાને
    ક્ષોણીશાનાં સદસિ મહતામીશ! દૌષ્ટ્યાદ્રિપૂણામ્ ।
૧વેમવ્યાપારમપિ ચ ૨તુરીસ્પર્શલેશં વિના યા
    શ્રીમન્ ! વાસાંસ્યતનુત જયેત્ સા કૃપાચાતુરી તે ॥ ૨.૧૬॥

૧. ”પુંસિ વેમા વાયદણ્ડ” ઇત્યમરઃ ।
૨. તુરી તન્તુવેષ્ટનસૂક્ષ્મદારુવિશેષઃ ।

યઃ શોકેભ્યો બત જનમમું મોચયેદ્દારુણેભ્યો
    નોવાઞ્છન્ પ્રત્યુપકૃતિલવં સોઽયમેવાત્ર બન્ધુઃ ।
અન્યે તાવદ્ધનહતિપરા બન્ધવો નામમાત્રાત્
    ૧ત્વન્નિષ્ઠારતો ભવતિ વિશદા બન્ધુતા પદ્મનાભ !॥ ૨.૧૭॥

૧. ત્વદ્ગતા । ૨. પ્રત્યુપકારાનપેક્ષયા ભક્તશોકમોચનાદ્ધેતોઃ ।

કિઞ્ચામુષ્મિન્ સ્થિરચરમયે ત્વદ્વશે સર્વલોકે
    યે નાથત્વેન ચ ભુવિ નરા બન્ધુબુદ્ધ્યા ચ મર્ત્યાન્ ।
તુલ્યાવસ્થાન્ જનિમૃતિજુષસ્તુલ્યબાહ્વઙ્ઘ્રિશીર્ષાન્
    ભો મન્યન્તે ન કિમિયમહો મન્દતૈવેહ તેષામ્ ॥ ૨.૧૮॥

કિં વા સ્નિગ્ધૈઃ ફલમસુસમૈઃ કિં ફલં જ્ઞાતિભિર્વા
    કિં વિત્તેનાપિ ચ બત બહુક્લેશલબ્ધેન જન્તોઃ ।
કાલે વામે તદિદમખિલં વ્યર્થતામેવ યાયાત્
    તત્રાપ્યેનં પુરુષમવિતું ત્વત્કૃપૈવેહ દક્ષા ॥ ૨.૧૯॥

તસ્માત્ સર્વૈરિહ હિ મનુજૈઃ સર્વથા સર્વકાલે
    કાર્યો યત્નો જગતિ સુમહાંસ્ત્વત્કૃપાસ્ત્યૈ નિકામમ્ ।
તસ્યાં ભૂયસ્તરસુચરિતૈર્માધવાસાદિતાયાં
    લભ્યં શર્મ૧રયિતુમહિરાઽપ્યતીવાપ્રગલ્ભઃ ॥ ૨.૨૦॥

૧. વર્ણયિતું

સ્યાનન્દૂરેશ્વર ! નનુ પુરા પન્નગાધીશમઞ્ચે
    શ્રીભૂમીભ્યામનુપમરસં પ્રોલ્લસન્તં ભવન્તમ્ ।

દ્રષ્ટું પ્રાપ્તાઃ સનકમુખયોગીશ્વરાઃ પાર્ષદાભ્યાં
 રુદ્ધા જાતા જયવિજયસંજ્ઞાયુતાભ્યાં તવૈવ ॥ ૨.૨૧॥

તેષાં તાવદ્વિષયપટલીનિસ્પૃહાણામપિ દ્રાક્
 કોપશ્ચક્રે નનુ હૃદિ પદં પ્રેરણાત્ ભોસ્તવૈવ ।
૧તૈસ્તૌર સદ્યો હરિચરણસંસેવનાયુક્તચેષ્ટૌ
 શપ્તૌ યોનિં ભજતમચિરાદાસુરીમિત્યુપેન્દ્ર !॥ ૨.૨૨॥

૧. સનકાદિયોગીશ્વરૈઃ ૨. જયવિજયૌ ।

શોકોદ્રેકાકુલિતહૃદયૌ પાર્ષદૌ તાવદેતૌ
 નત્વાનત્વા મુહુરપિ વિભો ! પાદયોર્હન્ત તેષામ્ ।
પ્રાપ્તે ઘોરે સુરરિપુજનુષ્યપ્યજસ્રં ભવેન્નૌ
 વિષ્ણોઃ પાદસ્મૃતિરિતિ ભૃશં પ્રાર્થયામાસતુસ્તાન્ ॥ ૨.૨૩॥

પ્રાપ્તસ્તાવદ્બહિરયિ ભવાન્ પત્રિરાજાધિરૂઢો
 લક્ષ્મ્યા યુક્તો મુનિવરતતિં વીક્ષ્ય હૃષ્ટઃ સ્તુવાનામ્ ।
દૃષ્ટ્વા દીનૌ ૧નિરવધિ નિજૌ પાર્ષદો રમામુપેતં
 કષ્ટં જન્મત્રિતયવિરતાવિત્યવોચદ્દયાદ્રમ્ ॥ ૨.૨૪॥

૧. દીધાત્વર્થભૂતક્ષયક્રિયાવિશેષણમિદમ્ । ૨. પ્રાપ્નુતમ્ ।

જાતૌ ભૂયો દિતિસુતતયા કાશ્યપાત્ પાર્ષદૌ તૌ
 તત્રૈકોઽભૂદગણિતબલાન્ધો હિરણ્યાક્ષનામા ।
અન્યો નામ્ના કશિપુરસુરોઽભૂદ્ધિરણ્યાદિશબ્દ-
 સ્તાવત્યન્તં ભુવનમખિલં પીડયામાસતુર્દ્રાક્ ॥ ૨.૨૫॥

૧ધાત્રીં તોયે મુરહર! તયોર્દાનવઃ ૨પૂર્વમુક્તો
 મગ્નાં ચક્રે હહહ કુમતિર્યાવદત્યન્તખિન્નામ્ ।
તાવદ્ધાત્રા ધરણિધરણાયાર્થિતસ્ત્વં ૩તદીયા-
 ન્નાસારન્ધ્રાદયિ! સમભવઃ સૂક્ષ્મવારાહરૂપઃ ॥ ૨.૨૬॥

૧. ભૂમિમ્ । ૨. પ્રથમં નિર્દિષ્ટઃ (હિરણ્યાક્ષઃ) । ૩. ધાતૃસમ્બન્ધિનઃ ।

સદ્યો જાતો ગિરિસમવપુઃ સ્વીયદંષ્ટ્રાગ્રભાગે
 વિભ્રત્ ક્ષોણીં બહિરુપગતો વીક્ષ્ય યુદ્ધાર્થિનં તમ્ ।
દૈત્યં હત્વા ભુજધૃતગદં રોષવેગારુણાક્ષં
 શ્રીમન્નેતત્ ત્રિજગદગદં ચાકરોસ્ત્વં સલીલમ્ ॥ ૨.૨૭॥

શૌરે ! તાવત્ પ્રમુદિતતમા નિર્જરેશાઃ સશક્રા
મન્દારપ્રસવપટલીં મૂર્ધ્નિ તેઽ૧વાકિરન્તઃ ।
દિવ્યૈઃ સ્તોત્રૈર્નિગમવચસાં સારભૂતૈર્ભવન્તં
લક્ષ્મીજાને ! નુનુવુરધિકં યજ્ઞરૂપં પરેશમ્ ॥ ૨.૨૮॥

૧. અવાઙાવુપસર્ગૌ ।

એવં ભૂમેરપિ સુમહિતાત્ સઙ્કટાદ્રક્ષિતુર્વૈ
ત્વત્તો નાન્યા ગતિરતિદૃઢં પ્રાણિનાં માદૃશાં યત્ ।
ભાગં ૧તસ્યાઃ કમપિ જગદારાધનીરયાશ્રિતાનાં
તસ્માન્નિત્યં તવ તુ કરુણાપૂરમેવાશ્રયેઽહમ્ ॥ ૨.૨૯॥

૧. ભૂમેઃ । ૨. પ્રાણિવિશેષણમિદમ્ ।

કલ્પે કલ્પે ખલવિહતયે સત્પરિત્રાણહેતો
રૂપાણ્યેવં સરસમુરરીકૃત્ય ચેતોહરાણિ ।
તત્તત્કાલેષ્વજિત ! કરુણામચ્યુતાવિષ્કૃતાં તે
કો વા દાક્ષ્યં જગતિ બિભૃયાદ્વક્તુમમ્ભોજનાભ! ॥ ૨.૩૦॥

જ્ઞાત્વા કૃત્તં ઝટિતિ ભવતા ભ્રાતરં દાનવેન્દ્રઃ
સદ્યો જાતઃ કનકકશિપુઃ ક્રોધશોકાકુલાત્મા ।
તિષ્ઠંશ્ચક્રે સદસિ કુમતિર્દાનવાનાં પ્રતિજ્ઞાં
જેષ્યામ્યારા૧દજિત ! સહસા ત્વામિતીશાન્ધબુદ્ધિઃ ॥ ૨.૩૧॥

૧. ઇયં સમ્બુદ્ધિરજય્યત્વસ્ફોરણાય પ્રતિજ્ઞાવાક્યમધ્યગતા કવિના કૃતા ।
અથવા “અજિતસહસા” ઇત્યેકં પદમ્ । અપરાજિતેન બલેનેતિ તદર્થઃ ।

તપ્ત્વા ઘોરં તદનુ સ તપઃ પ્રીણયિત્વા વિરિઞ્ચિં
તુષ્ટાત્તસ્માત્ સુરનરમૃગાદ્યૈરવધ્યત્વમાપ્તઃ ।
દૃપ્તઃ શક્રાદહરત દિવં ત્વામનાદૃત્ય તાવદ્-
વિશ્વં ચૈતત્સકલમચિરાત્ પીડયામાસ ગાઢમ્ ॥ ૨.૩૨॥

પ્રહ્લાદાખ્યઃ સમજનિ સુતસ્તસ્ય ગર્ભસ્થિતાવે-
વાપ્તત્વત્પાદકમલરતિર્નારદાત્ તાપસેન્દ્રાત્ ।
સોઽયં જાત્યાસુરશિશુરપિ ત્વન્નિવિષ્ટાશયત્વા-
દાસીદ્ભક્તિપ્રસરસુમહાનાટકે ૧સૂત્રધારઃ ॥ ૨.૩૩॥

૧. નિર્વાહકઃ ।

ભૂમન્! બાલ્યેઽપ્યસુરપટલીમધ્યગસ્યાસ્ય ચાસ્યા-
　　ન્નો નિર્યાતં કિલ તવ ગુણાલાપતોઽન્યત્ કદાપિ ।
યત્તદ્યુક્તં તૃણકલુષજમ્બાલમૃત્કણ્ટકાનાં
　　મધ્યસ્થોઽપિ ત્યજતિ સહજં કિં મણિઃ કાન્તિભારમ્ ॥ ૨.૩૪॥

દૃષ્ટ્વા પુત્રે તવ ચરણયોર્ભક્તિમજ્ઞાતપૂર્વાં
　　સ્વીયૈઃ સદ્યઃ કિમિદમિતિ સ વ્યાકુલો દાનવેન્દ્રઃ ।
ઐચ્છત્તં ત્વય્યથ વિરહિતં હન્ત ભક્ત્યા વિધાતું
　　તેજોભઙ્ગં રચયિતુમિવ પ્રૌઢ૧પઞ્ચાસ્યસૂનોઃ ॥ ૨.૩૫॥

૧. પ્રૌઢસિંહડિમ્ભસ્ય ।

શણ્ડામર્કાહ્વયદિતિસુતૌ કલ્પયામાસ ભૂયઃ
　　પ્રહ્લાદસ્યાચ્યુત ! ગુરુતયા દાનવાચાર્યશિષ્યૌ ।
તાભ્યાં ભક્તેસ્ત્વયિ સ ૧પૃથુકો વારિતોઽરપ્યર્ભકેભ્યો
　　ભક્તેસ્તત્ત્વં દૃઢમકથયદ્દેશિકાસન્નિધાને ॥ ૨.૩૬॥

૧. અર્ભકઃ । ૨. સહાધ્યાયિભ્યો બાલેભ્યઃ ।

આહૂતોઽસાવથ ગુરુગૃહાદેકદા ભક્તમૌલિઃ
　　પૃષ્ટઃ પિત્રા વદ પૃથુક! મે કિં ન્વધીતેષુ સારમ્ ।
પ્રોચે તાવત્સજલનયનો હન્ત રોમાઞ્ચિતાઙ્ગઃ
　　સારં શૌરેઃ પદભજનમેવેતિ નિસ્સંશયં સઃ ॥ ૨.૩૭॥

શ્રુત્વા વાક્યં વદનગલિતં દુસ્સહં હન્ત સૂનો-
　　સ્ત્વત્પાદાબ્જાદ્વિમુખમતિભિ૧ર્દાનવઃ પાપકૃત્યૈઃ ।
સેહે નૈવ ત્રિભુવનપતે ! સ્વાદુ દુગ્ધં વિમિશ્રં
　　પ્રાલેયાભાલસિતરસિતયા રમ્યયાઽરોચકીવ ॥ ૨.૩૮॥

૧. હિરણ્યકશિપુઃ ૨. શર્કરયા । ૩. અન્નદ્વેષવાનિવ ।

રોષિત્વાથો કનકકશિપુ૧ર્દેશિકાભ્યાં પ્રકામં
　　નૂનં હ્યેષા સહજમતિરેવાત્મજસ્યેતિ જાનન્ ।
નાનોપાયાન્ વ્યતનુત પરં તસ્ય હત્યૈ દુરાત્મા
　　ત્વત્પાદાબ્જે નિહિતમનસો હન્ત મોહાન્ધચેતાઃ ॥ ૨.૩૯॥

૧. સમ્પ્રદાને ચતુર્થી ।

આહૂયારાત્ પ્રતિભયતરાન્ દાનવાન્ શસ્ત્રપાણી-

નેતાન્ પ્રોચે સ્વકુલહતકં સત્વરં તં ૧હતેતિ ।
ઘ્નન્તઃ શસ્ત્રૈર્વપુષિ તમમું હન્ત ભિન્નાસ્ત્રગાત્રાઃ
પેતુર્વજ્રસ્થિરતરકૃપાકઞ્ચુકેનાવૃતે તે ॥ ૨.૪૦॥

૧. હન્તેર્લોટો મધ્યમબહુવચનમ્ ।

ભગ્નોદ્યોગસ્તદનુ દનુજો દન્દશૂકાન્ સુતીવ્રાન્
દૃષ્ટિઘ્રાણેષ્વપિ વિષમયાન્ પ્રેરયામાસ હન્તુમ્ ।
પ્રહ્લાદં તં ત્વયિ ધૃતરતિં ૧પન્નગારાતિકેતૌ
માતઙ્ગેન્દ્રં બત બિસગુણેનેવ બન્ધું મદાન્ધમ્ ॥ ૨.૪૧॥

૧. ઇદં વિશેષણં દન્દશૂકશક્તિકુણ્ઠત્વસ્ફોરકમ્ ।

તસ્યાજ્ઞાં તાં તદનુ ફણિનઃ કામમાદૃત્ય સર્વે
વ્યાતન્વાના અહમહમિકાં તં દશન્તઃ સરોષાઃ ।
ભગ્નપ્રાયા ગલિતરુધિરા વૈનતેયૈરદૃશ્યૈઃ
પ્રાપ્યોપાન્તં દિતિકુલપતેઃ સન્નતા એવમૂચુઃ ॥ ૨.૪૨॥

દૈત્યેન્દ્રામી વયમિહ ભવત્પુત્રઘાતે ન શક્તાઃ
ફૂત્કારોદ્યદ્ગરલશિખયા સાગરોચ્છોષિણોઽપિ ।
ઇત્યુક્ત્વૈતે પુનરથ ગતાઃ પૂર્વમુદ્ઘુષ્ય દાક્ષ્યં
નૈતચ્ચિત્રં દ્વિવિધ૧વચનં હા દ્વિજિહ્વારધિપાનામ્ ॥ ૨.૪૩॥

૧. પ્રાગ્વીરવાદં પ્રકાશ્ય પશ્ચાત્ સ્વાશક્તિકથનરૂપમ વ્યવસ્થિતભાષણમ્ ।
૨. અવ્યવસ્થિતભાષિશ્રેષ્ઠાનાં સર્પશ્રેષ્ઠાનાં ચ ।

શ્રુત્વા વાક્યં તદિદમધિપો વ્યાકુલો દાનવાના-
માહૂયારાત્ સુતમકથયદ્દેવ! સામોક્તિભેદૈઃ ।
ત્વત્પાદાજે રતિમતુલિતાનન્દદાં હન્ત ૧ભઙ્ક્તું
રસોઽયં વિષ્ણૌ રતિમખિલદે કસ્ત્યજેદિત્યભાણીત્ ॥ ૨.૪૪॥

૧. ત્યાજયિતુમિત્યર્થઃ ।  ૨. પ્રહાદઃ
ભૂયઃ ક્રુદ્ધો દ્વિપપરિવૃઢાન્ પીનશુણ્ડોગ્રદન્તાન્
હન્તું પુત્રં નિજમતિખલઃ પ્રેરયામાસ દૈત્યઃ ।
તે તં રોષાન્નિરવધિ યથાશક્તિ સમ્પીડયન્તો-
ઽપ્યેનં કિઞ્ચિદ્વ્યથયિતુમપિ શ્રીશ! શક્તા ન ચાસન્ ॥ ૨.૪૫॥

તિષ્ઠન્ પશ્ચાદથ ગુરુકુલે દાનવેભ્યઃ શિશુભ્યો

ગુહ્યં તૂપાદિશદયિ પરં ૧તત્ત્વમેવૈષે ભક્ત્યા ।
૨શ્રુત્વા ચાદાપયદથ ગરં તચ્ચ સૂદૈઃ ૩સ તસ્મૈ
સોઽયં પીત્વા તદપિ સમભૂન્નિર્વ્યથઃ પ્રાગ્વદેવ ॥ ૨.૪૬॥

૧. પ્રહ્લાદઃ । ૨. તત્ત્વં તત્ત્વોપદેશનં વા શ્રવણક્રિયાયાઃ કર્મ ।
૩. હિરણ્યકશિપુઃ ।

ભૂયો જ્ઞાત્વા તવ પદયુગાદપ્રકમ્પાશયં તં
પુત્રં હર્મ્યાજ્જિતહિમગિરેઃ પાતયામાસ યાવત્ ।
તાવત્ ક્ષોણી નનુ ભગવતી કોમલાભ્યાં ગૃહીત્વા
પાણિભ્યાં તં વ્યતનુત ૧ભવત્યસ્ય ભક્તેઃ પ્રશંસામ્ ॥ ૨.૪૭॥

૧. ત્વયિ ।

ભગ્નોદ્યોગઃ પુનરપિ ખલો નાગપાશેન બદ્ધ્વા
રાત્રૌ સિન્ધૌ તનયમસુરૈઃ ક્ષેપયામાસ યાવત્ ।
તાવન્નાગા ગરુડદલિતાઃ સોપહારઃ ૧સમસ્તૌત્
સિન્ધુશ્ચૈનં૨ સ ચ સુવિમલં ત્વદ્વપુર્દ્રષ્ટુમૈચ્છત્ ॥ ૨.૪૮॥

૧. સંસ્તુતવાન્ । ૨. પ્રહ્લાદમ્ ।

સ્થિત્વા સિન્ધૌ સ્તુવતિ ભગવંસ્ત્વામથાસ્મિન્૧ સમોદં
પ્રત્યક્ષસ્ત્વં ખલુ નયનયોસ્તસ્ય ભૂત્વા ક્ષણેન ।
પ્રાદા ભક્તિં વિષયપટલીનિસ્પૃહાયાઙ્ગ! તસ્મૈ
ભૂયઃ સોઽથ ત્રિભુવનપતે ! લોકબાહ્યશ્ચચાર ॥ ૨.૪૯॥

૧. પ્રહ્લાદે ।

પિત્રા પૃષ્ટઃ સદસિ ચ સમાનીય યં સેવસે ત્વં
વિષ્ણું ક્વાસાવિતિ સ તુ તદા સર્વગં ત્વાં જગાદ ।
તર્હિ સ્તમ્ભે કિતવ ! ન કુતો દૃશ્યતેઽત્રેતિ રોષાત્
સ્તમ્ભં હસ્તોદ્ધૃતવરકૃપાણેન ચાઘટ્ટયત્ સઃ ॥ ૨.૫૦॥

આસીત્ સદ્યો ભુવનમખિલં કમ્પયન્ કોઽપિ શબ્દઃ
કુર્વન્ ભીત્યા કનકકશિપું નષ્ટચેષ્ટં ક્ષણાર્ધમ્ ।
તેનારાવેણ તુ બત ચચાલાસનાત્ પદ્મજન્મા
૧તાવત્ સ્તમ્ભાત્ સમજનિ ભવદ્રૂપમત્યન્તઘોરમ્ ॥ ૨.૫૧॥

૧. તદા

શ્રીમન્ ! કણ્ઠાદુપરિ મૃગરાજાત્મકં તસ્ય ચાધો
	બિભ્રદ્રૂપં ત્રિભુવનતતં માનવં ઘોરદંષ્ટ્રમ્ ।
વ્યોમસ્પર્શિપ્રચુરધવલશ્રીસટાજાલમાતા-
	મ્રાક્ષં તત્તે વપુરયિ પરં નારસિંહં નમામિ ॥ ૨.૫૨॥

દૃષ્ટ્વા તં ત્વાં પ્રતિભયતરાકારમત્યન્તભીતો-
	ઽપ્યન્તર્ધૈર્યં બહિરભિનયન્ દાનવેન્દ્રો દુરાત્મા ।
ખડ્ગૈઃ શૂલૈઃ સુમહિતગદાસાયકૈશ્ચૈષ ૧યુધ્યન્
	જ્ઞાત્વા ૨કમ્પં તવ તુ પુરતશ્ચાપતદ્ભગ્નયત્નઃ ॥ ૨.૫૩॥

૧. યુદ્ધમાત્મન ઇચ્છન્ । ૨. કોપાટોપજં ચલનમ્ ।

ગૃહ્ણન્ દૈત્યં સ્વયમથ નિજે પાતયન્નૂરુયુગ્મે
	ભિત્ત્વા વક્ષઃ કુલિશપરુષૈસ્તસ્ય તૂર્ણં નખાગ્રૈઃ ।
પાયમ્પાયં રુધિરમચિરાત્ તં ૧વિહાયાસુરૌઘં
	કૃત્સ્નં હત્વાપ્યયિ ન સમભૂઃ શાન્તકોપોગ્રવહ્નિઃ ॥ ૨.૫૪॥

૧. તં વિહાય પ્રમીતં હિરણ્યકશિપું દૂરતસ્ત્યક્ત્વેત્યર્થઃ ।

બ્રહ્મેશાદ્યાઃ સકલમરુતઃ કમ્પમાના વિદૂરે
	સ્થિત્વા મૌલૌ ૧મુકુલિતકરા માનસામ્ભોજજાતમ્ ।
મોદં હત્યા ત્રિભુવનરિપોર્દાનવેન્દ્રસ્ય વક્ત્રે
	કિઞ્ચિન્માત્રં પ્રકટયિતુમપ્યપ્રગલ્ભા બભૂવુઃ ॥ ૨.૫૫॥

૧. સાઞ્જલિબન્ધાઃ ।

સદ્યો ધાત્રા મુરહર! તવ પ્રીણનાયાર્થિતો હિ
	પ્રહ્લાદસ્તે ચરણયુગલે દ્રાક્ પપાતાથ યાવત્ ।
તાવદ્ભક્તેક્ષણવિગલિતામેયમન્યુસ્તદીયે
	કૃત્વા મૌલૌ કરમયિ! વરાનપ્યદાસ્ત્વં વરેણ્યાન્ ॥ ૨.૫૬॥

ભક્તાધીને ભવતિ શનકૈઃ શાન્તમન્યાવમર્ત્યાઃ
	સેન્દ્રા મૌલૌ સુરતરુસુમાન્યચ્યુતાવાકિરન્તઃ ।
રેજુર્ભેરીં પરમકુતુકદ્યોતિકાં વાદયન્તો
	ગન્ધર્વાશ્ચ શ્રુતિલયયુતં કીર્તિપૂરં જગુસ્તે ॥ ૨.૫૭॥

યે યે પૂર્વં ત્રિદિવનિલયા દૈત્યરાજેન દૌષ્ટ્યા-

ન્નાનારૂપાં નિરુપમશુચં પ્રાપિતાસ્તે ચ સર્વે ।
તુષ્ટા નષ્ટ્યા ત્રિજગદહિતસ્યાસ્ય દૈત્યસ્ય તાવત્
પ્રત્યેકં તુષ્ટુવુરયિ હરે ! નારસિંહાકૃતિં ત્વામ્ ॥ ૨.૫૮॥

ઇત્થં ભક્તેષ્વજિત ! દૃઢમાવિષ્કૃતાયાઃ કૃપાયા
એકં વા તે વિલસિતમહો કો ભવેદ્વક્તુમીશઃ૧।
એવમ્ભાવે ક્વ તવ ગણનાતીતકારુણ્યભૂમા
કેયં વાચો વિતતિરિહ મે બાલિશસ્યામ્બુજાક્ષ !॥ ૨.૫૯॥

૧. શક્તઃ ।

દૃષ્ટ્વાપ્યેવં તવ કરુણયા દારુણાભ્યો વિપદ્ભ્યો
મુક્તાન્ ભક્તાનપરિગણિતાન્ યસ્ય નોદેતિ બુદ્ધિઃ ।
સમ્પ્રાપ્તું ૧તામયિ પરમવાગ્ગોચરાનન્દદાત્રીં
કોઽન્યો લોકે ભવતિ હિ તતોઽપ્યાર્ત્તબન્ધો ! વિગર્હ્યઃ ॥ ૨.૬૦॥

૧. કરુણામ્ ।

એવં ભક્તેષ્વપરિગણિતેષ્વીશ! સન્દર્શિતાયા
લેશેનાપિ સ્નપય ભગવન્ ! માં કૃપાયા મુરારે ! ।
તેનૈવાયં ભવતિ કમલાનાયકાત્યન્તધન્યઃ
કિં નો દદ્યાત્સુખમનુપમં બિન્દુમાત્રં સુધાયાઃ ॥ ૨.૬૧॥

ત્રૈલોક્યેશં નિરુપમતમાનન્દસાન્દ્રસ્વરૂપં
ત્વાં કો વિજ્ઞાપયિતુમહકં૧ પદ્મનાભાત્મવાઞ્છામ્ ।
૨યદ્યપ્યેષા મમ ખલુ પરા પ્રાર્થના દીનબન્ધો !
કાર્યો નિત્યં નનુ મયિ મદીયોઽયમિત્યેષ ભાવઃ ॥ ૨.૬૨॥

૧. અલ્પોઽહમ્ । ૨. અનેન તથાપીત્યસ્યાક્ષેપઃ ।

બ્રહ્મા શક્રોઽપિ ચ હરિદધીશાસ્તથાન્યે ચ યસ્યાઃ
સ્ફૂર્ત્યૈવેદં ભુવનમહિતં સાન્દ્રસામ્રાજ્યમાપુઃ ।
યા વા લોકે સકલપરિતાપાપહન્ત્રી જનાનાં
સેયં નિત્યં શિશિરયતુ માં ત્વત્કૃપા શાર્ઙ્ગપાણે!॥ ૨.૬૩॥

દૈત્યારાતે! જગતિ મનુજૈર્દુર્લભાનત્ર ભોગાન્
વિશ્વૈર્માન્યામમિતસુખદાં સાર્વભૌમસ્થિતિં વા ।
ભાગ્યાવાપ્તં નિધિમપિ ધનેશસ્મયધ્વંસિનં વા

તુચ્છાન્ મન્યે તવ હિ કરુણાપેક્ષયા નિર્વિશઙ્કમ્ ॥ ૨.૬૪॥

પ્રાપ્યં સ્યાચ્ચેદ્ભુવિ સમધિકં શર્મ ભોગાદિષુ પ્રા-
ગુક્તેષ્વીશ! ત્વદુરુકરુણાલભ્યસૌખ્યાન્મ૧હાન્તઃ ।
સ્ફીતં રાજ્યં સુબહુ વિનિધાયાત્મજેષુ ક્ષણેન
પ્રાપ્તાઃ કસ્માદ્વનમવનિપાસ્તાપસૈસ્તુલ્યશીલાઃ ॥ ૨.૬૫॥

૧. અસ્ય તર્હીત્યાદિ ।

અસ્તિ શ્રીમન્નિહ પરિમિતિઃ શર્મણામપ્યમર્ત્યે-
ન્દ્રાવાપ્યાનાં મખશતલસત્પુણ્યપાકોદિતાનામ્ ।
કો વા કુર્યાજ્જગતિ ભવદીયાનુકમ્પાલવસ્ય
પ્રાપ્ત્યા જન્યસ્ય તુ પરિમિતિં શર્મણઃ પઙ્કજાક્ષ !॥ ૨.૬૬॥

ભક્તવ્રાતાધિહર! ભવતૈવાર્પિતે સ્વાધિકારે
સ્થિત્વા ભોગાંસ્ત્રિભુવનદુરાપાન્ રમેશાશ્નુવાનાઃ ।
અપ્યમ્ભોજાસનહરમહેન્દ્રાદયઃ કામયન્તે
યામેવાસ્યાઃ કિમિહ મધુરં ભૂતલે ત્વત્કૃપાયાઃ ॥ ૨.૬૭॥

યસ્યાઃ પ્રાપ્ત્યૈ નિયતમવનૌ વિશ્વવન્દ્યા મહાન્તો
દાનસ્નાનવ્રતજપમખાદીનિ કર્માણિ કૃત્વા ।
નૂનં વિન્દન્ત્યપરિગણિતં શર્મ યલ્લેશલાભે
કસ્તાં વાઞ્છેન્ન હિ તવ કૃપાં માદૃશો બાલિશોઽપિ ॥ ૨.૬૮॥

સ્યાનન્દૂરેશ્વર! જયતિ તે દિવ્યકારુણ્યરૂપં
ધ્વસ્તાપાયં કિમપિ હિ ધનં રાજચોરાદ્યહાર્યમ્ ।
નિત્યં તૃષ્ણાજનકમપિ લોકેશ ! યોગીશ્વરાણાં
નિર્દ્વન્દ્વાનાં નિખિલવિષયાવાઙ્મુખાનામગણ્યમ્ ॥ ૨.૬૯॥

૧સર્વાભીષ્ટાન્ વિતરતિ નૃણાં યત્નલેશં વિનાહો
મૂલાદુત્પાટયતિ સહસા પાદપં પાપરૂપમ્ ।
રક્ષત્યેરતાન્ મુરહર! તથા દારુણાભ્યો વિપદ્ભ્યઃ
કિં કિં સૌખ્યં ભુવિ ન જનયેદ્દેહિનાં તેઽનુકમ્પા ॥ ૨.૭૦॥

૧. અર્થાનિતિ શેષઃ । ૨. નરાન્ ।

યસ્યાઃ પ્રાપ્ત્યા પરમકૃપણોઽપ્યત્ર મર્ત્યઃ ક્ષણેન
પ્રાપ્નોત્યુચ્ચૈઃ શ્રિયમખિલસમ્પૂજ્યતાં ચાર્તબન્ધો ! ।

યસ્યાં કિઞ્ચિત્ પરમપુરુષાવાઙ્મુખાયાં કુબેરોઽ-
      પ્યસ્વો હિ સ્યાત્ સ્રજતિ ન મુદં કસ્ય વા સા કૃપા તે ॥ ૨.૭૧॥

પારાવારઃ પરિલસતિ તે સાન્દ્રકારુણ્યપીયૂ-
      ષાત્મા સ્વચ્છઃ સતતમચલો નિત્યપૂર્ણો હ્યભઙ્ગઃ ।
મગ્ના યેઽસ્મિન્ કલિતતરણાસ્તે દૃઢં મોહસિન્ધો-
      ર્યે ચામગ્નાઃ ૧સુનિયતમમી હન્ત મોહાબ્ધિમગ્નાઃ ॥ ૨.૭૨॥

૧. સુનિશ્ચિતમ્ ।

લોકે લબ્ધું વરદ ! વિવિધાનીપ્સિતાન્ સાધનીભૂ-
      તેયં શૌરે ! તવ હિ કરુણેત્યાહુરેકે મહાન્તઃ ।
નાયં પક્ષો મમ તુ સકલાપેક્ષયા૧સ્યા ૨વરત્વાત્
      ૩એતન્નિષ્ઠે ધ્રુવમવિતથે સાધ્યતાસાધનત્વે ॥ ૨.૭૩॥

૧. કરુણા-    ૨. ઉત્તમાભીષ્ટત્વાત્ । ૩. કરુણાનિષ્ઠે ।

ત્વત્કારુણ્યે દિશતિ સકલં વાઞ્છિતં માનવાનાં
      યાચ્ઞાપેક્ષાલવવિરહિતં વિશ્વપૂર્ણે હ્યનન્તે ।
યે યાચન્તે સુરપરિવૃઢોદ્યાનદેશૈકનિષ્ઠં
      મન્દારદ્રું નિયતમધમાસ્તે મૃગેભ્યોઽપિ ભૂમન્ !॥ ૨.૭૪॥

પાપાત્માનં રચયતિ કમપ્યત્ર પુણ્યેન પૂર્ણં
      નિસ્સ્વં કઞ્ચિત્ કલયતિ તથા સર્વસામ્રાજ્યયુક્તમ્ ।
પ્રજ્ઞાહીનં કમપિ ચ વિધત્તે હિ વાગીશતુલ્યં
      કિં કિં ચિત્રં પ્રકટયતિ વા ત્વત્કૃપા નેન્દ્રજાલમ્ ॥ ૨.૭૫॥

૧પર્યાપ્તિઃ સ્યાદજિત ! ચિરકાલોપભોગેઽખિલેષુ
      શ્રીમન્ ! વસ્તુષ્વપિ બત સુધાસન્નિભેષ્વત્ર પુંસામ્ ।
નિત્યં ભૂયોઽપ્યઘહર! સમાસ્વાદ્યમાનં પ્રમોદં
      દાતું દક્ષં નવમિવ વિના તેઽનુકમ્પાં કિમન્યત્ ॥ ૨.૭૬॥

૧. અલમ્ભાવઃ ।

લક્ષ્મીજાને! જગતિ કરુણા નિત્યપૂર્ણા પ્રપા તે
      નૂનં પુંસામ૧મૃતમનિશં મોદસાન્દ્રં દિશન્તી ।
યજ્જાયન્તે વરદ ! રહિતાસ્તૃષ્ણયા યામવાપ્તાઃ
      સ્યાનન્દુરેશ્વર! નનુ રભવગ્રીષ્મકાલોષ્ણખિન્નાઃ ॥ ૨.૭૭॥

૧. મોક્ષં સુધાં ચ ।    ૨. ભવશબ્દઃ સંસારે ।

ઘોરાજ્ઞાનપ્રચુરતિમિરં નાશયન્ દસ્યુજાલં
    રાગદ્વેષાદિમયમચિરાદ્દ્રાવયન્ હન્ત દૂરે ।
પાપશ્રેણીમયમરમધઃ પાતયંસ્તં ૧દિવાન્ધં
    સાધુસ્તોમામ્બુજમુખકરો ભ્રાજતે ત્વત્કૃપાર્કઃ ॥ ૨.૭૮॥

૧. ઉલૂકમ્ ।

નો દક્ષોઽહં કિમિહ બહુના ત્વત્કૃપાયા વિલાસં
    સ્તોતું ભોગીન્દ્રશયન ! મનોવાગતીતં નિકામમ્ ।
કિન્ત્વૈતાવત્ પરમહમવૈમ્યાર્ત્તબન્ધો! નરાણાં
    ભૂરિશ્રેયોવિતરણવિધૌ તત્સમાના તુ સૈવ ॥ ૨.૭૯॥

તસ્માદ્યાચે ત્રિભુવનપતે! ત્વત્કૃપામેવ સોઽહં
    નિશ્શેષાર્તિપ્રશમનપરાં દેવ! દાસસ્ત્વદીયઃ ।
સર્વાભીષ્ટાન્યયિ વિતરતસ્તે કિલાયાચિતાન્ય-
    પ્યસ્યેચ્છાપૂરણમયિ કિય૧ન્મે કૃપાવારિરાશે !॥ ૨.૮૦॥

૧. અલ્પમિત્યર્થઃ

અજ્ઞત્વાદપ્યજિત ! સુગુણૈર્વર્જિતત્વાત્ કૃપાયાઃ
    પાત્રત્વં મે યદિ ન હિ તવ શ્રીધરા૧સ્તાં તદેતત્ ।
જાગર્ત્યેકો નનુ મમ ગુણો યત્ત્વદેકાશ્રયત્વં
    સોઽયં દોષાન્ હરતિ સકલાન્ પાત્રતાં ચાવહેન્મે ॥ ૨.૮૧॥

૧. ન ગણનામર્હતીત્યર્થઃ તત્ર હેતુઃ પરાર્ધે દર્શિતઃ ।

દોષૈર્યુક્તોઽપ્યયિ પરિજનશ્ચેદિહાનન્યનાથો
    જાતુ ત્યાજ્યો ન ભવતિ હૃષીકેશ ! તત્સ્વામિનાસૌ ।
લોકે માતા બહુષુ તનયેષ્વેકમત્યન્તમૂઢં
    કચ્ચિજ્જહ્યાદુત મમ સુતો નાયમિત્યુલ્લપેદ્વા ॥ ૨.૮૨॥

અમ્ભોજાક્ષ ! પ્રતિપદમહો નિત્યમાગસ્સહસ્રં
    તન્વાનાનામલમવિદુષાં માદૃશાં ચાપરાધાન્ ।
તુચ્છીકુર્વન્નવ કરુણયા નિસ્તુલાનન્દદાત્ર્યા
    નો ચેત્ કા વા ગતિરયિ હરે! નસ્ત્વદેકાશ્રયાણામ્ ॥ ૨.૮૩॥

ઈશે કિઞ્ચ ત્વયિ વિકિરતિ સ્વાનુકમ્પાસુધાયા

લેશં તાપત્રયહર! મયિ શ્રીધરાનન્યનાથે ।
પાપાજ્ઞાનપ્રસરકલુષક્રોધમોહાદયો મે
ચિત્તે સ્થાનં કથમિવ પરાનન્દમૂર્તે! ભજેયુઃ ॥ ૨.૮૪॥

સ્યાદેકત્રાચ્યુત ! નનુ તમસ્તેજસોઃ કિં ૧નિવાસો
દારિદ્ર્યસ્યાપિ ચ ભુવિ તથા સમ્પદઃ સમ્ભવેત્ કિમ્ ।
અજ્ઞાનસ્યાપિ ચ કિમુ ભવેત્ તદ્વદીશ ! શ્રુતસ્ય
ત્વત્કારુણ્યસ્ય ચ કિમુ ભવેત્ તદ્વદંહઃકુલસ્ય ॥ ૨.૮૫॥

૧. અયમુત્તરવાક્યેષ્વપિ કર્તા ।

કિઞ્ચાપ્તાયાં મુરહર! મયા તેઽનુકમ્પાસુધાયાં
કિં ભૂયોભિર્મમ ગુણગણૈરબ્ધિજાભૂમિજાને ! ।
તસ્યામેવ ક્ષિતિધર ! મયા દ્રાગનાસાદિતાયાં
કિં વા લોકે ફલમિહ મદીયૈર્ગુણાનાં સહસ્રૈઃ ॥ ૨.૮૬॥

દૈત્યારાતે! જગતિ સુધિયસ્ત્વત્કૃપામર્જયેયુ-
ર્ભક્ત્યા યોગેન ચ નનુ તપસ્સમ્પદા વા મહાન્તઃ ।
અપ્યજ્ઞાનાં મુરહર! પુનર્માદૃશાં ચાપ્રમેયં
દાતું શર્માર્હસિ કરુણયા દીનબન્ધો ! ત્વમેવ ॥ ૨.૮૭॥

કુર્વન્ત્યદ્ધા કિમપિ કરુણાં સ્વીયભૃત્યેષુ દેવા
અન્યે લોકે યદિ ચિરતરં સેવિતાઃ ક્લેશપૂર્વમ્ ।
એષા નૈવ ૧પ્રકૃતિરયિ તે વિશ્વપૂર્ણાનુકમ્પા-
સિન્ધોર્યત્તત્ કુરુ મયિ કૃપાં માધવ! સ્વીયદાસે ॥ ૨.૮૮॥

૧. સ્વભાવઃ ।

ત્વં મે માતા ત્વમસિ જનકસ્ત્વં ગુરુસ્ત્વં હિ બન્ધુ-
સ્ત્વં ભો દૈવં પરમિતિ જગત્સાર્વભૌમાનુવેલમ્ ।
ત્વય્યેવાલં નિહિતહૃદયં મન્દમપ્યાશ્વમન્દ-
પ્રેમોદ્ભુતપ્રચુરકૃપયા મામવા૧નન્યનાથમ્ ॥ ૨.૮૯॥

૧. રક્ષ ।

શૌરે ! ૧દૃશ્યં જગતિ કિમપિ ત્વન્નિષેવાં વિના નો
દાતું દક્ષં શુભમિતિ રમાનાથ ! નિશ્ચિત્ય બાઢમ્ ।
ત્વામેવેશં શરણમુપયાતં સ્વકીયાનુકમ્પા-

સ્રોતોવૃષ્ટ્યા શિશિરય જવાત્ પદ્મનાભાદરાન્મામ્ ॥ ૨.૯૦॥

૧. નો દૃશ્યમિતિ યોજના, નોપલબ્ધું શક્યમિત્યર્થઃ ત્વત્સેવાતિરિક્તસ્ય શુભદાનદક્ષસ્ય વસ્તુનોઽનુપલબ્ધિપ્રમાણાદભાવ એવેતિ ભાવઃ ।

દાસ્યં વાઞ્છન્ત્યમિતધિષણા યસ્ય ૧સન્યસ્તદણ્ડા
યન્મહાત્મ્યં નિગમવચસામપ્યતિક્રાન્તવર્ત્મ ।
તં ત્વામીશં ભુવિ કુશલદં વિષ્ટપાનાં ત્રયાણાં
પ્રાપ્તોઽસ્મ્યદ્ધા શરણમથ મે કિં ત્વદન્યાશ્રયેણ ॥ ૨.૯૧॥

૧. સન્ત્યક્તદણ્ડાઃ, “ન દણ્ડં ન શિખાં નાચ્છાદનં
ન ભૈક્ષં ચરતિ પરમહંસ”
ઇતિ મહોપનિષ દુક્તલક્ષણાઃ પરમહંસા ઇતિ યાવત્ ।

લોકે વાઞ્છા ભવતિ હિ નૃણાં વસ્તુનિ શ્રેષ્ઠ એવ
શ્રીમત્પદ્મારમણ! સકલાપેક્ષયા વીતશઙ્કમ્ ।
શ્રૈષ્ઠ્યસ્યાપીશ્વર! નનુ પરં શ્રેષ્ઠતાદાતુરન્યં
ત્વત્તઃ કં વા શરણમુપયામીહ કારુણ્યસિન્ધો !॥ ૨.૯૨॥

યો વા દેવસ્ત્રિભુવનપતે ! વર્ણ્યતે ૧લબ્ધવર્ણૈ-
સ્તસ્યોત્કર્ષો નિયતમિતરાપેક્ષયા હન્ત વાચ્યઃ ।
૨એવમ્ભૂતં મુરહર! પુનઃ કેવલં પક્ષપાતા-
દુત્કર્ષં ભોસ્તવ ન કથયે કિન્તુ સત્યં બ્રવીમિ ॥ ૨.૯૩॥

૧. વિચક્ષણૈઃ । ૨. ઉક્તન્યાયસિદ્ધમિત્યર્થઃ એતચ્ચોત્કર્ષવિશેષણમ્ ।

જાને નૈવ પ્રણતશુભદ! ચ્છદ્મવાદં કદાપિ
હ્યગ્રે વાચ્યં પ્રિયમિતિ ધિયા ચાથ નૈતન્મયોક્તમ્ ।
યદ્વૈ સત્યં નિગમવચસાં શ્રેણિભિર્યચ્ચ ગીતં
યન્મે ભાતં હૃદિ નનુ તવ પ્રેરણાત્તત્ત્વવોચમ્ ॥ ૨.૯૪॥

ભૂયો ભૂયઃ સવિનયમહં પ્રાર્થયે સિન્ધુકન્યા-
જાને ! તાં તે નિરુપમકૃપાધોરણીમેવ નિત્યમ્ ।
૧દાનૌત્સુક્યાન્મનસિ કિમપિ હ્યર્થિનાં ચાવકાશં
૨યાચ્ઞોત્પત્તેઃ પરમઉદિશતા કિં મમેચ્છા ન પૂર્યા ॥ ૨.૯૫॥

૧. અયાચિતાભીષ્ટદાનકૌતુકાદિત્યર્થઃ ૨. દેહીતિ વાક્યપ્રયોગસ્યેત્યર્થઃ ।
૩. અસ્ય ત્વયેતિ વિશેષ્યમધ્યાહર્તવ્યમ્ ।

ત્રૈલોક્યાધીશ્વર! મયિ કદા સ્યાદ્દૃઢં તેઽનુકમ્પે-
ત્યેવં નક્તન્દિવમયિ પરં ચિન્તયા મે યુતસ્ય ।
વાઞ્છારૂપા વરદ! લતિકા ત્વત્કૃપારૂપપીયૂ-
ષાસિક્તેયં ભવતુ સફલા પદ્મનાભાર્ત્તબન્ધો !॥ ૨.૯૬॥

પત્રિત્રાતા ઇવ હિ જનનીં સ્વામસઞ્જાતપક્ષાઃ
સ્તન્યં વત્સા ઇવ ચ નિતરાં ક્ષુત્પરિશ્રાન્તદેહાઃ ।
પ્રાલેયાર્તો નર ઇવ પટં હન્ત હેમન્તકાલે
ત્વત્કારુણ્યં સ્પૃહયતિ ભૃશં શ્રીપતે ! માનસં મે ॥ ૨.૯૭॥

છાયાવૃક્ષં પથિક ઇવ ચ ગ્રીષ્મકાલોષ્ણખિન્નઃ
સઙ્ખ્યાહીનં નિધિમિવ નરઃ કિઞ્ચ નિસ્સ્વો નિતાન્તમ્ ।
વૃષ્ટિં સારામિવ ચ મનુજો દેવ! કેદારવૃત્તિઃ
સોત્કણ્ઠં મે હૃદયમધુના ત્વત્કૃપામીશ! લબ્ધુમ્ ॥ ૨.૯૮॥

વિદ્યાલિપ્સુર્નર ઇવ ભૃશં સદ્ગુરું વિશ્વમૂર્તે!
તેજસ્વી નિર્મલમિવ યશો નિષ્ઠિતો૧ રજન્યભૂમૌ ।
કર્ત્તા સદ્યઃફલમિવ હરે ! કર્મણામુત્તમાનાં
કારુણ્યં તે સ્પૃહયતિ ભૃશં ભો મદીયં હિ ચેતઃ ॥ ૨.૯૯॥

૧. અત્યન્તાસક્તઃ । ૨. યુદ્ધાઙ્ગણે ।

તસ્માચ્છૌરે ! વિગલિતવિલમ્બં ત્વદીયાનુકમ્પા-
પીયૂષાબ્ધેરભિનવતરા વીચયો માનસં મે ।
કુર્વન્ત્વદ્ધા સુબહુ મુદિતં વિશ્વનેત્રાધિ૧ભાર-
છેદોદગ્રાનુપમસુષમાવાસ! રાજીવનાભ!॥ ૨.૧૦૦॥

૧. દૃષ્ટવસ્તુદર્શનજન્યઃ સદ્વસ્ત્વદર્શનજન્યશ્ચ
વ્યથાતિશય આધિભારપદસ્યાર્થઃ ।

ઇતિ સ્વાતિશ્રીરામવર્મવઞ્ચિમહારાજવિરચિતાયાં
ભક્તિમઞ્જર્યાં દ્વિતીયશતકમ્ ।

## અથ તૃતીયશતકમ્ ।

શ્રીમન્ ! ભોગીન્દ્રશાયિન્નચિરવિકસિતેન્દીવરશ્રેણિકાન્તિ-
સ્તોમાટોપપ્રકામપ્રશમનપટુતાશાલિની સા ત્વદીયા ।

કાન્તિર્દેહસ્ય મલ્લોચનયુગમનિશં તન્વતી સમ્પ્રહૃષ્ટં
તાપં મન્માનસોત્થં ૧ત્રિવિધમપિ હરત્વઞ્જસા કઞ્જનાભ ! ॥ ૩.૧ ॥

૧. આધ્યાત્મિકાધિભૌતિકાધિદૈવિકરૂપમ્ ।

બ્રહ્મા શમ્ભુઃ સુરાણામધિપતિરૃષયો દેવગન્ધર્વસઙ્ઘાઃ
પાયં પાયં હરે ! યાં નિજનયનપુટૈર્ન હ્યતૃપ્યન્ મુરારે ! ।
સેયં તે રૂપસમ્પન્નિખિલજનહૃદુન્માદને બદ્ધદીક્ષા
સ્તોતું કેનેશ! શક્યા ભવતિ જલધિજાવલ્લભાસ્યાં ધરણ્યામ્ ॥ ૩.૨ ॥

માધુર્યાદપ્યહો યજ્જગતિ સુમધુરં યત્ર સારસ્યપુઞ્જા-
લ્લોકોત્કૃષ્ટાન્નિતાન્તં સરસમપિ ચ યન્મઞ્જુલત્વાચ્ચ મઞ્જુ ।
માઙ્ગલ્યાચ્ચેહ યદ્વૈ મુરહર! સુતરાં મઙ્ગલં તાદૃશં તે
રૂપં કસ્યેહ ચેતસ્યજિત ! ન જનયેત્ કૌતુકં કૈટભારે ! ॥ ૩.૩ ॥

યેષાં ચેતો મનાગપ્યનઘ! વશયિતું ૧નાલમીશ! ત્રિલોક્યાં
૨વસ્તુ શ્રીભૂમિજાને! કિમપિ હિ નિયતં નિર્મલજ્ઞાનભાજામ્ ।
તેષાં યોગીશ્વરાણામપિ હૃદિ સતતં મોહસન્દાયિની તે
દેહશ્રીઃ કેન વા સ્યાદ્ભુવિ પરમુપમેયા કવીન્દ્રૈર્વરેણ્યૈઃ ॥ ૩.૪ ॥

૧. ન સમર્થ ભવતીતિ શેષઃ । ૨. ઇદં ભવનક્રિયાયાઃ કર્તૃ ।

લાવણ્યં તે મુરારે! જગતિ કથયિતું સોદ્યમાસ્તત્ કવીન્દ્રા
યાવચ્છક્તીહ પઙ્કેરુહનિલયમુખા અપ્યહો જ્ઞાનવન્તઃ ।
વાચો ધાટીં ૧વ્યયીકૃત્ય ચ નનુ સકલાં સ્વામથો ભગ્નયત્ના
જાયન્તે હન્ત તદ્વૈભવકથનવિધૌ કસ્ય વા દક્ષતા સ્યાત્ ॥ ૩.૫ ॥

૧ વ્યયયિત્વેત્યર્થઃ ।

કિઞ્ચ શ્રીપઙ્કજાક્ષ ! ત્રિભુવનજનતાનેત્રસારઙ્ગપોત-
વ્રાતસ્યાહો વશીકૃત્યતિનિપુણતરં વાગુરાત્વં પ્રપન્ના ।
શોભા તે યાવદક્ષ્ણોર્ભવતિ હિ પુરતસ્તાવદેવાશ્રુધારા-
રોમાઞ્ચાસીમતાગદ્ગદવચનવશાત્ કો ભવેત્ સ્તોતુમીશઃ ॥ ૩.૬ ॥

સ્યાનન્દૂરેશ ! યાસૌ રચયતિ દૃષદા તુલ્યમપ્યત્ર ચેતઃ
સ્વાયત્તં દારુણાંહઃકુલશમનચણસ્વીયચારિત્રરાશે ! ।
તાં તે લાવણ્યધારામયમધુરસુધાધોરણી લોચનાભ્યાં
ભૂમન્ ! પાતું નિતાન્તં પ્રભવતિ ભુવને કઃ પુમાનલ્પપુણ્યઃ ॥ ૩.૭ ॥

૧ચિત્રં શૌરે ! દધાનોઽપ્યયિ તનુસુષમાશ્રેણિભિર્હન્ત સામ્યં
શ્લક્ષ્ણાભિર્નિર્જરેન્દ્રોપલસમરુચિભિશ્ચાઞ્જનક્ષ્માધરસ્ય ।
૨રાગં ચેતસ્યસીમં જનયસિ ભગવંસ્તત્ત્વબોધપ્રદીપ-
જ્યોતિર્વિધ્વસ્તમોહપ્રવિતતતમસાં માધવાનઞ્જનાનામ્ ॥ ૩.૮॥

૧. આશ્ચર્ય, જન્યજનકયોર્વૈરૂપ્યાત્ । ૨. આરુણ્યમાસક્તિં ચ ।

યેષાં તાવત્ પ્રદાયામિતસુકૃતપરીપાકપુઞ્જૈકલભ્યં
લોકે જન્મોત્તમં માનુષમવિકલતાં ચાથ સર્વાઙ્ગકેષુ ।
નેત્રાભ્યાં તે શરીરપ્રતિનવસુષમામેકદાપિ પ્રપાતું
કાલે રેખાં ન વિન્યસ્યતિ દૃઢમ૧દયસ્તેષ્વહો પદ્મજન્મા ॥ ૩.૯॥

૧. નિર્ઘૃણો ભવતિ ।

પીયૂષામ્ભોનિધિઃ કિં કિમુ બત સુજનશ્રેણિભાગ્યૈકસીમા
વિશ્વેષાં લોચનેન્દીવરસુખકરણે બદ્ધદીક્ષઃ કિમિન્દુઃ ।
માધુર્યસ્યાપ્રમેયસ્ય તુ કિમુ પરમા જન્મભૂરિત્યહો તે
કાન્તિર્ડોલાયિતં નઃ કલયતિ હૃદયં સંશયેષ્વીદૃશેષુ ॥ ૩.૧૦॥

ત્યક્ત્વા વાઞ્છાં સમસ્તેષ્વયિ બત વિષયેષુ ક્ષણાદાર્ત્તબન્ધો !
ભૂત્વા પર્ણાનિલાસ્વાદનવિહિતરતિઃ પર્વતાનાં ગુહાસુ ।
સ્થિત્વા તીવ્રં તપઃ શ્રીનિલય! કૃતવતા પૂર્વજન્મન્યુદારં
પ્રાપ્યં લોકે કિમન્યત્ ફલમિહ તપસો મૂર્ત્તિસન્દર્શનાત્ તે ॥ ૩.૧૧॥

અમ્ભોજાક્ષાનુવેલં નિખિલજનતતેર્દર્શનાદેવ તૃપ્તિં
દાતું બદ્ધોદ્યમાયાં તવ તનુસુષમારૂપપીયૂષવેણ્યામ્ ।
યત્નાદબ્ધેરવાપ્તં ૧કિમપિ સુખકરં કેવલં પાનકાલે
પાયમ્પાયં પ્રહૃષ્યન્ત્યયિ સુરભવને હા કિમર્થં ત્વમર્ત્યાઃ ॥ ૩.૧૨॥

૧. ઈષત્ ।

નૂનં ત્વત્કાન્તિરૂપામૃતરસલહરીકૌમુદી નિર્મલેયં
ભક્તાનાં માનસોત્થં સકલમપિ તમઃ કુર્વતી સંવિનષ્ટમ્ ।
યસ્માત્ તદ્દર્શનેનાચ્યુત! સુજનસમૂહાક્ષિનીલોત્પલાનિ
પ્રેમાશ્રુસ્ફીતધારામયમથ મકરન્દં જવાદુદ્ગિરન્તિ ॥ ૩.૧૩॥

શુદ્ધજ્ઞાનામૃતામ્ભોનિધિનવલહરીક્ષાલિતાંહઃ કલઙ્કા
લોકે શ્રીનારદાદ્યા મુનિનિકરવતંસાઃ સદા લોચનાભ્યામ્ ।

યાં દેવાસ્વાદયન્તોઽપ્યગધર! ૧યુગવન્નેત્રસમ્મીલનોત્થં
  પ્રત્યૂહં ભાવયન્તિ રક્ષણિકમવશયેત્ કં ન સા તાવકાભા ॥ ૩.૧૪॥

૧. કલ્યાદિમહાકાલવત્ । ૨. ક્ષણસ્થાયિનમ્ ।

ચિત્રં કાન્તિસ્ત્વદીયા દિનકરતનયાતીરરાજત્તમાલ-
  ક્ષોણીરુટ્પર્ણનીલાપ્યયિ શશિધવલાં કીર્ત્તિરાશિં પ્રસૂતે ।
દ્રષ્ટૄણાં માનવાનાં જનયતિ હૃદયે કિઞ્ચ ૧રાગં મુરારે!
  ચેતોવાચામગમ્યં નિયતમવિરતં દન્દશૂકારિકેતો! ॥ ૩.૧૫॥

૧. આરુણ્યમનુરાગં ચ ।

કાન્ત્યા સામ્યં તવેહાચ્યુત ! જલદગણો વોઢુમાશ્વમ્બુરાશે-
  સ્તોયં ગૃહ્ણન્ નિકામં નભસિ જડમયસ્તૂચ્છ્રિતો યાવદેષઃ ।
તાવત્ સ્વસ્થાપકર્ષે તવ તનુસુષમાપેક્ષયા વીક્ષ્ય શોકાત્
  મુઞ્ચન્ત્યશ્રૂણિ લક્ષ્મીપ્રિયતમ ! પરિતો વર્ષધારામિષેણ ॥ ૩.૧૬॥

લબ્ધું શોભાં ત્વદીયાં કુલિશભૃદુપલાદર્શગર્વાપનેત્રીં
  સ્યાનન્દૂરેશ! વાઞ્છાભરભરિતમનાંસ્યચ્યુતેન્દીવરાણિ ।
સ્થિત્વા નક્તન્દિવં માધવ! નનુ સરસિ સ્વચ્છતોયૌઘપૂર્ણે
  મન્યે તીવ્રં તપસ્યન્ત્યતિદૃઢમનસા ત્યક્તનિદ્રાણિ રાત્રૌ ॥ ૩.૧૭॥

એકીભૂયાત્ર લોકે ત્રિભુવનસુજનશ્રેણિભાગ્યૈકપુઞ્જો
  રૂપં કિઞ્ચિત્ સમાલમ્બ્ય હિ ભુવનહિતાયૈવ જાગર્તિ નૂનમ્ ।
એવં ચેત્ ૧કીદૃશં તત્ કથય સુરુચિરં રૂપમિત્યત્ર પૃષ્ટ-
  શ્ચેદ્વક્ષ્યેર નીલનીલં વિરચિતશયનં ૩પન્નગસ્વામિનીતિ ॥ ૩.૧૮॥

૧. કિઙ્ગુણકમ્ । ૨. ઉત્તરયિષ્યામિ । ૩. આદિશેષે ।

દુર્વાદુર્વારગર્વપ્રસરઘનઘટાદૂરનિર્વાસનાત્ય-
  ન્તોદ્ભ્રામ્યન્મા૧રુતન્ત્યાસ્તવ હિ તનુરુચેરીશ! જાતા ૨પ્રશસ્તિઃ ।
ત્રૈલોક્યં શર્વભૂભૃત્સમરુચિ સહસા કુર્વતી વર્ણમન્યં
  શ્વેતિમ્નઃ પીતરક્તાદિકમિહ નિયતં હન્ત નષ્ટં વિધત્તે ॥ ૩.૧૯॥

૧. મારુતવદાચરન્તી મારુતન્તી, તસ્યાઃ । ૨. કીર્ત્તિઃ ।

કિઞ્ચાસ્યામુદ્યતાયાં તવ તનુસુષમાસમ્ભવાયાં હિ કીર્ત્યાં
  જેતું વસ્ત્વત્ર લોકે સકલમપિ સિતં સ્વીયધાવલ્યભૂમ્ના ।
મન્યે શીતાંશુરુચ્ચૈર્ભયભરિતમના નાથ! પીયૂષધારા-

વિસ્રાવચ્છદ્મનાસૌ વિસૃજતિ નિતરાં સ્વેદ૧બિન્દુપ્રવાહમ્ ॥ ૩.૨૦॥

૧. ભયસાત્ત્વિકભૂતમ્ ।

કાન્ત્યાઃ કીર્ત્યા તવેહાચ્યુત! ભુવનતલે પઙ્કજાક્ષાવદાતે
પારાવારાઃ પરાત્મન્! જગતિ સુવિદિતાઃ સપ્તસઙ્ખ્યામિતાસ્તે ।
પ્રાપ્તા વર્ણેન સામ્યં કલશજલધિના હન્ત સર્વેઽપિ ૧જિહ્વૈ-
કાવેદ્યાન્યોન્યભેદા વરદ! સમભવન્નિત્યવૈમ્યસ્તશઙ્કમ્ ॥ ૩.૨૧॥

૧. જિહ્વયા એકયા રસવૈચિત્ર્યાદાવેદયિતું શક્યઃ પરસ્પરભેદો યેષાં તે ।

કિઞ્ચ ત્વદ્ધર્ષ્મકાન્ત્યુદ્ભવવિમલયશોમાલિકા કૃત્સ્નમેત-
ચ્છૌરે ! બ્રહ્માણ્ડભાણ્ડં નનુ નિજમહસા તન્વતી સા વલર્ક્ષમ્ ।
ધ્વાન્તં સર્વાસુ દિક્ષ્વપ્યયિ બત ૧મૃગયન્તી ન શક્નોતિ લબ્ધું
યત્ તદ્યુક્તં નિવાસઃ ક્વ ભવતિ હિ તયોરચ્યુતૈકત્ર લોકે ॥ ૩.૨૨॥

૧. ધવલીકરણેચ્છયાન્વિષ્યન્તી

પીત્વા કાન્તિં ત્વદીયાં નિજનયનસહસ્રેણ શક્રેણ મુક્તાં
ચેતઃપઙ્કેરુહોદ્યત્પ્રતિનવકુતુકદ્યોતિકાં બાષ્પધારામ્ ।
દૃષ્ટ્વા સ્વસ્પર્ધિની કાચન દિવિ તટિની સેયમિત્યેવ મત્વા
મન્યે જહ્નોસ્તનૂજા નિવસતિ કુપિતા ચાન્દ્રચૂડે જટાન્તે ॥ ૩.૨૩॥

પાતું નેત્રામ્બુજાભ્યાં તવ તનુસુષમાં વિશ્વસમ્મોહદાત્રીં
શૌરે ! વીતાન્તરાયં દૃઢ૧મનિમિષતાં હેતુભૂતાં સુરાણામ્ ।
દાતુર્ધાતુઃ પ્રશંસાં નનુ વચનશતૈર્હન્ત કૃત્વાપિ તૃપ્તિં
પ્રાપ્તઃ કોર વા નુ વાચામધિપતિસદૃશોઽપ્યત્ર ગીર્વાણવૃન્દે ॥ ૩.૨૪॥

૧. નિર્નિમેષત્વમ્ । ૨. અનિમિષતયાપિ દેવાસ્ત્વદ્રૂપદર્શનવિષયે ન
તૃપ્તિમાપુરિતિ તાત્પર્યમ્ ।

કિં દુગ્ધામ્ભોધિકન્યાનયનયુગરુચો મેલનાદીશ! કિં વા
સાર્ધં ગોપાઙ્ગનાભિઃ સુબહુવિહરણાદ્યામુનામ્ભસ્યુદારમ્ ।
કિં વા દૂર્વાદલાભાસમરુચિતુલસીદામશોભાનુષઙ્ગાદ્-
વિશ્વોન્માદાવહાં ત્વં વહસિ નનુ તનૌ શ્યામતાં સારસાક્ષ !॥ ૩.૨૫॥

ભૂમન્! વૃન્દાવનાન્તર્ગતનિબિડતમાલાવલીસંશ્રયાત્ કિં
કિં વા માયૂરબર્હાકલિતસુલલિતોત્તંસશોભાનુષઙ્ગાત્ ।
કિં વા નિર્વ્યાજમોદાકુલતરજનનીસાઞ્જનાશ્રુપ્રવાહા-

સેકાત્ ત્વં નૈલ્યમઙ્ગે વહસિ નનુ જગન્માનસોન્માદશક્તમ્ ॥ ૩.૨૬॥

ભક્તોત્તંસોરુપુણ્યાત્મક! તવ સુષમારૂપિણી નિમ્નગેયં
ભાતિ શ્રીમન્નપૂર્વા નનુ ભુવનતલે કાપ્યયે વીતશઙ્કમ્ ।
યા નેત્રાભ્યાં પ્રપાતું જનયતિ કુતુકં વીતતૃષ્ણાકુલાનાં
યોગીન્દ્રાણાં વિદૂરીકૃતહૃદયસમુદ્ભુતવૈરિ૧વ્રજાનામ્ ॥ ૩.૨૭॥

૧. વૈરિવ્રજેત્યસ્ય કામાદ્યરિષડ્વર્ગસ્યેત્યર્થઃ ।

લોકે વાઙ્માનસાગોચરમપિ સકલં શર્મ ૧જજ્ઞુર્મહાન્ત-
સ્તુચ્છં યલ્લબ્ધિજન્યાનુપમતરસુખાપેક્ષયા નિર્વિશઙ્કમ્ ।
એનાં નિર્વાણસૌખ્યામૃતરસલહરીમપ્યવાપ્તા ૨બતેર્ષ્યાં
યસ્મૈ કુર્વન્તિ તસ્માત્ કિમિહ ભુવિ ૩પરં તાવકાલોકભાગ્યાત્ ॥ ૩.૨૮॥

૧. જ્ઞાતવન્તઃ ૨. ઈર્ષ્યાં કુર્વન્તિ અશરીરતયા તાવકાલોકભાગ્યવિરહાત્ ।
૩. ઉત્કૃષ્ટમ્ ।

ભક્ત્યાભીક્ષ્ણં પ્રસન્નેન હિ નનુ ભવતા માધવાનન્યયાહો
સન્તો દેવાર્પ્યમાણેષ્વપિ વરદ! વરેષ્વિન્દ્રભોગાદિષુ દ્રાક્ ।
ભૂત્વાપેક્ષાવિહાનાઃ સકુતુકમનિશં યન્મુહુઃ કામયન્તે
તસ્માત્ ત્વન્મૂર્તિસન્દર્શનભવકુતુકાદ્વેદ્મિ નો સૌખ્યમન્યત્ ॥ ૩.૨૯॥

કિઞ્ચ પ્રત્યેકમઙ્ગેષ્વયિ તવ ભગવન્ ! વીક્ષિતેષ્વત્ર લોકૈ-
રન્યોન્યોત્કર્ષવત્ત્વાદનઘ! સુષમયા નાથ! તેષાં નિકામમ્ ।
દૃષ્ટિઃ કુત્રેહ દેયેત્યનુપમવિચિકિત્સાકુલં જાયતે નો
લોકે કસ્યેહ ચિત્તં ત્રિભુવનજનસન્દોહસન્તાપહારિન્ !॥ ૩.૩૦॥

તેજોવિસ્ફૂર્તિદૂરીકૃતબહલતમોરાશિમધ્યાહ્નવેલા-
ભ્રાજિષ્ણુપ્રૌઢપઙ્કેરુહસખ૧શતકોટિસ્મયધ્વંસિનીભિઃ ।
પર્યુપ્તેનોરુરત્નાલિભિરિહ મકુટેનાઞ્ચિતસ્યોત્તમાઙ્ગ-
સ્યાભા તે શર્મ નિર્માત્વનુદિનમયિ મે ભૂરિકારુણ્યરાશે !॥ ૩.૩૧॥

૧. શતકોટિશબ્દઃ સઙ્ખ્યાવચનઃ ।

તેષાં ભાસો મણીનાં ૧પુરટમયકિરીટાઞ્ચિતાનાં તવ દ્રા-
ગુપ્લુત્યાકાશદેશે ચિરતરમમલે વ્યાપ્ય તત્રેહ ભૂમન્ ! ।
નાનાવર્ણૌઘસમ્મેલનમિષમવલમ્બ્યાલમન્યોન્યમેતા
મન્યે જન્યં વિતન્વન્ત્યહમહમિકયા ગર્વપૂર્ણાન્તરઙ્ગાઃ ॥ ૩.૩૨॥

૧. પુરટશબ્દઃ સુવર્ણે ।

લોકાનાં ભૂરિકાન્તિવ્રજનિલયભવદ્દિવ્યકોટીરજાગ્ર-
નાનારત્નૌઘજાતાં નભસિ વિસૃમરાં પશ્યતાં કાન્તિવેણીમ્ ।
૧તારાઃ શારત્વમાપુર્ન હિ ભવતિ તથેત્યેવમાદ્યૈર્વિવાદૈ-
ર્જાયન્તે ભક્તકલ્પદ્રુસમ! મુખરિતા નૈવ કે કે દિગન્તાઃ ॥ ૩.૩૩॥

૧. એતદાદિના તથેત્યન્તેન વિવાદાકારવિશેષો દર્શિતઃ ।

સર્વત્ર વ્યોમદેશે સુબહુ વિસૃમરાં કિઞ્ચ તાં રત્નશોભાં
વીક્ષ્યામેયાં નિકામં કિમપિ નનુ મહઃ સ્તોકમાકાશસંસ્થમ્ ।
નમ્રત્વં પ્રાપ્તમારાદપજયભવયા લજ્જયા વાઞ્છતિ ૧સ્વં
૨ગોપ્તું મન્યે વલારેર્ધનુરિતિ ભુવનખ્યાતયા સંજ્ઞયૈવ ॥ ૩.૩૪॥

૧. સ્વકીયમ્ । ૨. અપહ્નોતુમ્ ।

સ્યાનન્દૂરપ્રભો! હાટકમયમકુટોદ્ભાસિનાનામણીનાં
કાન્તિર્વ્યોમાઙ્ગણે માધવ! તવ વિતતા સાધુ કસ્યેહ ચિત્તે ।
ત્વત્પ્રીત્યૈ વાસવાદ્યૈઃ સકલસુરગણૈર્વ્યોમરૂપે ૧વિતાને
બદ્ધાયા માલિકાયાઃ સુરવિટપિસુમાનાં ન શઙ્કાં વિધત્તે ॥ ૩.૩૫॥

૧. “અસ્ત્રી વિતાનમુલ્લોચ” ઇત્યમરઃ ।

પાદામ્ભોજાવનમ્રાખિલપરિજનસન્દોહસર્વાર્થદાને
નિત્યં બદ્ધોદ્યમશ્ચામિતરસફલદઃ પારિજાતો હરે ! ત્વમ્ ।
નાનારત્નોરુશોભાઞ્ચિતનવમકુટચ્છદ્મના પુષ્પિતોઽસિ
પ્રાયો દાતું ફલાનીશ્વર ! સુકૃતપરીપાકલભ્યાનિ લોકૈઃ ॥ ૩.૩૬॥

સદ્યઃ પ્રોદ્યદ્વિવસ્વત્પટુકિરણસમૂહાનુષઙ્ગપ્રકામ-
પ્રોત્ફુલ્લામ્ભોરુહાન્તર્ગતમધુરસપાનોદ્યતાં ૧ભૃઙ્ગવેણીમ્ ।
ધિક્કુર્વન્ કેશપાશસ્તવ મસૃણરુચિર્બાઢમાકુઞ્ચિતાગ્રઃ
શૌરે ! ચેતસ્યસીમં જનયતુ ૨કુતુકં મામકે દીનબન્ધો !॥ ૩.૩૭॥

૧. ભૃઙ્ગવેણ્યાઃ પદ્મપ્રત્યાસત્તિવિશેષણં કેશપાશસ્ય મુખપ્રત્યાસત્તિં
ગમ્યામભિસન્ધાય કૃતમ્ । ૨. સન્તોષમ્ ।

સ્નિગ્ધત્વં સર્વલોકસ્ય હિ જનયિતુમીશાત્મનીવાપ્રમેયં
૧સ્નિગ્ધત્વં દેવ ! યો વા પ્રકટયતિ પરં કેશપાશસ્ત્વદીયઃ ।
તસ્યાભાં વિશ્વચેતોહરણપટુતરાં શંસિતું કસ્ય વા સ્યાદ્-

દાક્ષ્યં ભોગીન્દ્રશાયિન્ ! સુરપતિગુરુણા સન્નિભસ્યાપિ ભૂમૌ ॥ ૩.૩૮॥

૧. મસૃણત્વમનુરક્તત્વં ચ ।

આબદ્ધાનાં કચાગ્રે તવ મસૃણતરે ચારુમન્દારજાતી-
કુન્દાદીનાં સુમાનાં પ્રચુરપરિમલો વ્યાપ્ય સર્વે દિગન્તમ્ ।
નાસાયાઃ કસ્ય વા નો રચયતિ નિતરાં ધન્યધન્યત્વમસ્મિન્
લોકે શ્રીભૂમિજાને ! સ્થિરચરકલિતે હન્ત વાચામગમ્યમ્ ॥ ૩.૩૯॥

કિઞ્ચ શ્રીપઙ્કજાક્ષ ! પ્રચુરમધુકરશ્રેણિનીલે કચાગ્રે
બદ્ધા કુન્દાદિપુષ્પાવલિરતિધવલા તાવકે શ્લક્ષ્ણકાન્તૌ ।
શઙ્કાં કસ્યેહ ચેતસ્યજિત ! ન જનયેન્નાથ! તારાગણાનાં
રાત્રૌ વ્યોમાઙ્ગણે નિર્ભરમસિતરુચૌ રાજતાં નિર્મલાનામ્ ॥ ૩.૪૦॥

સાફલ્યં નેત્રસૃષ્ટેર્ભવતિ ભુવિ નૃણાં દર્શનાદેવ યસ્યા
યા નિત્યં દારુણાંહોમયતિમિરકુલે મિત્રલીલાં બિભર્ત્તિ ।
યા વૈ ચેતાંસિ પુંસાં કુતુકજલનિધૌ મજ્જયત્યપ્રમેયે
સેયં તે વક્ત્રલક્ષ્મીઃ પ્રદિશતુ કુશલં સર્વદા મે મુરારે!॥ ૩.૪૧॥

યોગીન્દ્રાણાં તપોનિશ્ચલતમમનસાં મીલિતાનીક્ષણાનિ
સ્પષ્ટં યાસૌ વિધત્તે ક્ષણમથ વિગલન્મીલનાન્યાર્તબન્ધો ! ।
તાં તે વક્ત્રસ્ય શોભામનઘ! કથયિતું લેશમાત્રેણ વા સ્યાદ્-
વૈદગ્ધ્યં કસ્ય વાસ્મિન્ જગતિ મધુરિપો! લબ્ધવર્ણસ્ય ભૂમન્ ! ॥ ૩.૪૨॥

ચન્દ્રામ્ભોજે ત્વદાસ્યેન હિ ભુવિ સમતાં લબ્ધુમાત્તપ્રયત્ને
અપ્રાપ્યૈનાં ચિરેણાપ્યહહ પરમિમે ભગ્નયત્ને ચ ભૂત્વા ।
મન્દાક્ષાન્નો સહેતે દૃઢમનઘ! મિથો દર્શનં તત્ર લોકે
મિથ્યાધ્યારોપિતં વૈ કવિકુલતિલકૈરેતયોર્વૈરવત્ત્વમ્ ॥ ૩.૪૩॥

૧દોષાસક્ત્યા સમેતઃ સતતમપિ દધાનોऽયમન્તઃ ૨કલઙ્કં
૩સૂર્યાવિર્ભાવલીનો વિધુરયમખિલામોદસન્દાયિના તે ।
સામ્યં ૪વક્ત્રેણ લબ્ધું નનુ યદિ યતતે ભગ્નયત્નઃ કથં વા
ન સ્યાત્ શ્રીદાનવારે ! ભુવનગતતમોધ્વંસબદ્ધોદ્યમેન ॥ ૩.૪૪॥

૧. દોષસમ્બન્ધેન રાત્રિસમ્બન્ધેન ચ । ૨. અપવાદમઙ્કં ચ ।
૩. સૂરિસાન્નિધ્યાસહનો ભાસ્કરસાન્નિધ્યાસહનશ્ચ ।
૪. ગુણવત્ત્વમદોષત્વં વેતિ વ્યતિરેકો વક્ત્રે બોધ્યતે તદ્વિશેષણાભ્યામ્ ।

યોઽસાવન્તર્નિતાન્તં મધુહર! ૧રજસાક્રાન્તમૂર્તિર્મુરારે !
　　યશ્ચાયં ચાપ્રસન્નઃ સુનિયતમુદયેર હન્ત ૩રાજ્ઞો ૪દ્વિજાનામ્ ।
પદ્મઃ સોઽયં વદાસ્યેન હિ ભુવિ સમતાં પ્રાપ્નુયાદ્વા કથં તે
　　સત્ત્વાવાસાયિતેન દ્વિજમુનિપટલીતાપસર્વઙ્કુષેણ ॥ ૩.૪૫॥

૧. રજોગુણેન પુષ્પધૂલ્યા ચ । ૨. આવિર્ભાવેઽભિવૃદ્ધૌ ચ । ૩. પ્રભો,
૪. ત્રૈવર્ણિકાનાં વિપ્રાણાં ચ ।

૧સામ્યં કેનાપિ ધર્મેણ હિ ૨કિમપિ ભવેદ્યદ્યહો તુલ્યતા સ્યાદ્-
　　વાચ્યા તેનેહ લોકે નનુ કવિનિકરૈર્વસ્તુનસ્તસ્ય શૌરે ! ।
રમ્યે વસ્તુન્યશેષેઽપ્યયિ મુખસુષમાપેક્ષયા તે નિકૃષ્ટે
　　ભૂમન્નેતે કથં વા જગતિ તદુપમાનત્વમાપ્તું૩ સમર્થાઃ ॥ ૩.૪૬॥

૧. સંવાદઃ । ૨. ઈપત્ । ૩. ઉપલબ્ધુમ્ ।

લાવણ્યસ્યાંશમાત્રં તવ મુખકમલસ્યેહ લિપ્સુઃ શશાઙ્કો
　　મજ્જન્ ૧લાવણ્યપૂર્ણે દિનમનુ જલધાવુચ્છ્રિતો વ્યોમદેશે ।
દૃષ્ટ્વા ત્વદ્વક્ત્રલક્ષ્મીં ધ્રુવમપિ ચ નિજાં બિમ્બિતાં તુ ત્વદીયે
　　ભૂષાવૃન્દે સલજ્જો ૨મહયતિ કુસુમૈસ્ત્વામુડુવ્રાતરૂપૈઃ ॥ ૩.૪૭॥

૧. લાવણ્યં સૌન્દર્યં લવણરસવત્ત્વં ચ, તેન પૂર્ણે । ૨. પૂજયતિ ।

કેચિત્ પ્રાહુઃ કિલાઙ્કં જલધિસમુદિતં કર્દમં પ્રાહુરેકે
　　ભૂચ્છાયામાહુરન્યે હરિણ ઇતિ પરે પ્રાહુરુન્નમ્રધામ્નઃ ।
તારાનાથસ્ય મધ્યોલ્લસિતમયિ હરે! ૧મેચકત્વં નિકામં
　　મન્યેઽહં ત્વન્મુખાભાકલનજનિતયા લજ્જયૈવોદિતં તત્ ॥ ૩.૪૮॥

૧. માલિન્યમ્ ।

નષ્ટે સ્વીયે કલઙ્કે તવ વદનરુચા તુલ્યતા સ્યાન્મમેતિ
　　ભ્રાન્ત્યાત્યન્તં મૃગાઙ્કઃ સ્ફુટમયિ જલધૌ ક્ષાલયંસ્તાઃ કલાઃ સ્વાઃ ।
નૈવાપેતઃ કલઙ્કાદ્ભવતિ મધુરિપો! યત્ તદેતન્ન ચિત્રં
　　૧મિત્રાન્તે ભ્રાજમાનસ્ય ચ ભુવિ ૨કુમુદં પુષ્યતશ્ચાતિવેલમ્ ॥ ૩.૪૯॥

૧. સુહૃન્નાશે સૂર્યાસ્તમયે ચ । ૨. કુત્સિતસન્તોષં કૈરવં ચ ।

ચન્દ્રાબ્જાદીનિ વક્ત્રસ્ય હિ પરમુપમાનત્વમાપાદિતાનિ
　　શ્રીમન્ ! લોકે કવીન્દ્રૈઃ સુનિયતમુપમાલઙ્ક્રિયાદ્યોતનાર્થમ્ ।
ત્વદ્વક્ત્રસ્યેહ કાન્ત્યામઘહર ! મનસા ચિન્તિતાયાં નિકામં

તસ્યા દેવોપમાનીભવિતુમયિ દૃઢં ૧સા પરં સ્યાત્ સમર્થા ॥ ૩.૫૦॥

૧. સા પરં ત્વદ્વક્ત્રકાન્તિઃ કેવલં અનન્વયશ્ચાલઙ્કારઃ ।

પ્રેમાર્દ્રીભૂતવૈમાનિકવરલલનાવૃન્દપાણિપ્રકામ-
પ્રોદ્વેલ્લચ્ચામરૌઘોદ્ગતપવનચલૈરાવૃતં ચાલકાગ્રૈઃ ।
ભાલં તે બાલસોમપ્રતિભટસુષમં માનસાબ્જે મદીયે
નિત્યં નિર્વ્યાજરૂપાં વિકિરતુ ભગવન્! કામપિ પ્રેમધારામ્ ॥ ૩.૫૧॥

ભાલે તસ્મિન્ વિશાલે તવ હરિણમદેનાઞ્ચિતં ચોર્ધ્વપુણ્ડ્રં
સૌરભ્યોત્કર્ષસંવાસિતનિખિલહરિચ્ચક્રવાલેન શૌરે ! ।
દૃષ્ટ્વા કસ્યેહ ચેતઃ પ્રતિનવકુતુકામ્ભોધિકલ્લોલમગ્નં
નો સઞ્જાયેત ભક્તોત્તમસુકૃતપરીપાક! રાજીવનાભ!॥ ૩.૫૨॥

લોકે ભૂષાગણેભ્યો મુરહર! સકલેભ્યો ૧વરીયસ્તરં તત્
સ્યાનન્દૂરેશ ! નૂનં રચયતિ તિલકં ભૂષિતં ભાલદેશમ્ ।
ભાવત્કં ભાલદેશં મૃગમદતિલકં ૨ત્વેતેદાશ્રિત્ય બાઢં
નિસ્સીમશ્રીનિકેતં સ્વયમનઘ! પરં ચાશ્નુતે ભૂષિતત્વમ્ ॥ ૩.૫૩॥

૧. સ્વાર્થે વા તરવત્, અતિશયપરમકોટિવિવક્ષયા વા ભૂયસ્તરવત્ ।
૨. તુશબ્દો વિશેષે લોકસાધારણતિલકવ્યાવૃત્તે ।

ભાલં તે પઞ્ચમીશીતલરુચિસુષમાસારચૌરં નિરીક્ષ્ય
શ્રીમન્ ! ચન્દ્રોદરસ્થે ગિરિધર ! હરિણે ચાધિકં ૧સારભૂતા ।
મન્યે કસ્તૂરિકેયં જગતિ સમુચિતાવાસભૂમિર્મમૈષે-
ત્યેવં મત્વા નિવાસં રચયતિ તિલકચ્છદ્મના તે લલાટે ॥ ૩.૫૪॥

૧. ચન્દ્રાઙ્કહરિણસમ્બન્ધિમદભૂતેત્યર્થઃ

શક્રાશ્મોર્વીધરસ્યાનઘ! વિશદતમે સાનુદેશે ભવન્તી
દ્વેધા ૧સપ્તાશ્વકન્યા યદિ પુનરજિત ! સ્યન્દતે તાવદેષા ।
શ્રીમન્ ! વિશ્વૈકરમ્યે તવ નિટિલતટે ભ્રાજિતસ્યેશ! રસામ્યં
કસ્તૂરીપઙ્કરાજત્તિલકપરિવૃઢસ્યાપ્નુયાદ્દીનબન્ધો !॥ ૩.૫૫॥

૧. યમુના । ૨. વિતતઋજૂર્ધ્વરેખાત્મકત્વાત્ પુણ્ડ્રસ્ય સામ્યકથનમ્ ।

અમ્ભોજાવાસશર્વત્રિદશપરિવૃઢાદ્યાઃ સદૈવેહ યસ્યાઃ
કારુણ્યોલ્લાસસંસૂચકચલનલવં પ્રાર્થયન્તે નિતાન્તમ્ ।
સેયં ભ્રૂતલ્લજસ્યાચ્યુત ! નનુ યુગલી તાવકીના મમેહ

શ્રેયાંસ્યમ્ભોજનાભ! પ્રદિશતુ સહસા નાથ ! ભૂયાંસિ બાઢમ્ ॥ ૩.૫૬॥

પાદામ્ભોજાવનમ્રાખિલપરિજનસન્તાપવિચ્છેદશૌણ્ડ-
સ્ફીતામેયાનુકમ્પારસજલધિતરઙ્ગાયિતં તત્ ત્વદીયમ્ ।
ભ્રૂયુગ્મસ્યાપ્રમેયં જગતિ વિલસિતં પશ્યતઃ કસ્ય તાવ-
ચ્ચેતઃ પિયૂષસિન્ધૌ ભવતિ ન સહસા મગ્નમામજ્જમુચ્ચૈઃ ॥ ૩.૫૭॥

યાસૌ ૧ચિલ્લીલતા તે ત્રિભુવનજનસમ્મોહને બદ્ધદીક્ષા
વક્રત્વં બિભ્રતી સત્યપિ દૃઢમનિશં ચાત્મનીશામ્બુજાક્ષ ! ।
યોગીન્દ્રાગ્રેસરાણાં પરમૃજુમનસાં ભાતિ સમ્મોદદાત્રી
વક્તું તસ્યા વિલાસં જગતિ નુ કતમઃ શ્રીપતે! કોવિદઃ સ્યાત્ ॥

૧. ભ્રૂલતા ।

સૃષ્ટિસ્થિત્યપ્યયા ભોસ્ત્રિજગદધિપતે! વિષ્ટપાનાં ત્રયાણાં
યસ્યાધીના વિલાસસ્ય હિ તવ ભગવન્ ! ભ્રૂયુગસ્યાર્ત્તબન્ધો ! ।
માહાત્મ્યં તસ્ય લોકે કથયિતુમરવિન્દાક્ષ ! કસ્યેહ વા સ્યાદ્
દાક્ષ્યં વાચામધીશેન તુ સમધિષણસ્યાપિ રાજીવનાભ !॥ ૩.૫૯॥

ભક્ત્યા નિર્વ્યાજયાહર્નિશમખિલપરીતાપવિધ્વંસનં તત્
પાદદ્વન્દ્વં સ્વકીયં દિનમનુ ભજતાં સજ્જનાનાં નિકામમ્ ।
સર્વાભીષ્ટૌઘવિશ્રાણનમયમહ૧સંસૂચિદોલાવિલાસં
નૂનં સ ત્વં બિભર્ષ્યચ્યુત! પુરુકરુણો ૨ભ્રૂલતાચ્છદ્મનોચ્ચૈઃ ॥ ૩.૬૦॥

૧. મહશબ્દ ઉત્સવે ।
૨. અભીષ્ટદાનાદેશભાવિષુ ભ્રૂલતાચલનેષુ દોલાવ્યાપારસમ્ભાવના ।

પ્રોદ્યત્તિગ્માંશુરશ્મિવ્યતિકરવિકચીભૂતપઙ્કેરુહશ્રી-
ચૌરં કારુણ્યરૂપામૃતરસલહરીનિત્યપૂર્ણં ત્વદીયમ્ ।
નેત્રદ્વન્દ્વં ત્રયાણામપિ નનુ જગતાં ક્ષેમદં મામકીનં
સન્તાપૌઘં સમસ્તં શમયતુ સહસા પદ્મનાભાતિવેલમ્ ॥ ૩.૬૧॥

સ્યાનન્દૂરેશ! યદ્વૈ સુમહિતતપસાં રાશિભિશ્ચાનવાપ્યં
તત્ સર્વં વિન્દતેઽસૌ જગતિ હિ મનુજો ૧યદ્દરાલોકનેન ।
તેન ત્વં લોચનપ્રેરિતમધુરકટાક્ષામૃતેનાદરાન્માં
સિઞ્ચાશુ ત્વત્પદૈકાશ્રયમુરુકરુણાવારિરાશે ! સદૈવ ॥ ૩.૬૨॥

૧. યસ્ય કટાક્ષામૃતસ્ય દરાલોકનેન ઇષદ્ગોચરીભાવેન ।

લક્ષ્મીજાને! તુષારદ્યુતિકિરણતતિર્વિશ્વચેતોભિરામા
　　પીયૂષસ્રોતસાલં સુરગણમખિલં તન્વતી હૃષ્ટપુષ્ટમ્ ।
યસ્મિન્નાલક્ષ્યમાણે ભવતિ ૧મિહિરરશ્મિચ્છટાવત્ સુતીવ્રા
　　તં શ્રીમંસ્ત્વત્કટાક્ષં જગતિ ન કતમઃ કામયેતેશ ! મર્ત્યઃ ॥ ૩.૬૩ ॥

૧. તુલ્યાર્થે વતિઃ વિશિષ્ટા ચ ભવનક્રિયા તસ્ય પ્રયોજિકા ।

અમ્ભોજં પોષયત્યન્વહમિહ કિરણૈરાત્મનો વાસરેશઃ
　　પીયૂષાંશુસ્તથા માધવ! કુમુદકુલં પોષયત્યેવ નિત્યમ્ ।
નેત્રદ્વન્દ્વે ત્વદીયે દૃઢતરમુભયોઃ સન્નિવાસાત્ તદેત-
　　ન્નિદ્રાલુત્વં હરત્યેવ હિ કુમુદસરોજાતયોર્નિર્વિશઙ્કમ્ ॥ ૩.૬૪ ॥

લોકામોદપ્રદાયિપ્રતિનવતિલસૂનોરુકાન્તિપ્રવાહ-
　　પ્રૌઢાહઙ્કારનિર્મૂલનચણસુષમાવર્ષિણી વિશ્વરમ્યા ।
દૈત્યારે ! નાસિકા તે જનયતુ કુતુકં માનસાબ્જે મદીયે
　　હ્યશ્રાન્તં ત્વત્પદામ્ભોરુહયુગલગતે સર્વલોકાધિનાથ! ॥ ૩.૬૫ ॥

તાદૃગ્દિવ્યપ્રભાધોરણિનિચયભૃતા નાસિકાતલ્લજેન
　　શ્રીમંસ્તે વ્યર્થમેવાકલયતિ ભુવને ચમ્પકં ૧સામ્યભાવમ્ ।
યસ્માત્ સર્વેષુ પુષ્પેષ્વપિ વરદ ! રસગ્રાહિણા ષટ્પદેના-
　　પ્યસ્તં તત્ સામ્યલિપ્સુ ત્રિજગદભિમતાનાં ન કેનાત્ર હેયમ્ ॥ ૩.૬૬ ॥

૧. સામ્યભાવનામ્ ।

સર્વેષાઞ્ચાપકર્ષાદિહ હિ નનુ નિજાપેક્ષયા ભૂતલેઽસ્મિ-
　　ન્નર્હત્યસ્યાં જગત્યાં કિમપિ સહ મયા ૧નાસિકાં વસ્તુ નૂનમ્ ।
ઇત્યેવં વ્યઞ્જયત્યેવ હિ કિલ નિજયા રસંજ્ઞયૈવેશ! યાસૌ
　　તસ્યાઃ શૌરે ! ભવેયુઃ કથમિવ પરમેતાનિ સામ્યાવહાનિ ॥ ૩.૬૭ ॥

૧. નેતિ આસિકામિતિ ચ ચ્છેદઃ, અથ ચૈકં પદમ્ ।
૨. "નાસિકા" ઇત્યેવંરૂપયા ।

નાનાવર્ણપ્રસૂનોલ્લસિતતરુલતામણ્ડિતોદ્યાનદેશ-
　　૧ભ્રાજત્સદ્યોવિપક્કારુણતરસુષમાપૂર્ણબિમ્બીફલં તત્ ।
ધિક્કુર્વન્ વિશ્વરમ્યો નનુ સકલજગન્નાથ! દન્તચ્છદસ્તે
　　ચેતો નિત્યં મદીયં શિશિરયતુ મુહુઃ પ્રેમપીયૂષવૃષ્ટ્યા ॥ ૩.૬૮ ॥

૧. ભ્રાજદિતિ પરસ્મૈપદમાત્મનેપદસ્યાનિત્યત્વાત્ ।

બન્ધૂકં પદ્મરાગં પુનરપિ સહકારસ્ય તત્ પલ્લવં વા
માધ્વીમૃદ્વીકરાશિં મુરમથન ! સિતાખણ્ડમિશ્રં પયો વા ।
કાન્ત્યા માધુર્યધર્મેણ ચ પરમધરીકુર્વતસ્તેઽધરસ્ય
શ્રીમન્ ! કસ્માન્ન જાને કવિભિરધર ઇત્યત્ર સંજ્ઞા વિતીર્ણા ॥ ૩.૬૯॥

કારુણ્યામ્ભોનિધેઽસૌ ભવદધરમણિર્હન્ત નષ્ટં વિધત્તે
લોકે યન્નિર્વિશઙ્કું ૧મધુમધુરિમસઞ્જાતસાન્દ્રાવલેપમ્ ।
નૈતચ્ચિત્રં તદસ્યાચ્યુત! મધુમથનસ્યાઙ્ગભાવં ગતસ્યે-
ત્યેવં જાનેઽહમમ્ભોરુહદલનયન ! શ્રીરમાભૂમિનાથ! ॥ ૩.૭૦॥

૧. મધુશબ્દો મકરન્દે દૈત્યભેદે ચ ।

માધુર્યેણેહ યોઽસૌ ત્રિભુવનવિદિતેનાન્વહં ૧શર્કરાયાઃ
સ્યાનન્દૂરેશ! લોકે વિતરતિ નિતરાં ૨શર્કરાત્વં મુરારે ! ।
સોઽયં વિશ્વૈકરમ્યચ્છવિરધરમણિસ્તાવકીનો ન કેષાં
વાચાં ૩પારં કવીનામઘશમન ! પરં ગાહતે નો જગત્યામ્ ॥ ૩.૭૧॥

૧. ખણ્ડવિકારસ્ય । ૨. ઉપલવિશેષત્વં નીરસત્વાદથ
ચ ખણ્ડવિકારત્વમ્ । ૩. અગોચરત્વમ્ ।

ચિત્રં બિમ્બાધરસ્તે ત્રિજગદધિપતે! ચારુસન્ધ્યાભ્રવર્ણઃ
સમ્પ્રાપ્તોઽપીહ લોકે પદમુરુમહસઃ પદ્મરાગસ્ય સમ્યક્ ।
ભાતિ શ્રીપદ્મનાભ! ધ્રુવમિહ હિ પદં નિર્વ્યલીકસ્ય ભૂમન્ !
પદ્માગારસ્ય નાથ! પ્રતિમુહુરધિકં વૃદ્ધિભાજો મુરારે ! ॥ ૩.૭૨॥

તા દુગ્ધાબ્ધેસ્તરઙ્ગા ઇવ ચ તુહિનરશ્મેર્મયૂખા ઇવાપિ
ભ્રાજન્મુક્તાફલાનીવ ચ બિસસમુદાયા ઇવાપ્યાર્ત્તબન્ધો ! ।
દિક્ષુ વ્યાપ્તત્વદીયાનુપમતમયશોરાશિવચ્ચોલ્લસન્ત્યો
માધુર્યાર્દ્રીઃ સ્મિતાભાસ્તવ ભુવનપતે ! સન્તતં માં પુનન્તુ ॥ ૩.૭૩॥

આવાસં યં મહાન્તો વિદુરપરિમિતસ્યાનિશં શર્મરાશે-
ર્યસ્મિન્ વાઞ્છાં પ્રકુર્વન્ત્યઘશમન ! સદા વીતતૃષ્ણા મુનીન્દ્રાઃ ।
યોઽસૌ બ્રહ્માણ્ડભાણ્ડાન્તરગજનમનશ્ચૌર્યવિદ્યાપ્રવીણઃ
શૌરે ! ત્વન્મન્દહાસં તમિહ કથમહં શંસિતું સ્યાં સમર્થઃ ॥ ૩.૭૪॥

તામાસાદ્યામ્બુજાક્ષ ! પ્રતિપદલલિતાં મન્દહાસદ્યુતિં તે
નેત્રદ્વન્દ્વોત્પલાભ્યામયિ પરમુપલેનાથ તુલ્યાશયોઽપિ ।

શ્રીમન્ ! કો વા મનોવાગવિષયતરસમ્મોદપીયૂષસિન્ધૌ
મગ્નઃ પ્રાપઞ્ચિકે વસ્તુનિ નનુ સકલેઽપ્યાપ્નુયાન્નો વિરાગમ્ ॥ ૩.૭૫॥

લોકેઽસ્મિન્ કેવલં યા હરતિ નનુ તમો બાહ્યમેવામૃતાંશો-
ર્જ્યોત્સ્ના સાપ્યમ્બુજાક્ષાકલયતિ કતમત્કૌતુકં નો જનાનામ્ ।
એવમ્ભાવે મુનીનામપિ હૃદયતમોનાશિની મન્દહાસ-
સ્યાભા તે કીદૃશં નો જગતિ ન જનયેત્ કૌતુકં વિશ્વપુંસામ્ ॥ ૩.૭૬॥

તાદૃગ્વિશ્વાભિરામપ્રચુરરુચિયુતે ૧મન્દ્રહાસે ત્વદીયે
બિમ્બોષ્ઠસ્યેહ કિઞ્ચિદ્વિકસનવિશદીભૂતનિસ્તુલ્યકાન્તિઃ ।
શૌરે ! દન્તાવલિસ્તે સુદૃઢમવિકસત્કુન્દપુષ્પાવદાતા
નિત્યં મન્દેતરં મે જનયતુ હૃદયે મોદમિન્દીવરાક્ષ !॥ ૩.૭૭॥

૧. મન્દહાસસમય ઇત્યર્થઃ ।

નાનારત્નૌઘશોભાઞ્ચિતમકરવરાકારકર્ણદ્વયાલ-
ઙ્કારપ્રત્યગ્રકાન્તિપ્રસરમિલનસઞ્જાતશારત્વમુચ્ચૈઃ ।
સ્યાનન્દૂરેશ! ગણ્ડસ્થલયુગમયિ તે નાકનાથોપલાદ-
ર્શાટોપધ્વંસશૌણ્ડં દલયતુ સકલં મામકં તાપભારમ્ ॥ ૩.૭૮॥

સ્નિગ્ધે શ્યામે કપોલે તવ ભુવનપતે! વિમ્બિતં કર્ણભૂષા-
યુગ્મં દોલાયમાનં જગતિ કલયતઃ કસ્ય વા લોચનાભ્યામ્ ।
ચેતસ્યુચ્ચૈર્ન શઙ્કામઘહર ! જનયેન્મીનયોઃ ૧સૂરજાયા-
સ્તોયાપૂર્ણે હ્રદે માધવ ! નનુ સરસં ખેલતોશ્ચાતિવેલમ્ ॥ ૩.૭૯॥

૧. યમુનાયાઃ ।

પ્રાચીનોર્વીધરાગ્રોદિતમિહિરરુચઃ કૌસ્તુભસ્યેશ ! કાન્ત્યાઃ
સમ્પર્કેણાલમઙ્ગીકૃતવિકચજપાપુષ્પશોભસ્ત્વદીયઃ ।
અત્યન્તં શ્લક્ષ્ણકાન્તેર્વરદ! ૧દેવરસ્યેહ દર્પાપહારી
કણ્ઠઃ કુણ્ઠેતરં મે જનયતુ હૃદયે નાથ ! વૈકુણ્ઠ ! મોદમ્ ॥ ૩.૮૦॥

૧. શઙ્ખશ્રેષ્ઠસ્ય

છાયાસૂનુર્બભૂવાચ્યુત! જગતિ કથં પઙ્ગુપાદઃ સુતો વૈ
સાદૃશ્યં નૂનમાપ્નોતિ હિ કિલ જનકસ્યાત્ર સૃષ્ટૌ વિધાતુઃ ।
એવંરૂપા વિશઙ્કા મમ હિ ૧પરિહૃતા કૌસ્તુભસ્યાભયા તે
સાહસ્રાણાં ૨પદાનામપિ ગગનમણેઃ ૩પઙ્ગુતાપ્રાપ્તિહેતોઃ ॥ ૩.૮૧॥

૧. પઙ્ગુપુત્રસ્ય પઙ્ગુપદત્વૌચિત્યાદિતિ ભાવઃ ।
૨. કિરણાનાં ચરણાનાં ચ પદશબ્દપ્રક્રમે"પુલ્લિઙ્ગઃ
કિરણે પુનઃ"ઇતિ મેદિની ।
૩. પઙ્ગુતાયાઃ પ્રતિહતગતિત્વસ્ય પ્રાપ્તેર્હેતોઃ
ગતિપ્રતિઘાતશ્ચ કૌસ્તુભાભયાભિભવાત્ ।

વિશ્વવ્યાપ્તસ્વકીયાનુપમતમરુચિશ્રેણિભિઃ સર્વતેજો-
જેતૃત્વોદ્ભૂતગર્વપ્રસરભૃતમના હન્ત રાજીવબન્ધુઃ ।
શોભાં તે કૌસ્તુભસ્ય સ્મયભરશમનીમાત્મનોઽપીહ દૃષ્ટ્વા
સાયં સાયં ધ્રુવં મજ્જતિ કિલ જલધૌ વ્રીલયા વ્યાકુલાત્મા ॥ ૩.૮૨॥

જ્ઞાત્વા તે કૌસ્તુભસ્યામિતતમસુષમામાલયા નિર્જિતં સ્વં
ભર્તારં તિગ્મભાનું મુરમથન! દિશસ્તસ્ય જાયા દશાપિ ।
સાયઙ્કાલોન્મિષ૧ત્પાટલિમભરમિષેણાલમેતાઃ સ્વકાર્યે-
પ્વાવિષ્કુર્વન્તિ લજ્જાં વદનસરસિજેષ્વન્વહં દીનબન્ધો !॥ ૩.૮૩॥

૧. કાદાચિત્કે પાટલિમ્નિ લજ્જાવિકારત્વમુત્પ્રેક્ષ્યતે ।

કિઞ્ચ શ્રીમન્ ! પ્રભાભિર્વિકચતરજપાપુષ્પસંસ્પર્દ્ધિનીભિ-
સ્તસ્યાથો કૌસ્તુભસ્યાચ્યુત! જગતિ સમસ્તેઽપિ જાતે પ્રસન્ને ।
લોકેઽસ્મિન્ ધ્વાન્તનાશાત્ ત્રિભુવનવિદિતા ધ્વાન્તસંજ્ઞા પ્રપેદે
નૂનં સાધર્મ્યમુચ્ચૈરિહ હિ શશવિષાણાદિભિઃ શબ્દજાલૈઃ ॥ ૩.૮૪॥

વિશ્વાતઙ્કપ્રદાયિપ્રચુરતરભુજપ્રૌઢતેજોમદાન્ધી-
ભૂતસ્વાન્તાસુરૌઘસ્મયશમનવિધૌ દક્ષિણો દક્ષિણસ્તે ।
બાહુઃ પર્યુપ્તનાનામાણિવલયગણેનાધિકં શોભમાનઃ
સર્વાભ્યો માં વિપદ્ભ્યઃ સકુતુકમવતુ શ્રીપતે! તાવકીનમ્ ॥ ૩.૮૫॥

પર્યઙ્કે નાથ! વાતાશનવરકલિતે સન્મૃણાલાવદાતે
વિન્યસ્તો બાહુરેષોઽચ્યુત! તવ ભગવન્ ! જાનુપર્યન્તલમ્બી ।
ત્વન્નાથાનાં નિકામં મુરહર! કૃપણાનાં પુનર્માદૃશાનાં
દાતું નૂનં બતાનુગ્રહમિહ હિ સમસ્તાધિવિચ્છેદશૌણ્ડમ્ ॥ ૩.૮૬॥

આનમ્રાયાઃ પદાગ્રે નિખિલજનતતેર્દૂરિતાશેષતાપે
સર્વાભીષ્ટૌઘવિશ્રાણનવિધિપટુતામસ્ય તે વીક્ષ્ય બાહોઃ ।
લજ્જાભારાકુલાત્મા નનુ સુરવિટપી નિર્વ્યયાનાં ફલાનાં
વ્યાજાત્ ૧ગોપાયતીહાચ્યુત! સુદૃઢમસૌ નમ્રતાં લજ્જયામામ્ ॥ ૩.૮૭॥

૧. અપહ્નુતે ।

આબ્રહ્મસ્તમ્બપર્યન્તમિહ હિ ભુવને જીવજાલાસ્ત્વનન્તા
દાતૃત્વેનૈવ યસ્યાજિત ! તવ કરુણાવારિધે! નાથ! બાહોઃ ।
જાયન્તે કિઞ્ચ જીવન્તિ ચ વરદ ! દૃઢં હૃષ્ટપુષ્ટા ભવન્તિ
શ્રીમન્ ! સ્તોતું તમેનં ભવતિ ન કુતુકી કો નુ મર્ત્યોઽત્ર લોકે ॥ ૩.૮૮॥

સ્યાનન્દૂરેશ ! નામ્ના સ્ફુટમપિ ચ ગુણેનેશ! યસ્તાવકીનો
બાહુર્વામત્વમુચ્ચૈર્મુરમથન! દધાનોઽપિ નિસ્તુલ્યકાન્તિઃ ।
નિત્યં ૧વામેતરત્વં વહતિ નિજપદામ્ભોજભક્તેષુ સત્સુ
શ્રેયાંસ્યુચ્ચૈસ્તરાણિ પ્રદિશતુ સ ચ મે ભૂરિકારુણ્યરાશે !॥ ૩.૮૯॥

૧. અનુકૂલત્વં અસવ્યત્વં ચ ।

દુગ્ધામ્ભોરાશિપુત્ર્યા કુવલયરચિતા વીક્ષિતો માલિકેતિ
સ્ફૂર્જદ્ભૂરિપ્રતાપૈઃ કુલિશમિતિ ભિયા નાથ! દૃષ્ટોઽસુરેન્દ્રૈઃ ।
ભક્તૈઃ સન્તાપરૂપાતપશમનપટોઃ શાખિનો નાથ! શાખે-
ત્યુચ્ચૈરાલક્ષિતોઽસૌ જયતુ જયતુ ગોવિન્દ ! સવ્યો ભુજસ્તે ॥ ૩.૯૦॥

૧આમોદાકૃષ્ટવિશ્વસ્થિતસકલજનારમોદભારાઙ્ગરાગા-
લેપપ્રોદ્ભૂતભૂરિપ્રભમઘહર! તે નાથ! વક્ષઃકપાટમ્ ।
૨રાજદ્વન્યમાલાપરિમલલહરીવ્યાપ્તનિશ્શેષલોકં
કારુણ્યાબ્ધેર્વિશાલં શમયતુ સકલં મામકં તાપભારમ્ ॥ ૩.૯૧॥

૧. આમોદેતિ સન્તોષે । ૨. આમોદેતિ સૌરભે ।

તસ્મિન્ વક્ષસ્યસીમાદ્ભુતરુચિપટલાનિત્યવાસાયિતે તે
રાજન્તીં વન્યમાલાં વિવિધરુચિયુતૈઃ પુષ્પજાલૈઃ પિનદ્ધમ્ ।
દૃષ્ટ્વા પ્રાવૃટ્પયોદોલ્લસિતશતમખેષ્વાસશઙ્કાપરીતં
ન સ્યાત્ કસ્યેહ ચેતઃ પ્રતિનવકુતુકામ્ભોધિમગ્નં ચ ભૂમન્ !॥ ૩.૯૨॥

ત્રૈલોક્યપ્રસ્ફુરત્ત્વત્પ્રચુરતરયશોરાશિસામ્યાવહેન
શ્રીમન્મુક્તામયેનાચ્યુત! તવ લસિતં નાથ! હારેણ સમ્યક્ ।
વક્ષશ્છાયાપથેનાધિકધવલરુચા મણ્ડિતસ્યાતિવેલં
વ્યોમ્નઃ સાદૃશ્યમાપ્નોતિ હિ વરદ ! દૃઢં પત્રિમૂર્દ્ધન્યપત્ર !॥ ૩.૯૩॥

કિઞ્ચાસ્મિન્ વક્ષસિ ત્વં મરકત૧તલિમપ્રૌઢશોભાહરે સ્વે

શ્રીવત્સાङ્કં જગન્મોહનમયિ વહસિ શ્રીધરાશેષપુંસામ્ ।
ક્ષાન્તિં સાગસ્સુ ચ સ્વાં પ્રકટયિતુમહો યત્તદેતન્ન ચિત્રં
ત્રૈલોક્યાધીશ્વરસ્ય પ્રચુરતરકૃપાબ્ધેઃ રક્ષમાનાયકસ્ય ॥ ૩.૯૪॥

૧. તલિમેતિ તલ્પે । ૨. ભૂમિદેવીપતેઃ ક્ષાન્તિનેતુશ્ચ ।

અન્તસ્થાનાં ત્રયાણામપિ નનુ જગતામીશ! સીમાત્રયં યો
દૈત્યારે! કુક્ષિદેશઃ કલયતિ તિસૃણાં છદ્મના તે વલીનામ્ ।
રોમાવલ્યા તમાલક્ષિતિરુહપટલીકાન્તિસામ્યં વહન્ત્યા
યુક્તોઽસૌ નિસ્તુલં મે જનયતુ હૃદયે કૌતુકં શાર્ઙ્ગપાણે !॥ ૩.૯૫॥

યસ્મિન્ ભૃઙ્ગાયમાણો વિધિરિહ વદનેભ્યશ્ચતુર્ભ્યો ગલન્ત્યા
વેદાનાં ધારયેદં ત્રિભુવનમખિલં સાધુ પૂતં વિધત્તે ।
તાદૃક્ ત્વન્નાભિપદ્મં નિરુપમરુચિસન્દોહવાસાયિતં મે
નાથ! શ્રેયાંસિ દદ્યાન્નિરવધિ જગદારાધિતં પદ્મનાભ !॥ ૩.૯૬॥

નાનારત્નપ્રભારૂષિત કનકમયાનર્ઘકાઞ્ચીગુણેન
શ્રીમન્ ! વિભ્રાજમાનઃ કિલ ભુવનપતે ! તાવકો મધ્યભાગઃ ।
અત્યન્તં કાર્શ્યશાલ્યપ્યલમકૃશતરાં દેવ! લક્ષ્મી દધાન-
શ્ચેતસ્યક્ષીણરૂપં જનયતુ સતતં મામકે મોદભારમ્ ॥ ૩.૯૭॥

સઙ્ગ્રામામેયવીર્યાસુરવરપટલીત્રાસદાયિત્વદીય-
સ્ફૂર્જદ્ભૂરિપ્રતાપોપમવિશદરુચા સાધુ પીતામ્બરેણ ।
ઊરૂ તાવાવૃતૌ તે શિખિગલસુષમાભારચૌર્યૌ ચ જઙ્ઘે
નિત્યં શ્રીપદ્મનાભ! પ્રચુરતરમયે મઙ્ગલં મે દિશન્તુ ॥ ૩.૯૮॥

લોકે યદ્વૈ રસાલદ્રુમમૃદુલલસત્પલ્લવસ્યાતિમાત્રં
કાઠિન્યં સમ્પ્રયચ્છત્યનઘ! મૃદુતયા સ્વીયયા વિશ્વબન્ધો ! ।
તાદૃગ્લક્ષ્મીકરામ્ભોરુહમૃદુમૃદિતં ચાપિ રક્તત્વમુચ્ચૈ-
રાદત્તે યત્ તદેતન્નનુ પદયુગલં તે મમ શ્રેયસે સ્તાત્ ॥ ૩.૯૯॥

યત્સન્તાપાબ્ધિમજ્જત્સકલસુજનસન્દોહહૃન્મન્દરાદ્રે-
રુદ્ધારાત્યન્તદક્ષાં વરદ ! કમઠતાં ચક્રપાણે ! દધાતિ ।
તસ્મિન્ પાદામ્બુજે તે નિખિલભુવનસમ્ભૂતિહેતોર્નિતાન્તં
ભૂયાદ્ભૂયો રતિર્મે સતતમવિહતા શ્રીનિધે! પદ્મનાભ !॥ ૩.૧૦૦॥

ઇતિ સ્વાતિશ્રીરામવર્ગવઞ્ચિમહારાજવિરચિતાયાં

ભક્તિમઞ્જર્યાં તૃતીયશતકમ્ ।

## અથ ચતુર્થશતકમ્ ।

સમસ્તજગદુદ્ભવસ્થિતિલયૈકહેતોઃ પુન-
ર્લસદ્ભુવનમઙ્ગલાદ્ભુતગુણૈકધામ્નઃ પરમ્ ।
તવૈવ કરુણાત્મિકા વરદ ! કૌમુદી મામકં
મનોગતતમઃ કુલં હરતુ સર્વમપ્યઞ્જસા ॥ ૪.૧॥

અખણ્ડતરચિદ્રસામ્બુધિમયોઽપિ માયાં સ્વતઃ
સૃજન્ જગદનેકધા ૧વિતથમપ્યહો ભાસયન્ ।
૨પ્રેમોદમયિ વિન્દસે ૩તવ રમેશ! સર્ગક્રમં
કિમપ્યયિ જગદ્ગુરો ! કથયિતું જવાદુત્સહે ॥ ૪.૨॥

૧. અસત્યમપિ । ૨. પ્રમોદં વિન્દલ ઇતિ યોજના । ક્રીડસીત્યર્થઃ તથા
ચ સૂત્રિતં બાદરાયણેન “લોકવત્ તુ લીલાકૈવલ્યમ્” ઇતિ ।
૩. તથા ક્રીડતસ્તવ ।

અનન્તસુખસમ્ભૃતં ત્રિગુણકાલદેશાતિગં
પ્રભો! પરમથાદ્વયં પ્રચુરચિન્મયં બ્રહ્મ તત્ ।
વિલેસિથ વિભો! પુનઃ પ્રલય ઈશ્વર ! ૧પ્રાકૃતે
તદા જગતિ નાભવત્ કિમપિ કારણં ત્વાં વિના ॥ ૪.૩॥

૧. પ્રાકૃતે પ્રલયે મહાપ્રલયે “પ્રકૃતૌ સંસ્થિતં
વ્યક્તમતીતપ્રલયં તુ યત્ ।
તસ્માત્ પ્રાકૃતસંજ્ઞોઽયમુચ્યતે પ્રતિસઞ્ચર” ઇતિ વિષ્ણુપુરાણમ્ ।

સૃજામિ જગદિત્યહો તવ બભૂવ વાઞ્છા યદા
તદૈવ ભવતોઽજનિ ત્રિભુવનેશ ! માયા સ્વયમ્ ।
તતોઽજનિ જગદ્ગુરો ! ૧ભુવનહેતુતત્ત્વં મહત્
૨તતોઽહમિતિ સંજ્ઞિતં નનુ બભૂવ તત્ત્વં જવાત્ ॥ ૪.૪॥

૧. જગત્કારણીભૂતં તત્ત્વમ્ ॥ ૪.૨. અહઙ્કારાખ્યમ્ ।

તદેવ ખલુ સાત્વિકી વરદ! રાજસી તામસી-
હ્યહઙ્કૃતિરિતિ ત્રિધા પરિણતં બભૂવ પ્રભો ! ।
તતઃ ૧કરણમાનિનો ૨રવિસમીરસોમાદિકાન્

મનશ્ચ સુષુવે રમારમણ ! તત્ર વૈ સાત્વિકી ॥ ૪.૫॥

૧. જ્ઞાનેન્દ્રિયપઞ્ચકસ્ય કર્મેન્દ્રિયપઞ્ચકસ્ય ચાધિષ્ઠાતૃનિત્યર્થઃ ।
૨. "દિગ્વાતાર્કપ્રચેતોઽશ્વિવહ્નીન્દ્રોપેન્દ્રમિત્રકાઃ"
ઇતિ ભાગવતોક્તા દશ સોમશ્ચેત્યેકાદશ દેવા ઇત્યર્થઃ ।
તત્રાશ્વિપર્યન્તાઃ પઞ્ચ શ્રોત્રત્વક્ચક્ષુર્જિહ્વાઘ્રાણાનાં,
ક(બ્રહ્મ) પર્યન્તાઃ પઞ્ચ વાક્પાણિપાદપાયૂપસ્થાનામધિષ્ઠાતારઃ ।
સોમસ્તુ મનસોઽધિષ્ઠાતા ।

તતઃ સપદિ રાજસી પરમહઙ્કૃતિસ્તત્ક્ષણાત્
સસર્જ કરણાન્યહો દશ તથૈવ ચાધોક્ષજ! ।
પુનઃ પ્રસુષુવે જવાદપિ ચ તામસાહઙ્કૃતિ-
ર્મુકુન્દ ! ગગનાદિકાન્યનઘ! પઞ્ચ ભૂતાન્યહો ॥ ૪.૬॥

૧અમી ભવદનુપ્રવેશવશતસ્તવાપ્યૈકતાં
હિરણ્મયમયિ પ્રભો! વ્યદધુરેકમણ્ડં મહત્ ।
તદેતદથ કારણામ્ભસિ પુરૈવ સૃષ્ટે સ્થિતિં
ચકાર કરુણાનિધે ! બહુશતાન્યહો વત્સરાન્ ॥ ૪.૭॥

૧. ભૂતેન્દ્રિયાદયો ભાવાઃ ।

તતોઽણ્ડમયિ સંવિભિદ્ય ચ હિરણ્મયં તત્પુન-
શ્ચિરેણ ખલુ કારણામ્ભસિ સુનિર્મલેઽવસ્થિતમ્ ।
ક્ષણાન્નનુ રમાપતે! સમુદભૂજ્જગન્મઙ્ગલં
ચતુર્દશજગન્મયં તવ વપુર્વિરાડાહ્વયમ્ ॥ ૪.૮॥

તતો નનુ હિરણ્યગર્ભ ઇતિ સંજ્ઞયાત્યુન્નતે
વિલેસિથ જગત્પતે! સપદિ સત્યલોકે સ્વયમ્ ।
૧સે વૈ સ્ફુટવિજૃમ્ભિતાભિતરજોવિકારો જવા-
દહો સમુદભૂદલં પ્રવિકસત્સિસૃક્ષારસઃ ॥ ૪.૯॥

૧. હિરણ્યગર્ભો બ્રહ્મા ।

૧તદર્થમનવાપ્ય બોધમિહ સોઽથ ચિન્તાકુલી-
કૃતાત્મહૃદયો મનાગખિલનાથ ! તસ્થૌ સ્વયમ્ ।
તદા તપતપેત્યહો ગિરમનન્ત ! વૈહાયસી-
મમું રપરમશિશ્રવો વિરચયંસ્તપઃપ્રેરણામ્ ॥ ૪.૧૦॥

૧. સૃષ્ટ્યનુકૂલમિત્યર્થઃ ૨. ત્વં શ્રાવિતવાન્ ।

ક એષ હિ પુમાનિદં વચનમબ્રવીન્મામિહે-
ત્યસૌ તુ વિચિકિત્સયા પ્રચલિતાન્તરઙ્ગઃ સ્વયમ્ ।
વિલોક્ય સકલાસ્વપીશ ! બત દિક્ષુ દૃષ્ટ્વા વિભો !
૧ન કિઞ્ચિદપિ સોઽકરોન્નનુ તપઃ સહસ્રં સમાઃ ॥ ૪.૧૧॥

૧. અયં નશબ્દો દૃષ્ટ્વેત્યનેન સમ્બધ્યતે । અદૃષ્ટ્વેત્યર્થઃ ।

તતો હૃદયપઙ્કજોદિતવરિષ્ઠભક્ત્યુદ્ભવ-
પ્રમોદપુલકાશ્રુગદ્ગદતરાક્ષરાયાર્ચતે ।
સ્વમાશુ પરિતુષ્યતા ભુવનનાથ ! તસ્મૈ પુનઃ
પ્રદર્શિતમયિ ત્વયા નિજપદં વિકુણ્ઠાભિધમ્ ॥ ૪.૧૨॥

કદાચિદપિ યત્ર ૧નો વિકુરુતે હિ માયા પુન-
ર્વિમોહમદરોષભીમુખરસાસ્તુ દૂરં ગતાઃ ।
સદૈવ વિલસત્યહો સુખમયીશ ! યસ્મિન્ દશા
તદેતદલમદ્ભુતં જયતિ ભો ! વિકુણ્ઠં પદમ્ ॥ ૪.૧૩॥

૧. નો વિકુરુતે કાર્યાનુકૂલં વિકારં ન પ્રાપ્નોતિ ।

ચતુર્ભુજવિરાજિતા વિશ્રુતશઙ્ખચક્રાયુધાઃ
કલાયકુસુમપ્રભાઃ સુપરિવીતપીતામ્બરાઃ ।
વસન્તિ સકલાશ્ચ યત્ર હિ લસદ્વિમાનાલયા-
સ્તથાવિધમ૧નોપમં જયતિ તદ્વિકુણ્ઠં પદમ્ ॥ ૪.૧૪॥

૧. અનુપમમ્ । ન અર્થકં “અન” ઇત્યવ્યયમસ્તિ ।

લસત્તુલસિકાવનપ્રચુરસૌરભસ્રોતસા
નિકામસુરભીકૃતાખિલહરિદ્વિતાનાઙ્ગણમ્ ।
જપારુચિરવિદ્રુમોલ્લસિતમઞ્જુલસ્તમ્ભયુઙ્-
નિરર્ઘમણિગોપુરં જયતિ તદ્વિકુણ્ઠં પદમ્ ॥ ૪.૧૫॥

અનેકવનિતાજનૈરભિવૃતા સદૈવેન્દિરા
પ્રસૂર્નનુ જગત્ત્રયસ્ય ચ મુકુન્દ ! યત્ર સ્વયમ્ ।
લસત્યયિ ભવત્કટાક્ષરસપાનબદ્ધસ્પૃહા
તદીશ! ભુવનાદ્ભુતં જયતિ ભો વિકુણ્ઠં પદમ્ ॥ ૪.૧૬॥

ઇતીહ પરિદર્શિતે નનુ પદે વિકુણ્ઠાભિધે

ભુજઙ્ગપતિશાયિનં સ્મિતસુધાઞ્ચિતાસ્યામ્બુજમ્ ।
ઘનાઘનલસદ્દ્યુતિં પરિલસત્પિશઙ્ગામ્બરં
ભવન્તમયિ દૃષ્ટવાન્ સુકૃતવારિરાશિર્વિધિઃ ॥ ૪.૧૭॥

તદા પ્રચુરસમ્મદોદ્ગતનિરર્ગલાશ્રુઃ સ હિ
પ્રણમ્ય પદપદ્મયોસ્તવ સમસ્તપાપચ્છિદોઃ ।
પ્રયચ્છ કરુણાનિધે ! ભુવનસૃષ્ટિદક્ષાં મતિં
મમેત્યયમયાચત ત્રિભુવનેશ્વર ! ત્વામલમ્ ॥ ૪.૧૮॥

સ્વકીયપદપઙ્કજે નતમમું વિલોક્યાદરાત્
સ્વપાણિસરસીરુહેણ કિલ તસ્ય પાણિં સ્પૃશન્ ।
ભવેન્મ૧તિરયીહ તે ૨ન ચ નિબદ્ધતા સૃષ્ટિભિ-
સ્ત્વતીશ! સમુદીરયંસ્તમકરોઃ પટું નિર્મિતૌ ॥ ૪.૧૯॥

૧. મતિઃ સૃષ્ટાનુકૂલં જ્ઞાનમ્ ।
૨. સૃષ્ટિભિર્નિબદ્ધતા ન ચ ભવેદિતિ ।

સમ્બન્ધઃ સૃષ્ટિભિર્નિબદ્ધતા ચ રજોગુણબદ્ધત્વમ્ ।
તથા ચ શ્રીભાગવતં -
“ઋષિમાદ્યં ન બધ્નાતિ પાપીયાંસ્ત્વાં રજોગુણઃ ।
યન્મનો મયિ નિર્બદ્ધં પ્રજાઃ સંસૃજતોઽપિ તે ॥”

૧ચતુર્યુગસહસ્રસમ્મિતદિનેન ચૈકેન વૈ
નિજેન સ સૃજન્ જગદ્વરદ ! તાવતીં યામિનીમ્ ।
નયત્યજિત ! નિદ્રયા ત્વયિ નિલીય સૃષ્ટૈઃ સમં
ત્વિમામયિ વિદુર્નિશાં પ્રલયમીશ ! નૈમિત્તિકમ્ ॥ ૪.૨૦॥

૧. ચતુર્યુગસહસ્રં હિ બ્રહ્મણ એકમહર્ભવતિ ।

કદાચન રમાપતે! નનુ દિનાવસાને વિધિઃ
સુષુપ્તિનિરતાશયો ભવતિ સન્નિલિલ્યે સ્વયમ્ ।
જગન્તિ ચ યયુસ્તદા જઠરભાગમીશસ્ય તે
તદાભવદિદં જગત્ સકલમઞ્જસૈકાર્ણવમ્ ॥ ૪.૨૧॥

પ્રબોધય ! રયેણ મામહહ કલ્પકાલાવધા-
વિતીહ સમુદીર્ય ભો વરદ ! કાલશક્તિં પુનઃ ।
પ્રસુપ્તમનઘ! ત્વયા સકલજીવરૂપાત્મના

સ્વકીયજઠરસ્થિતૈરખિલલોકજાલૈઃ સમમ્ ॥ ૪.૨૨॥

ચતુર્યુગસહસ્રમેવમજિત ! પ્રસુપ્તે ત્વયિ
પ્રબુધ્ય હિ પુરૈવ શક્તિરયિ દેવ! કાલાભિધા ।
પ્રબુદ્ધમકરોત્ સપદ્યયિ ભવન્તમાત્તાદરં
રમાવર! ચરાચરાત્મકસમસ્તલોકાત્મકમ્ ॥ ૪.૨૩॥

વિબુધ્ય ચ તદા ભવાન્ સલિલગર્ભશાયી વિભુ-
ર્વિલોક્ય સકલાન્યહો નનુ જગન્તિ લીનાન્યલમ્ ।
નિજાન્તરિહ ચ સ્થિતેષ્વનઘ! તેષુ સૂક્ષ્માત્મના
દદૌ વરદ ! દૃષ્ટિમીશ્વર! કૃપામૃતસ્યન્દિનીમ્ ॥ ૪.૨૪॥

તતોઽજનિ જગત્પતે! તવ હિ નાભિરન્ધ્રાદહો
સમસ્તજગદાત્મકં કમલમેકમત્યદ્ભુતમ્ ।
અથાવિરભવદ્રમારમણ ! તત્ર ધાતા પુનઃ
ક્ષણાત્ સરસિજોદરે નિખિલવેદરાશિઃ સ્વયમ્ ॥ ૪.૨૫॥

ઇતીહ જગતાં પતે! પ્રથિત૧પાદ્મકલ્પે પુન-
વિવર્ધિતસરોજભૂઃ પ્રવિલસત્કૃપાવારિધિઃ ।
વિલેસિથ જગત્ત્રયીરચનકૌતુકી યો ભૃશં
સ મામવ સરોજનાભ! સકલાપદાં સઞ્ચયાત્ ॥ ૪.૨૬॥

૧. ”તસ્યૈવ ચાન્તે કલ્પોઽભૂદ્યં પાદ્મમભિચક્ષતે ।
યદ્ધરેનાભિસરસ આસાલ્લોકસરોરુહમ્ ॥”ઇતિ શ્રીભાગવતમ્ ।

વસન્ સ તુ સરોજભૂસ્તવ તુ નાભિજાતેઽમ્બુજે
કુતો નુ જલધાવિદં સમજનીત્યપશ્યન્ સ્વયમ્ ।
તદાકલનકૌતુકાત્ સકલદિક્ષુ પશ્યન્નહો
બભૂવ ચતુરાનનો વિલસદૃષ્ટનેત્રઃ પ્રભો !॥ ૪.૨૭॥

પયોનિધિસમુદ્ભવં કમલમેવ પશ્યન્નસૌ
તદાશ્રયમયે ભવદ્વપુરનન્ત ! નાલોકયન્ ।
ઇહામ્બુરુહમધ્યગો નિરવલમ્બકઃ કસ્ત્વહં
કુતોઽજનિ સરોરુહં ત્વિદમિતશિ ! સોઽચિન્તયત્ ॥ ૪.૨૮॥

ધ્રુવં જલરુહોઽસ્ય વૈ કિમપિ કારણં સમ્ભવે-
દિતીહ ચતુરાનનોઽથ મનસા વિનિશ્ચિત્ય સઃ ।

સ્વયોગબલતો જવાત્ ૧સમવરુહ્ય નાલાન્તરે-
      ઽપ્યમેયરુચિતુન્દિલં તવ વપુર્ન ચોદૈક્ષત ॥ ૪.૨૯॥

૧. સમવરુહ્યાપીતિ યોજ્યમ્ ।
કારણદર્શનાર્થં પ્રયત્નવિશેષં કૃત્વાપીતિ તદર્થઃ ।

નિવૃત્ય પુનરપ્યસૌ સરસિજે ૧પુરાવદ્વિધિ-
      સ્ત્વદીયકરુણારસાયનમવાપ્તુકામઃ સ્ફુટમ્ ।
તપઃ પરમમાસ્થિતો મધુરિપો ! શતં વત્સરાન્
      સમસ્તવિષયાવલીવિમુખમાનસઃ સાદરમ્ ॥ ૪.૩૦॥

૧. પૂર્વવત્ ।

પ્રસન્નહૃદયસ્ય તે મધુરિપો! સ્વરૂપં પરં
      વિલોક્ય તપસોઽવધૌ સરસિજાસનોઽન્તર્દૃશા ।
પ્રહૃષ્ટહૃદયો હરે! દિશ ધિયં જગન્નિર્મિતૌ
      મમાતિપટુમિત્યસૌ સરસમઞ્જસાયાચત ॥ ૪.૩૧॥

અવાપ્નુહિ સમસ્તલોકકુલસૃષ્ટિદાક્ષ્યં જવાદ્-
      વિધેહિ પુનરપ્યહો નનુ તપો વિધે! સાદરમ્ ।
ભવેન્નિરુપધિર્મયિ પ્રચુરભક્તિરપ્યન્વહં
      તવેતિ સમુદીરયંસ્તમકરોઃ પ્રસન્નાશયમ્ ॥ ૪.૩૨॥

પુનશ્ચ કલયંસ્તપઃ સ ખલુ વત્સરાણાં શતં
      તપોમતિબલે તતો હિ સમવાપ્ય પૂર્વાધિકે ।
વિલોક્ય ચલિતં જલે સરસિજં સમીરેણ વૈ
      ત્વદીયબલવર્દ્ધિતઃ સલિલમારુતૌ ચાપિબત્ ॥ ૪.૩૩॥

ત્વદીયકરુણાબલાજ્જલરુહેણ તેન દ્રુતં
      જગત્ત્રયમહો પુનર્વિરચયન્ સ્વયમ્ભૂઃ સ્વયમ્ ।
મનુષ્યમૃગપક્ષિભૂરુહસરીસૃપાદ્યાનસૌ
      ગુણાંશ્ચ વિવિધાનથો નનુ સસર્જ લક્ષ્મીપતે !॥ ૪.૩૪॥

સસર્જ સનકં હૃદા મુનિવરં સનન્દાભિધં
      સનાતનમહો પુનર્નનુ સનત્કુમારં તથા ।
અમી વરદ ! સૃષ્ટિકર્મણિ તુ તેન હિ પ્રેરિતા-
      સ્ત્વદીયપદલોલુભા ન જગૃહુસ્તદીયાં ગિરમ્ ॥ ૪.૩૫॥

રુષં ખલુ તદોદિતાં સપદિ રુન્ધતોઽસ્ય સ્ફુટં
	ભ્રુવોઃ પરમિહાન્તરાદજનિ સત્વરં શઙ્કરઃ ।
પદાનિ વિતરા૧હ્વયાનપિ ચ મે વિરિઞ્ચેત્યસૌ
	રુરોદ નનુ તેન વૈ સમુદભૂત્ સ રુદ્રાભિધઃ ॥ ૪.૩૬॥

૧. નામાનિ ।

અવાપ્ય વનિતાઃ સ વૈ વિધિનિયોગતો નિર્મિતિં
	યદા સમુપચક્રમે નનુ તદાથ તન્નિર્મિતાન્ ।
વિલોક્ય સ ભયાનકાન્ સપદિ રુદ્રસઙ્ઘાન્ પ્રજા
	ન વૈ સૃજ તપશ્ચરેત્યરમુમુવાચ પાથોજભૂઃ ॥ ૪.૩૭॥

૨. રુદ્રમ્ ।

તતોઽજનિ મરીચિરત્રિરપિ ચાઙ્ગિરાશ્ચાઙ્ગતઃ
	પુલસ્ત્યપુલહૌ પુનર્ભૃગુવસિષ્ઠદક્ષાસ્તથા ।
ત્વદીયપદસેવકઃ સપદિ નારદસ્તાપસો
	રમાવર! વિધેરલં ભુવનસૃષ્ટિદક્ષસ્ય વૈ ॥ ૪.૩૮॥

સૃજંસ્તદનુ કર્દમં વરદ ! ધર્મમુખ્યાંસ્તથા
	વિધાય ચ સરસ્વતીં વિધિરભૂદનઙ્ગાકુલઃ ।
તદા તુ ભવદાજ્ઞયા સનકદક્ષમુખ્યૈઃ સુતૈ-
	રસૌ સુબહુ બોધિતો મધુરિપો ! તમઃ સ્વં જહૌ ॥ ૪.૩૯॥

વિધાય નિગમાન્ પુનઃ સ તુ તથોપવેદાન્ વિધિઃ
	સ્વકીયમુવૃન્દતસ્ત્વયિ સદા નિબદ્ધાશયઃ ।
મનુષ્યકુલનિર્મિતિં મનુ૧તદીયજાયાત્મના
	વિધાતુમમલાશયઃ સ્વયમથાયમારબ્ધવાન્ ॥ ૪.૪૦॥

૧. શતરૂપાભિધા મનુજાયા ।

અથાહમહિનાથતલ્પશયન ! ૧ક્ષ્માસંસ્થિતિં
	સશૈલકુલવારિરાશિનિકરાન્તરીપાત્મિકામ્ ।
ક્રમાત્ કથયિતું કિમપ્યયિ સમુત્સુકોઽસ્મિ પ્રભો !
	તદર્થમયિ તે કૃપા પતતુ મય્યનન્યાશ્રયે ॥ ૪.૪૧॥

૧. ભૂસન્નિવેશમ્ ।

લસત્યજિત! લક્ષયોજનમિતઃ પુનસ્તાવતા

રમેશ ! લવણાબ્ધિના પરિવૃતોઽન્તરીપોત્તમઃ ।
ભુવો વરદ ! મધ્યગઃ સુવિદિતોઽથ જમ્બૂરિતિ
૧સ્વમાનસદૃશોચ્છ્રયેણ લસિતોઽરન્તરે મેરુણા ॥ ૪.૪૨॥

૧. નિજસ્થૌલ્યાનુરૂપૌનત્યેન । ૨. મધ્યે ।

ઇલાવૃતસમાહ્વયં લસતિ વર્ષમસ્યાભિતો
હરે! નવસહસ્રયોજનમિતં તુ તસ્યોત્તરે ।
ભવન્તિ હિ તથોન્નતાસ્ત્વવધિપર્વતાઃ ૧શૃઙ્ગવન્-
મુખા અપિ ચ રમ્યકપ્રમુખમીશ ! ૨વર્ષત્રયમ્ ॥ ૪.૪૩॥

૧. શૃઙ્ગવાન્ નીલઃ શ્વેતઃ ઇતિ ત્રયઃ ।
૨. રમ્યકં હિરણ્મયં કુરુરિતિ ।

તથૈવ વિલસત્યહો વરદ! દક્ષિણસ્યાં દિશિ
ત્રિભિસ્ત્વવધિપર્વતૈર્નિષધહેમકૂટા૧દિભિઃ ।
યુતં તુ હરિવર્ષકિમ્પુરુષમુખ્ય ૨વર્ષત્રયં
સમસ્તભુવનૈકનાયક ! સરોજનાભ ! પ્રભો !॥ ૪.૪૪॥

૧. આદિપદગ્રાહ્યો હિમાલયઃ ।
૨. તૃતીયં તુ ભારતવર્ષમ્ ।

પુરોદિશિ ચ ગન્ધમાદનસમાખ્યસીમાદ્રિણા
યુતં લસતિ કેતુમાલમિતિ વર્ષમત્યુત્તમમ્ ।
તથૈવ ખલુ માલ્યવન્નગયુતં પ્રતીચ્યાં દિશિ
પ્રભો! લસતિ વર્ષમમ્બુરુહનાભ ! ભદ્રાશ્વકમ્ ॥ ૪.૪૫॥

દિશામજ! ચતુષ્ટયે ગિરિ૧ચતુષ્ટયં ભાસતે
સ્ફુટં ત્વયુતયોજનપ્રમિતવિસ્તરોચ્છ્રાયયુક્ ।
સુવર્ણધરણીધરસ્ય નનુ મન્દરાદ્યં ક્ષિતે-
રવાપ્તમતિનિશ્ચલાં મધુરિપો! ત્વવષ્ટમ્ભતામ્ ॥ ૪.૪૬॥

૧. મન્દરો મેરુમન્દરઃ સુપાર્શ્વઃ કુમુદ ઇતિ ગિરિચતુષ્કમ્ ।

અમીષુ ધરણીધરેષ્વપિ ચતુર્ષુ ૧ચૂતાદિભૂ-
રુહોત્તમચતુષ્ટયં લસતિ સિન્ધુકન્યાપતે ! ।
તદીયફલનિસ્સૃતાસ્ત્વનઘ! નિમ્નગા વર્ત્મભિ-
શ્ચતુર્ભિરિહ સેચયન્ત્યલમિલાવૃતં સન્તતમ્ ॥ ૪.૪૭॥

૧. ચૂતજમ્બૂકદમ્બન્યગ્રોધરૂપવૃક્ષચતુષ્કમ્ ।

લસન્તિ ગિરયઃ પરે નનુ ૧કુરઙ્ગવૈકઙ્કત-
ત્રિકૂટશિશિરાદયઃ કનકભૂધરં ચાભિતઃ ।
ગતાસ્ત્વજિત ! કેસરત્વમથ તસ્ય ચાષ્ટૌ તથા
મહાગિરિવરાઃ પુનર્જઠરદેવકૂટાદયઃ ॥ ૪.૪૮॥

૧. કુરઙ્ગાદયો વિંશતિર્ગિરયઃ ।
૨. જઠરદેવકૂટપવનપારિયાત્રકૈલાસકરવીરત્રિશૃઙ્ગમકરાખ્યાઃ ।

અથો દશસહસ્રયોજનસહસ્રયુક્તા પુરી
લસત્યજિત ! મેરુમૂર્ધનિ હિ મધ્યતો બ્રહ્મણઃ ।
ઇમામનુ કિલાભિતો નિયમિતાસ્તથાષ્ટૌ ૧પુરો
દિગીશનિલયાસ્તદીયકરચતુર્થભાગેન વૈ ॥ ૪.૪૯॥

૧. નગરાણિ । ૨. પૂર્વોક્તપુરીમાનતુરીયમાનેનેત્યર્થઃ ।

તવૈવ નનુ વામનસ્ય ખલુ વામપાદાઙ્ગુલી-
નખાહતજગત્કટાહવિવરેણ ચાન્તર્ગતા ।
અતીવ મહતા પુનર્જગદધીશ ! કાલેન વૈ
દિવિ ધ્રુવપદે શનૈરવતતાર સા જાહ્નવી ॥ ૪.૫૦॥

નિષિચ્ય પુનરિન્દુમણ્ડલમથાલયે બ્રહ્મણો
નિપત્ય નનુ મેરુમૂર્ધનિ ચિરેણ જહ્નોઃ સુતા ।
૧ચતુર્ભિરિહ નામભિઃ પરમિયં ચતુર્ધા ભવ-
ન્ત્યશેષમવનીતલં સમતનોત્ પવિત્રં ભૃશમ્ ॥ ૪.૫૧॥

૧. સીતાલકનન્દાચક્ષુર્ભદ્રેત્યેવંરૂપૈઃ ।

નવસ્વપિ ચ વર્ષરાજિષુ પુરા પરં કીર્તિતે-
ષ્વશેષજગતીપતિર્નનુ ભવાન્ રમાવલ્લભઃ ।
લસત્યજિત ! મૂર્તિભિર્નવભિરચ્યુતાત્મોચિતૈઃ
પૃથક્ પૃથગુપાસિતો નવભિરીશ ! ૧ભક્તોત્તમૈઃ ॥ ૪.૫૨॥

૧. તે યથા –ઇલાવૃતે ભવઃ, ભદ્રાશ્વે ભદ્રશ્રવાઃ,
હરિવર્ષે પ્રહ્લાદઃ, કેતુમાલે રમા, રમ્યકે મનુઃ,
હિરણ્મયે પિતૃગણાધિપતિઃ, કુરુષુ ભૂઃ, કિમ્પુરુષે હનુમાન્,
ભારતે નારદ ઇતિ ।

અથો હયગવેષણોદ્યતતરૈરલં કલ્પિતા
    લસન્તિ સગરાત્મજૈઃ પરમિહાષ્ટસઙ્ખ્યાયુતાઃ ।
સમસ્તજગતીપતે! સ્ફુટમુપાન્તરીપોત્તમાઃ
    પુરા હિ સમુદીરિતસ્ય વરદાન્તરીપસ્ય વૈ ॥ ૪.૫૩॥

દ્વિલક્ષતમયોજનઃ સુવિદિતો હરે ! પ્લક્ષ ઇ-
    ત્યથાસ્તિ પુનરિક્ષુતોયનિધિનાઽઽવૃતો દ્વીપરાટ્ ।
નદીભિરચલૈસ્તથા હ્યપિ ચ વર્ષકૈઃ સપ્તભિ-
    ર્યુતો નનુ ભજન્તિ ભાનુમયિ દેવ ! તદ્વાસિનઃ ॥ ૪.૫૪॥

તતો દ્વિગુણિતોત્તરોત્તરવિશાલતાશાલિનો
    લસન્તિ પરમન્તરીપનિકરાશ્ચ સપ્તાપરે ।
યથાક્રમમિહાબ્ધિભિદધિઘૃતાદિભિર્વેષ્ટિતા
    ભજન્તિ ખલુ તત્ર તત્ર વિબુધાન્ પૃથઙ્માનવાઃ ॥ ૪.૫૫॥

સ્વમૂર્ત્યયિ દિગીશપત્તનચતુષ્ટયેનાન્વિતો
    વૃતોઽસ્તિ પરિશુદ્ધતોયનિધિના તથા પુષ્કરઃ ।
રવેસ્તુ કનકાચલં નિયમતસ્ત્વભિક્રામતઃ
    સૃતિઃ શિરસિ યસ્ય વૈ પરમુપાસિતબ્રહ્મણઃ ॥ ૪.૫૬॥

તતઃ પરમશેષસત્ત્વનિવહૈરલં વર્જિતા
    ભવત્યજિત ! મૃણ્મયી વસુમતી તથા કાઞ્ચની ।
તતઃ પરમિહાવૃતાન્ધતમસેન કાપિ ક્ષિતિ-
    ર્લસત્યખિલલોકગીતમહિમન્ન૧લોકાભિધા ॥ ૪.૫૭॥

૧. અલોકાખ્યા ।

ઇતિ ક્ષિતિગિરીન્દ્રવારિનિધિવર્ષકદ્વીપપુ-
    ઙ્ગવવ્રજમયી પુનઃ સકલસત્ત્વજાલાશ્રિતા ।
અનેકતમરાષ્ટ્રપત્તનનદીવનૈર્મણ્ડિતા
    શતાર્ધશતલક્ષયોજનમિતેયમુર્વી સ્મૃતા ॥ ૪.૫૮॥

નભસ્યથ દિવાકરેન્દુસહિતામિતપ્રોજ્જ્વલ-
    ગ્રહર્ક્ષકલિતં પુનર્વરદ ! તેજસાં મણ્ડલમ્ ।
ભજન્તિ ભુવિ કેચિદત્ર નનુ ૧શિંશુમારાત્મના
    ચરન્તમખિલેષુ રાશિષુ યથાક્રમં ત્વાં સદા ॥ ૪.૫૯॥

૧. શિંશુમારાખ્યજન્તુસંસ્થાનેન । શિંશુમારસંસ્થાનં ચ શ્રીભાગવતે ચતુર્થસ્કન્ધે ત્રયોવિંશાધ્યાયે વિવૃતમ્ ।

અધો ભુવિ રસાતલાદિભુવનાનિ સપ્ત પ્રભો !
    લસન્તિ ખલુ ભોગિનામનઘ! વાસભૂતાન્યહો ।
તતોઽપ્યલમધઃ સ્થિતો વહતિ ભૂમિમેનાં ફણા-
    સહસ્રતલસુસ્થિતામવિરતં ફણીન્દ્રઃ સ્વયમ્ ॥ ૪.૬૦॥

ઇતીહ પરિકલ્પિતે જગતિ વિદ્યમાનેષ્વહો
    બહુષ્વનઘ! જન્મરાશિપુ મુહુઃ શરીરી ભ્રમન્ ।
અનન્તસુકૃતાવલીસુપરિપાકકાલે પુન-
    ર્ભજત્યજિત ! માનવીયમિહ જન્મ સર્વોત્તમમ્ ॥ ૪.૬૧॥

દુરાસદપરાક્રમા વિપુલદેહસત્ત્વોજ્જ્વલા
    અપીહ ભુવિ કેસરિદ્વિપતરક્ષુમુખ્યા મૃગાઃ ।
વિવેકલવવર્જિતાઃ ખલુ યતસ્તદીયં તતઃ
    પરં વિફલમેવ દેવ ! નનુ જન્મ નિસ્સંશયમ્ ॥ ૪.૬૨॥

ઇયં હિ જનની પિતા ત્વયમસૌ મદીયો ગુરુઃ
    સુતોઽયમયમગ્રજસ્ત્વવરજોઽયમિત્યાદ્યહો ।
વિવિચ્ય હૃદિ વેદિતું કલયિતું ચ શાસ્ત્રં પરં
    વિના જગતિ માનુજં કિમિહ જન્મ દક્ષં ભવેત્ ॥ ૪.૬૩॥

ઇતીહ બહુધા પુનઃપુનરપીશ્વરા૧લક્ષિતે
    સમસ્તપુરુષાર્થસાધનસમર્થમત્રાવનૌ ।
સુરાસુરસુદુર્લભં નનુ મનુષ્યજન્મૈવ યદ્-
    બ્રવીમિ હિ તદુદ્ભવાદિકમિહાત્ર સઙ્ક્ષેપતઃ ॥ ૪.૬૪॥

૧. આલોચિતે આલોચનાયાં કૃતાયાં સત્યામિતિ યાવત્ ।

સ્વકર્મબલચોદિતઃ પ્રથમતો જનન્યાસ્ત્વયં
    જનો જઠરગહ્વરં વિશતિ માંસપિણ્ડાત્મકઃ ।
તતોઽઙ્કુરિતમૌલિપાણિચરણઃ ક્રમાજ્જાયતે
    ત્વદેકશરણો હરે! દશભિરઙ્ગ! માસૈઃ સ્ફુટમ્ ॥ ૪.૬૫॥

અસહ્યતરપૂતિગન્ધિરુધિરામિષાન્ત્રાવિલાત્
    કદા બહિરિતો વ્રજામ્યહમિતીહ વાઞ્છન્ ભૃશમ્ ।

બલાદથ સમીરિતઃ સપદિ સૂતિકાવાયુના
 રુદન્નથ નરાકૃતિર્ભુવિ રમેશ ! સઞ્જાયતે ॥ ૪.૬૬॥

તતઃ સ્વજનનીસ્તનાસ્વદનમાત્રપુષ્યત્તનુઃ
 ક્રમેણ પરિવર્ધિતઃ પુનરથાન્નપાનાદિભિઃ ।
ભવત્યથ પટુઃ શનૈશ્ચલિતુમપ્યથો ભાષિતું
 કલં સ જનયન્મુદં સમધિકાં સ્વપિત્રોઃ સ્ફુટમ્ ॥ ૪.૬૭॥

તતોઽજિત ! કલાસુ હન્ત ગુરુભિઃ પરં શિક્ષિતો-
 ઽપ્યસૌ વહતિ દાક્ષ્યમાસુ નિયતં યથાવાસનમ્ ।
મરૌ તદિતરાવનાવપિ ચ બીજમુપ્તં સમં
 દદાતિ હિ મહીગુણાનુગુણમેવ તાવત્ ફલમ્ ॥ ૪.૬૮॥

ત્રિધા ભવતિ દેહિનાં પ્રકૃતિરપ્યહો સાત્ત્વિકી
 રમારમણ ! રાજસી હ્યપિ ચ તામસીતિ પ્રભો ! ।
પ્રવૃત્તિરખિલેષુ હન્ત ભવતીહ કૃત્યેષ્વહો
 પુનર્નિજગુણાનુરૂપમયિ નાથ ! તેષાં પૃથક્ ॥ ૪.૬૯॥

ભવન્તિ હૃદયોદ્ભવા ભુવિ નૃણાં તુ ષડ્ વૈરિણો
 મુકુન્દ ! ભૃશદુર્દમાઃ પ્રબલકામરોષાદયઃ ।
જિતાસ્ત્વજિત ! યેન તે સ સુકૃતી જિતો યસ્તુ તૈ-
 ર્ન ચારિત ભુવનત્રયેઽપિ ચ ૧તથાવિધઃ પાતકી ॥ ૪.૭૦॥

૧. જિતતુલ્ય ઇત્યર્થઃ ।

તમઃ કલુષિતાશયાઃ કતિચિદત્ર યોષિત્સ્વહો
 ભ્રમન્તિ હિ સુખભ્રમેણ ભુવિ પાપકૃત્યા નરાઃ ।
પતન્તિ શલભા યથા ૧શિખિનિ ભક્ષ્યબુદ્ધ્યા સ્વયં
 સ્વનાશમનવેક્ષ્ય હન્ત ૨બડિશે ચ મીના યથા ॥ ૪.૭૧॥

૧. અમૌ । ૨, મત્સ્યબન્ધને ।

પરે નનુ ધનાર્જનૈકનિરતા નરાઃ પાપિનઃ
 સ્વભર્તુરહિતં ચ ચૌર્યમથવા પરોપદ્રવમ્ ।
વિધાય સમુપાર્જયન્તિ હિ ધનં ત્વનાલોચ્ય હા
 તટિત્સ્ફુરિતભઙ્ગુરત્વમિહ ૧તસ્ય વિશ્વાર્ત્તિહન્ !॥ ૪.૭૨॥

૧. ધનસ્ય ।

અવાપ્ય જગદીશ્વરે ભવતિ ભક્તિમત્યુત્તમા-
મનન્તસુકૃતવ્રજૈરપિ નિકામમેકે જનાઃ ।
વિધૂય નિરયાવહેષ્વલમમીષુ૧ વાઞ્છાં સદા
પરં સુખમવાપ્નુવન્તિ કૃપયા તવાધોક્ષજ !॥ ૪.૭૩॥

૧. ધનેષ્વિત્યર્થઃ ।

અથાહમરવિન્દનાભ! કથયામિ વર્ણાશ્રમો-
ચિતં સુપરિશુદ્ધમીશ! નનુ ધર્મમદ્યાદરાત્ ।
ત્વયૈવ પરમુદ્ધવાય નિજભક્તવર્યાય તં
પુરા સમુપદિષ્ટમત્ર કૃપયૈવ તે કિઞ્ચન ॥ ૪.૭૪॥

રમાવર! સુદુર્લભં ભુવિ મનુષ્યજન્મૈવ તદ્-
બહુષ્વથ વિવેકલેશરહિતેષુ દેહિષ્વહો ।
તતોઽપ્યતિદુરાસદં નનુ મહીસુરત્વં હરે !
વિના શ્રમલવં નરો ભજતિ યત્ર સેવાં તવ ॥ ૪.૭૫॥

તતોઽહમિહ સામ્પ્રતં તદિહ જન્મ સર્વોત્તમં
તવૈવ કૃપયા પુનર્જગતિ વિન્દતા દેહિના ।
વિધેયમલમાશ્રમોત્તમચતુષ્ટયસ્યોચિતં
બ્રવીમિ નનુ ધર્મમીશ! ભવતા પરં કલ્પિતમ્ ॥ ૪.૭૬॥

અથોપનયનાદવાપ્ય મનુજો દ્વિજત્વં પરં
વસન્ ગુરુકુલે સદા હ્યજિનમેખલાદણ્ડધૃત્ ।
અખણ્ડિતતનૂરુહોઽપ્યથ હુતાનલઃ સન્ધ્યયો-
ર્વિનીતહૃદયો ગુરોઃ સ નિગમાનધીયીત ચ ॥ ૪.૭૭॥

૧પ્રગે ચ દિવસાવધૌ સ્વગુરવે સમાનીય સ-
ન્નિવેદ્ય પરમત્તુમર્હતિ સ ભૈક્ષમન્નં શુચિ ।
નિકામમથ વર્જયેદપિ વધૂમુખાલોકનં
સદૈવ કલયેદ્ગુરોઃ સકુતુકઞ્ચ શુશ્રૂષણમ્ ॥ ૪.૭૮॥

૧. પ્રાતઃ ।

ઇતિ વ્રતમખણ્ડિતં નિગમશિક્ષણાન્તાવધિ
દ્વિજો નનુ વહન્ પુનઃ સ્વગુરવે તથા દક્ષિણામ્ ।
વિતર્ય ચ યથાસમૃદ્ધિ સહસા ત્વદીયાજ્ઞયા

વિવર્જિતમદસ્ત્યજેત્ તમિમમાશ્રમં ત્વાદિમમ્ ॥ ૪.૭૯॥

વિવિક્ષુ૧રથ ભૂસુરઃ સ્વયમથો ગૃહસ્થાશ્રમં
સતીમથ યવીયસીમપિ સમાનવર્ણોદ્ભવામ્ ।
નિકામમજુગુપ્સિતાં વિધિવદુદ્વહેત્ સાદરં
ગુણાકૃતિમુખૈરહો પરમથાનુરૂપાં વધૂમ્ ॥ ૪.૮૦॥

૧. વેષ્ટુમિચ્છુઃ ।

અવાપ્ય દયિતાં દ્વિજઃ પરમથાનુરક્તાં નિજે
તયા સમમખણ્ડિતં સતતમગ્નિહોત્રં દધત્ ।
યજેચ્ચ પુરુદક્ષિણૈરપિ મખૈસ્તુ યજ્ઞેશ્વરં
ભવન્તમથ પૌર્ણમાસપશુબન્ધદર્શાદિભિઃ ॥ ૪.૮૧॥

અકામકલુષીકૃતઃ પરમથાનસૂયસ્તથા
દયાલુરખિલેષુ ભૂતનિવહેષુ દાન્તાશયઃ ।
નિકામપરિતુષ્ટધીઃ પરમથાલ્પલાભેન ચ
ત્વયીશ ! નિરતઃ સદા નનુ ભવેદ્ગૃહસ્થાશ્રમી ॥ ૪.૮૨॥

વિવિક્ષુરથ કાનનં સ્વતનયેષુ ભાર્યાં નિજાં
નિધાય તુ સહૈવ વા વનભુવં દ્વિજઃ ૧પ્રવ્રજેત્ ।
નયેચ્ચ વન એવ ભાગમખિલં તૃતીયં પુન-
ર્મુનિર્નનુ નિજાયુષો વિધૃતવલ્કલો નિસ્પૃહઃ ॥ ૪.૮૩॥

૧. વાનપ્રસ્થો ભવેદિત્યર્થઃ ।

ત્રિકાલમપિ ચાચરેદથ જલાશયે મજ્જનં
સ્વવૃત્તિમિહ વન્યમૂલફલરાશિભિઃ સાધયેત્ ।
પુનઃ શયનમાચરેન્નનુ નિશાસ્વહો ૧સ્થણ્ડિલે
સદા પરમદુષ્કરં ભુવિ તપશ્ચરેત્ તત્પરઃ ॥ ૪.૮૪॥

૧. નિરાસ્તરણે ભૂતલે ।

યદા સમુપજાયતે હિ નિરયાત્મકેષ્વાત્મનો
વિરક્તિરથ લોકરાશિષુ નિકામમત્ર દ્વિજઃ ।
તદા ત્રિજગતાં ગુરૌ ૧ભવતિ લગ્નચેતા દૃઢં
રમાવર! પરિવ્રજેત્ સ્વમનસા વિધૂતાગ્નિકઃ ॥ ૪.૮૫॥

૧. ત્વયિ ।

વહન્નથ કમણ્ડલું વરદ ! વેણુદણ્ડં તથા
ચરેત્ પરમનિસ્પૃહો ભુવમિમામસક્તો ભૃશમ્ ।
વિધૂતમદમત્સરો વિહિતસામ્યભાવોઽખિલે-
ષ્વહો ન હિ રતો ભવેદપિ ચ ૧બદિવાદાદિષુ ॥ ૪.૮૬॥

૧. વાદિવાદો જલ્પવિતણ્ડાદિરૂપસ્તદાદિષુ ।

૧ન્યસેદ્ભુવિ પદં યતિઃ પથિષુ દૃષ્ટિપૂતં ચરન્
પિબેદપિ જલં પુનર્જગતિ વસ્ત્રપૂતં ભૃશમ્ ।
વદેદલમનિન્દિતામહહ સત્યપૂતાં ગિરં
તથા હૃદયપૂતમેવ ખલુ કર્મ સર્વં ચરેત્ ॥ ૪.૮૭॥

૧. અસધાતુર્ભૌવાદિકઃ ધાતૂનામનેકાર્થત્વાન્ન્યસ્યેદિત્યર્થઃ

વિહાય તુ વિગર્હિતાનપિ ચતુર્ષુ વર્ણેષ્વહો
સમં જગતિ સંયમી સ્વભરણાય ભિક્ષાં ચરેત્ ।
સકૃત્ ત્વનિયતેષુ નાથ! સદનેષુ સપ્તસ્વહો
ભવેચ્ચ પરિતુષ્ટધીઃ ૧સુબહુ તત્ર ૨લબ્ધાન્ધસા ॥ ૪.૮૮॥

૧. પરિતોષક્રિયાવિશેષણમ્ । ૨. લબ્ધેનાન્નેન ।

ઇતિ ત્વદુપકલ્પિતે નનુ યતિઃ સ્વધર્મે રતઃ
સમસ્તવિષયાવલીવિમુખમાનસઃ સન્તતમ્ ।
હૃદમ્બુજસમુદ્ભવત્પ્રચુરભક્તિભારોઽ૧વધૌ
ચરાચરજગદ્ગુરું નિયતમાપ્નુયાત્ ત્વાં પરમ્ ॥ ૪.૮૯॥

૧. દેહાવસાને ।

અથાહમિ૧તરૈસ્ત્રિભિર્નલિનનાભ! વર્ણૈર્જગ-
ત્યુપાસ્યમખિલં પૃથક્ પૃથગનન્ત ! ધર્મં વરમ્ ।
ક્રમેણ કથયે યથામતિ તવૈવ કારુણ્યત-
શ્ચતુર્દશજગન્નિયન્તુરમિતાનુભાવસ્ય ચ ॥ ૪.૯૦॥

૧. ક્ષત્રિયવૈશ્યશૂદ્રૈઃ ।

અવાપ્ય ધરણીપતિત્વમિહ બાહુજો ન્યાયતો
નિજાઃ પ્રણિહિતઃ પ્રજાઃ સ્વસુતવદ્ભૃશં પાલયેત્ ।
ધનં ચ ૧તદુપાહૃતં સુબહુ દેવભૂદેવયોઃ

२કૃતે તુ વિનિયોજયેદથ યથોચિતં સન્તતમ્ ॥ ૪.૯૧॥

૧. પ્રજાભિઃ કરત્વેન સમર્પિતમ્ । ૨. તાદર્થ્યેઽવ્યયમ્ ।

યુધિ સ્થિરપરાક્રમઃ પરિલસદ્યશોભાજનં
વદાન્યવરતાં દધત્ સતતમર્થિસઙ્ઘેષ્વહો ।
વશી ચ પરમાસ્તિકો નિગમગીતવર્ણાશ્રમા-
દિધર્મપરિપાલને ચ નિરતો ભવેદ્ભૂપતિઃ ॥ ૪.૯૨॥

અથાત્ર પશુરક્ષયા ચ કૃષિભિર્વણિગ્વૃત્તિભિઃ
સ્વકાલમનિશં નયેદજિત ! વૈશ્યજાતિઃ સ્વયમ્ ।
૧દ્વિજસ્ય ૨પરિચર્યયા વિરહિતઃ સ્વયં પાપ્મના
કથઞ્ચિદિહ શૂદ્રજાતિરપિ કલ્પતે શ્રેયસે ॥ ૪.૯૩॥

૧. ત્રૈવર્ણિકસ્ય । ૨. ઇયં પાપ્મવિરહિતત્ત્વે હેતુઃ ।

વિધાતુમનિશં મતિં તનુજુષોઽસ્ય સન્માર્ગગાં
મુકુન્દ ! બહવો લસન્તિ ૧ગુરવો ધરામણ્ડલે ।
તદીયગુણમાકલય્ય ચ વિધૂય દોષાવલીં
નરો વિગતસંશયં ન તુ વિમોહમત્રાપ્નુયાત્ ॥ ૪.૯૪॥

૧. તે ચ ભૂમ્યાદય ઉત્તરશ્લોકે વક્ષ્યન્તે ।

ક્ષમા ચ મરુદમ્બરં સલિલમગ્નિરિન્દૂ૧ રવિઃ
કપોતરશયુસિન્ધવઃ શલભપુષ્પલિટ્ સિન્ધુરાઃ ।
તથેહ ૩મધુહા ૪મૃગોઽપ્યથ તથાણ્ડજઃ૫ ૬પિઙ્ગલા
મુકુન્દ ! કુરરોઽર્ભકોઽપ્યથ કુમારિકા બાણકૃત્ ॥ ૪.૯૫॥

૧. ઇન્દુઃ । ૨. શયુરજગરઃ । સિન્ધુઃ સમુદ્રઃ । ૩. માક્ષિકહર્તા ।
૪. હરિણઃ ૫. મીનઃ ૬. તન્નામિકા વેશ્યા ।

અહિઃ પરમથોર્ણનાભિરિહ સિન્ધુકન્યાપતે !
૧સુપેશકૃદિતીરિતાસ્તુ ગુરવશ્ચતુર્વિંશતિઃ ।
અમી જગતિ ચર્યયા હિ નિજયૈવ પુંસાં સતાં
હિતારમુપદિશન્તિ નામ સરણિં શુભાવાપ્તિદામ્ ॥ ૪.૯૬॥

૧. કીટસ્ય ભ્રમરત્વાપાદકો ભૃઙ્ગવિશેષઃ ।
૨. ઉપદેશશ્ચ શ્રીભાગવતે એકાદ શસ્કન્ધે ૭, ૮, ૯ અધ્યાયેષુ વિવૃતઃ ।

વિલોક્ય ચ બતેદૃશાનિહ શુભામિહેતૂન્ બહૂન્
    વિવેકરાહતાસ્તુ યે ભુવિ ચરન્તિ પાપાન્યહો ।
નિબધ્ય યમપૂરુષૈરહહ કાલપાશૈર્દૃઢૈ-
    રમી નિરયયાતનાં બહુ ભવન્તિ નીતા મૃતૌ ॥ ૪.૯૭॥

લુઠન્તમથ દારુણે નરકસીમ્નિ હાહેત્યહો
    રુદન્તમધિકં ક્ષુધાપ્યથ પિપાસયા વ્યાકુલમ્ ।
વિમર્દ્ય શિતહેતિભિર્વિકરુણં સમાકર્ષય-
    ન્ત્યતીવ બત તપ્તતામ્રકલિતે તલે પાપિનમ્ ॥ ૪.૯૮॥

વિમોચયિતુમીદૃશાન્નરકસઙ્કટાત્ પ્રાણિનં
    મુરાન્તક! પટીયસી તવ હિ ભક્તિરેકૈવ સા ।
૧ઇમાં તુ નવધા જગૌ દનુજબાલકેભ્યઃ પુરા
    ભવત્પદપરાયણોત્તમતમઃ સ ૨કાયાધવઃ ॥ ૪.૯૯॥

૧. ભક્તિમ્ । ૨. કયાધુર્હિરણ્યકશિપોર્ભાર્યા તસ્યા અપત્યં પ્રહ્લાદઃ ॥

૧શ્રુતિર્વરદ ! કીર્તનં સ્મરણમઙ્ઘ્રિસંસેવનં
    રમાવર ! તથાર્ચનં ત્વપિચ વન્દનં દાસતા ।
ત્વયૈવ સહ સખ્યમચ્યુત ! નિવેદનં ચાત્મન-
    સ્ત્વિતીહ નવધા સ્મૃતા ભવતિ ભક્તિરત્યુત્તમા ॥ ૪.૧૦૦॥

૧. શ્રવણમ્ ।

ઇતિ સ્વાતિશ્રીરામવર્મવઞ્ચિમહારાજવિરચિતાયાં
ભક્તિમઞ્જર્યાં ચતુર્થશતકમ્ ।

## અથ પઞ્ચમશતકમ્ ।

અથ સરસિજનાભ! ત્વત્કૃપૈકાવલમ્બા-
    દહમિહ નવધા તં કલ્પિતં ભક્તિમાર્ગમ્ ।
કથયિતુમયિ સદ્યસ્તૂત્સહેઽઙ્ગ! ક્રમેણ
    પ્લવમિવ૧ ભુવિ લબ્ધ્વા પારલિપ્સુઃ પયોધેઃ ॥ ૫.૧॥

૧. ઉડુપેન સાગરતિતીર્ષૂપમયા ભક્તિમાર્ગકથનરૂપાશક્યકાર્ય-
પ્રવૃત્તસ્યાત્મનો લોકે પરિહસનીયત્વં દ્યોત્યતે ।

નવસુ ચ બત ભૂમન્ ! ભક્તિમાર્ગેષ્વથાદ્યાં

તવ ગુણગણલીલાકર્ણનાખ્યાં તુ ભક્તિમ્ ।
શ્રમલવરહિતાં તાં ચેતસઃ શાન્તિદાત્રીં
કથયિતુમયિ કિઞ્ચિત્ પ્રારભે ભૂરમેશ !॥ ૫.૨॥

ઇહ હિ જગતિ સન્તિ પ્રાપ્તયે ત્વત્કૃપાયા
મુરમથન! બહૂન્યેવાઙ્ગ ! વર્ત્માનિ નૂનમ્ ।
તદિદમખિલમુચ્ચૈર્દુષ્કરં હન્ત સાધ્યા
૧સસુખમખિલલોકૈર્ભક્તિરેકૈવ સા તે ॥ ૫.૩॥

૧. સાધનક્રિયાવિશેષણમિદમ્ ।

શમયતિ ભુવિ પાપાન્યેવ સંસારભાજાં
ન તુ સુદૃઢતરાં તાં વાસનાં ૧વર્ત્મ સર્વમ્ ।
હરતિ ૨તદુભયં યદ્ભક્તિરવ્યાહતા ત્વ-
ય્યથ સકલજનાર્થ્યા સૈવ નિર્ધૂતશઙ્કમ્ ॥ ૫.૪॥

૧. સર્વે વર્ત્મ ભક્તિમાર્ગાતિરિક્તં માર્ગજાતમ્ ।
૨. પાપતદ્વાસનાદ્વયમ્ ।

અપિ ચ પરમવેક્ષ્યઃ કર્મણાં ચેતરેષા-
મિહ ભુવિ સકલાનાં ચાધિકારી મુરારે ! ।
૧સમમખિલજનૈરપ્યશ્રમેણાચ્યુતાનુ-
ક્ષિતિષુ કિમિહ શક્યં ભક્તિવત્ ત્વય્યનન્તે ॥ ૫.૫॥

૧. અવિશેષેણેત્યર્થઃ ।

નિખિલભુવનબન્ધો ! નાથ! તત્રાપિ મુખ્યં
તવ ચરિતસુધાયાઃ શશ્વદાકર્ણનં તત્ ।
૧યદિહ પરમનિરચ્છન્નપ્યસૌ હન્ત દેહી
જગતિ ભવતિ યસ્માદૂરિતઃ સર્વપાપૈઃ ॥ ૫.૬॥

૧. આકર્ણનમ્ । ૨. અનિચ્છયા કુર્વન્નપીત્યર્થઃ ।

પ્રિયમિહ રસનાયા યન્ન તદ્રોગશાન્ત્યૈ
પ્રભવતિ ગદહારિ સ્વાદુતાં વા ન ધત્તે ।
પ્રણુદતિ ભુવિ પાપં રઞ્જયન્તી હૃદુચ્ચૈ-
સ્તવ ચરિતસુધા સા ભેષજાયેવ દુગ્ધમ્ ॥ ૫.૭॥

તવ ચરિતસુધાયા ધારયા પૂરણીયે

સતિ સકલજનૌઘાઃ કર્ણકૂપે સ્વકીયે ।
તદહિતકરણાયેવોપલાભ્યાં પિધાનં
દધતિ ભુવિ કિમર્થં કુણ્ડલાહ્વાયુતાભ્યામ્ ॥ ૫.૮॥

વિષયમયદવાગ્નિજ્વાલયા પીડિતાના-
૧મગણિતબલકામક્રોધવૈર્યર્દિતાનામ્ ।
જનનમરણરૂપે સાગરે મજ્જતાં હા
ગતિરિહ હિ વિના કા ત્વત્કથાસ્વાદભાગ્યાત્ ॥ ૫.૯॥

૧. અગણિતબલૌ યો કામક્રોધાવેવ વૈરિણૌ તાભ્યામર્દિતાનામ્ ।

પરિહરતિ ચ પાપં હન્ત તાપત્રયં ચ
પ્રદિશતિ ભુવિ સર્વં વાઞ્છિતં માનવાનામ્ ।
જનયતિ હૃદિ ભક્તિં શ્રીપતે! ત્વય્યસીમાં
કિમિહ દિશતિ સૌખ્યં નો કથાસ્વાદનં તે ॥ ૫.૧૦॥

અનુદિનમવગાહૈઃ પુણ્યતીર્થેષુ યદ્વૈ
ફલમલમુપભુઙ્ક્તે યત્તપોભિર્મખૈર્વા ।
તદખિલમિહ લોકસ્ત્વશ્રમેણાશ્નુતેઽસૌ
સકૃદપિ તવ ગાથાં કર્ણયોરાકલય્ય ॥ ૫.૧૧॥

સ્મરણનિરતપાપવ્યૂહવિચ્છેદશૌણ્ડ-
સ્ત્વમયિ ભુવનબન્ધો! કીર્ત્યસે ૧યત્ર શશ્વત્ ।
શ્રવણપુટયુગલ્યા તાં સમાસ્વાદ્ય ગાથાં
ક ઇહ ન કૃતકૃત્યો જાયતે નાથ! મર્ત્યઃ ॥ ૫.૧૨॥

૧. ગાથાયામ્ ।

જગતિ દનુજવૈરિન્ ! યઃ પુમાનાત્તમોદં
૧ભવતિ ધૃતરતીનાં સજ્જનાનાં સમાજે ।
નિશમયતિ ન ગાથાં કીર્ત્યમાનાં ત્વદાયાં
ન ભવતિ બધિરો વૈ તત્સમો હન્ત નૂનમ્ ॥ ૫.૧૩॥

૧. ત્વયિ ।

અનિશમલમનર્થૌઘાવહાસત્પ્રસઙ્ગાન્-
નિશમયતિ કથાં તે પ્રોજ્ય હા મન્દભાગ્યઃ ।
૧સુમધુરિમ બલાદપ્યર્પિતં નામ હિત્વા

પય ઇહ પરિખાદત્યુષ્ટ્રકઃ કણ્ટકાન્ દ્રાક્ ॥ ૫.૧૪॥

૧. શોભનો મધુરિમા યસ્ય તત્ ।

અહહ ૧ખલજનાનાં કર્ણશૂલાયિતૈસ્તૈઃ
પરુષવચનજાતૈર્વિક્ષતં કર્ણરન્ધ્રમ્ ।
યદિ ન હિ તવ ગાથારૂપપીયૂષવૃષ્ટ્યા
શિશિરયતિ વિગર્હ્યઃ કઃ ૨પરઃ સ્યાત્ તતોઽપિ ॥ ૫.૧૫॥

૧. ઇદં પરુષવચનજાતૈરિત્યનેનાન્વેતિ । ૨. અન્યઃ ।

નવરસપરિમિશ્રૈર્યા ત્વદીયાપદાનૈ-
ર્નવનવમથ મોદં માનવાનાં વિધત્તે ।
દિનમનુ તવ ગાથાં તાદૃશીં સાધુ શ ૃણ્વ-
ન્નપિ નનુ ભુવિ તૃપ્તિં કઃ પ્રયાતો મનીષી ॥ ૫.૧૬॥

શુકભૃગુસનકાદ્યા હન્ત નૈર્ગુણ્યસક્તા
અપિ જગતિ મુનીન્દ્રા નાથ! યસ્યાં કથાયામ્ ।
તવ ૧પરમનુરક્તાસ્તૂત્તમશ્લોકલીલા-
વિવશિતમતયોઽમી કેન ૨વાઞ્છ્યા ન સા સ્યાત્ ॥ ૫.૧૭॥

૧. અત્યર્થમ્ । ૨. કામ્યાઃ ।

ધનતનયકલત્રાગારબન્ધૂન્ નિરસ્યા-
પિ ચ તૃણવદરણ્યે મૌનિવૃત્તિં શ્રિતાનામ્ ।
વિગલિત૧મમતાહન્તાદિદોષવ્રજાના-
મપિ જનયતિ સક્તિં સા કથાધોરણી તે ॥ ૫.૧૮॥

૧. મમતા મમેદમિત્યાભિમાનઃ અહન્તાહઙ્કારઃ ।

અખિલવિષયજાલાવાઙ્મુખા યે ત્વજસ્રં
શ્રુતિયુગસુખદાભિસ્તાવકીભિઃ કથાભિઃ ।
મુરમથન ! નયન્તે કાલમામોદભૂમ્ના
પરમસુકૃતિનોઽમૂન્ નાથ ! મન્યામહે તાન્ ॥ ૫.૧૯॥

તવગુણગણલીલાકીર્તનેષુ પ્રસક્તે-
ષ્વથ વિગલિતદેહાદિસ્મૃતિર્વીતલજ્જઃ ।
હસતિ લપતિ ગાયત્યુચ્ચકૈઃ કિઞ્ચ નૃત્ય-
ત્યલમજિત ! બતોન્માદીવ હા લોકબાહ્યઃ ॥ ૫.૨૦॥

અમરપરિવૃઢત્વં વા ૧રસાયાઃ પતિત્વં
　　કમલભવપદં વા યોગસિદ્ધીશ્ચ બહ્વીઃ ।
તૃણમિવ હૃદિ મત્વા ત્વત્કથાયામજસ્રં
　　મુરમથન ! રમન્તે સાધવસ્તદ્રસજ્ઞાઃ ॥ ૫.૨૧॥

૧. ભૂમેઃ ।

ભવતિ હિ ભુવિ સક્તિર્લૌકિકેષ્વત્ર પુંસા-
　　૧મપિ પરમખિલાનાં ભોગિશાયિન્ ! રસેષુ ।
અમિતસુકૃતપુત્રૈરેવ ચાલૌકિકે વૈ
　　૨કુતુકમિહ રસે ત્વદ્ભક્તિરૂપે ૩સમીયાત્ ॥ ૫.૨૨॥

૧. અસ્ય અખિલામિત્યનેન સમ્બન્ધઃ । ૨. અભિલાષઃ । ૩. ઉપનમેત્ ।

જગતિ ભવતિ વિશ્વેષાં રસાનાં સમૂહઃ
　　સુનિયતમતિતુચ્છો યદ્રસાપેક્ષયાહો ।
તમિહ રસમવાપ્તું ભક્તિસંજ્ઞં નિપીયા-
　　ચ્યુત ! ચરિતસુધાં તે કઃ પટુઃ સ્તોકપુણ્યઃ ॥ ૫.૨૩॥

યદિ ન વહતિ સર્વેભ્યો ૧વરીયસ્તરત્વં
　　મુરમથન! રસેભ્યો ભક્તિસંજ્ઞો રસોઽસૌ ।
જહુરહહ કિમર્થં લિપ્સયા તસ્ય ભૂપા
　　ધનમપિ નનુ રાષ્ટ્રં ચાથ ભોગાન્ સમસ્તાન્ ॥ ૫.૨૪॥

૧. અતિશયેન ઉરુત્વમ્ । ભૂયસ્તરશબ્દવચ્ચ વરીયસ્તરશબ્દો બોધ્યઃ ।

વરદ ! જનપદે વા યત્ર સઙ્કીર્ત્યતે તે
　　નનુ ચરિતસુધા સા સાદરં પ્રત્યગારમ્ ।
નરપતિરપિ તત્રત્યઃ પ્રજાશ્ચાથ સર્વાઃ
　　સુનિયતમનુભાવાત્ પાવિતાઃ સ્યુર્હિ તસ્યાઃ ॥ ૫.૨૫॥

અપિ ચ ભુવિ પુમાન્ યઃ કારયત્યુચ્ચકૈસ્તે
　　મુરમથન ! કથાયાઃ કીર્તનં સ્વીયગેહે ।
નિજપતિગુણલીલાસ્વાદતુષ્ટાથ પદ્મા
　　તમિહ બત વિધત્તે સર્વસમ્પત્સમૃદ્ધમ્ ॥ ૫.૨૬॥

બહુભિરિહ તપોભિર્વર્ષ્મણઃ ક્લેશસાધ્યૈ-

રપિ બત પુરુષાર્થા યેઽનવાપ્યા ઇમેઽપિ ।
દૃઢમિહ વશગાઃ સ્યુર્લબ્ધભક્તેસ્ત્વયીશે
કિમુત ભુવનબન્ધો ! સમ્પદશ્ચઞ્ચલાસ્તાઃ ॥ ૫.૨૭॥

અઘશમન ! તથાપિ ત્વત્પદે લબ્ધભક્તિ-
સ્તૃણમિવ મનુતે યત્ સમ્પદશ્ચાશ્રમાપ્તાઃ ।
તદિહ ન ખલુ ચિત્રં પ્રાપ્ય રત્નં ત્વનર્ઘં
ક ઇવ જગતિ કાચં ચેતનઃ ૧શ્રદ્દધીત ॥ ૫.૨૮॥

૧. આદ્રિયેતેત્યર્થઃ ।

દ્રઢયતિ નનુ ભક્તિં તાં જનાનાં કથા તે
તવ ગુણગણલીલાભિર્જગન્મઙ્ગલાભિઃ ।
મધુરરસવિમિશ્રં ભેષજં બાલકાનાં
કલયતિ ગદશાન્તિં યદ્વદીશાશ્રમેણ ॥ ૫.૨૯॥

તત ઇહ નનુ મર્ત્યૈઃ સર્વથા સર્વકાલે-
ષ્વપિ ભવમયસિન્ધોઃ પારમાપ્તું સયત્નૈઃ ।
તવ ચરિતસુધૈવાત્યન્તમાસ્વાદનીયા
નિખિલવિષયજાલાવાઙ્મુખૈઃ સાન્દ્રમોદમ્ ॥ ૫.૩૦॥

૧મુરમથન! ૨તદર્થં તાવકેષ્વાલયેષુ
પ્રતિદિનમથવાહો ગેહસીમ્નિ સ્વકીયે ।
ત્વયિ રતહૃદયેનેશેહ ભૂમીસુરેણા-
ચ્યુત ! પઠનમઘઘ્નં કારયેત્ ત્વત્કથાયાઃ ॥ ૫.૩૧॥

૧. ભગવત્કથાગ્રન્થો યત્ર યેન યથા પઠનીયઃ, ગ્રન્થસ્ય પઠિતા
પઠનકારયિતા શ્રોતા ચ યદ્ગુણક ઇષ્યતે, તદેતત્ સર્વં
સપરિકરમસ્માત્ પદ્યાત્ પ્રભૃતિ પઞ્ચત્રિંશતા પદ્યૈઃ પ્રતિપાદ્યતે ।
૨. ભવસિન્ધુપારપ્રાપ્ત્યર્થમ્ ।

સુરભિલસુમવૃન્દૈશ્ચાથ દીપૈરનર્ઘૈ-
રપિ પરમુપહારૈશ્ચાથ નાનાપ્રકારૈઃ ।
મનસિ સુદૃઢભક્ત્યા નાથ! વર્યો સપર્યા
સવિનયમતિવેલં કારયેત્ ૧પુસ્તકસ્ય ॥ ૫.૩૨॥

૧. ત્વચ્ચરિતપરસ્ય ભાગવતાદિગ્રન્થસ્ય ।

પ્રતિદિનમપિ દદ્યાચ્છાકસૂપાદિમિશ્રં
      પુરુદધિઘૃતદુગ્ધં તણ્ડુલં ચાથ ૧તસ્મૈ ।
તવ ચરિતસુધાયા ધારયા શ્રોતૃકર્ણા-
      નજિત ! નનુ પુનાનાયાદરેણ દ્વિજાય ॥ ૫.૩૩॥

૧. સપર્યાકર્ત્રે ।

અપિ ૧ભવદવતારપ્રષ્ઠદિવ્યપ્રસઙ્ગે-
      ષ્વજિત ! વિરતિષૂચ્ચૈઃ સ્કન્ધકાધ્યાયયોર્વા ।
મુરહર! સવિશેષં કારયેરન્મણ્ડનાનિ
      પ્રચુરકદલિકાભિઃ પુષ્પમાલાગણૈશ્ચ ॥ ૫.૩૪॥

૧. ભવદવતારપ્રષ્ઠા ભવદવતારમુખા યે દિવ્યાઃ પ્રશસ્તાઃ
પ્રસઙ્ગા વાચનપર્યાયપ્રાપ્તાઃ પ્રઘટ્ટકાસ્તેષુ ।
૨. અલઙ્કારાન્ , અર્થાચ્ચરિતપઠનધિષ્ણ્યસ્ય ।

તદનુ પરિસમાપ્તૌ ત્વત્કથાકીર્તનસ્ય
      પ્રમુદિતમતિરુચ્ચૈર્ભૂસુરાણાં શુચીનામ્ ।
ભુજગશયન ! કુર્યાત્ તૃપ્તિમન્નેન તાવત્
      ૧સુરુચિભિરુપદંશૈરન્વિતેનાદરેણ ॥ ૫.૩૫॥

૧. શોભના રુચિર્ભોક્તૄણાં યેષુ તૈઃ ।

દ્વિજમપિ તવ ગાથાવાચકં પૂજયિત્વા
      મલયજસુમમાલ્યૈરર્ઘ્યપાદ્યૈશ્ચ ભક્ત્યા ।
મુદિતમજિત ! કુર્વંસ્તં નમેદ્દક્ષિણાભિ-
      ર્વસનવરદુકૂલૈર્વિત્ત૧શાઠ્યં વિનૈવ ॥ ૫.૩૬॥

૧. ધનલોભમિત્યર્થઃ ।

દ્વિજવર! વદનાત્ તે નિસ્સૃતામદ્ય ગાથાં
      મુરમથિતુરિહાકર્ણ્યાસ્મિ જાતઃ કૃતાર્થઃ ।
ઇતિ મધુરવચોભિઃ પ્રીણયેચ્ચૈનમુચ્ચૈઃ
      સવિનયમથ વીતચ્છદ્મલેશં શુભાર્થી ॥ ૫.૩૭॥

૧તદનુ વિરચયંસ્તં સાધુરથ્યાનાધિરૂઢં
      દ્વિજમયિ તવ ગાથાવાદિનં પ્રીતિપૂર્વમ્ ।
વિમલનિગમઘોષેણાથ વાદિત્રનાદૈ-

રપિ સમમમુમાશુ પ્રેષયેદસ્ય ગેહમ્ ॥ ૫.૩૮॥

૧. સુરભિલસુમેત્યાદિભિરેતદન્તૈઃ શ્લોકૈઃ પ્રતિપાદિતઃ પુસ્તકતત્પઠિતૃપૂજાક્રમો વઞ્ચિમહારાજૈરદ્યાપિ પ્રાયેણાનુવર્ત્યતે ।
૨. યાનં શિવિકાદિ ।

ભવતિ નિગમવિજ્ઞાગ્રેસરોઽથ દ્વિજન્મા
વિજયમથ નરેન્દ્રશ્ચાપ્નુયાદ્યુદ્ધભૂમૌ ।
દ્રવિણમમિતમાપ્નોતીહ વૈશ્યશ્ચ ભક્ત્યા
તવ ચરિતમિહાકર્ણ્યાશુ શુદ્રોઽપિ સૌખ્યમ્ ॥ ૫.૩૯॥

ઇતિ સકૃદપિ યો વા નાથ ! મર્ત્યઃ કથાં તે
નિશમયતિ હૃદમ્ભોજોલ્લસદ્ભક્તિભૂમા ।
સ ઇહ સકલવન્દ્યો દૂરિતઃ સર્વપાપૈ-
સ્તવ દયિતતમશ્ચ સ્યાદલં વીતશઙ્કમ્ ॥ ૫.૪૦॥

યદિ ન ભવતિ શક્તઃ કર્તુમેવં કથાયાઃ
શ્રવણમયિ ધનસ્યાભાવતસ્તર્હિ મર્ત્યઃ ।
મુરહર! પરમુચ્ચૈર્હન્ત યત્નેન ગત્વા
સદસિ નનુ સતાં તાં શશ્વદાકર્ણયેત ॥ ૫.૪૧॥

અનુદિનમિહ યાવચ્છક્તિ પુષ્પં ફલં વા
સકુતુકમુપહારં કલ્પયન્ પુસ્તકાય ।
સ્ફુરદુરુતરભક્ત્યા નાતિદૂરે ચ તિષ્ઠન્
મુકુલિતકરયુગ્મઃ સ્યાત્ કથાકર્ણનાર્થી ॥ ૫.૪૨॥

તુરગવદતિલોલં સ્વં પ્રકૃત્યૈવ ચેતો
૧વશમલમુપનેતું જ્ઞાનભાજાપ્યશક્યમ્ ।
વિષયવિપિનમાર્ગાત્ સન્નિવર્ત્યાતિવેલં
ચરિતનિશમને તે સક્તમુચ્ચૈર્વિદધ્યાત્ ॥ ૫.૪૩॥

પુનરતિવિફલાભિઃ કણ્ઠશોષૈકદાભિ-
ર્મુરહર! તવ ગાથાકર્ણનાય પ્રવૃત્તઃ ।
ન હિ રકિમપિ નયેત વ્યર્થમેવાત્ર કાલં
હહહ કલુષવાર્તાભિઃ પરં લૌકિકીભિઃ ॥ ૫.૪૪॥

૧. આયત્તત્વમ્ । ૨. ઈષદપિ ।

યદુદિતમિહ ગાથાવાચકેન દ્વિજેન
    સ્ફુરદુરુતરભક્ત્યા તત્ સદોપાદદીત ।
શમલશમનદક્ષત્વત્કથાવાદિનં તં
    ગુરુરયમિતિ સમ્યઙ્માનસે ભાવયેત ॥ ૫.૪૫॥

પ્રકટયિતુમપિ સ્વં શાસ્ત્રવૈદુષ્યમદ્ધા
    સદસિ સમુપવિષ્ટે માધવ! શ્રોતૃવૃન્દે ।
ન ચ કિમપિ વિદધ્યાચ્છુષ્કવાદં કથાયા
    મુરહર! કથયિત્રા ન્યૂનવિઘ્નેન વાપિ ॥ ૫.૪૬॥

અપિ ચ મનુજબુદ્ધ્યા યસ્ત્વવજ્ઞાં વિધત્તે
    ૧ભવતિ ભવપરીતાપૌઘવિચ્છેદશૌણ્ડે ।
બહુષુ વિરચિતાસ્તાસ્તેઽવતારેષુ લીલા
    મુરમથન! નિશમ્ય દ્રાગસૌ ૨નારકઃ સ્યાત્ ॥ ૫.૪૭॥

૧. ત્વયિ । ૨. નરકસમ્બન્ધી ।

તત ઇહ નિખિલેશઃ શ્રીહરિઃ શિષ્ટદુષ્ટા-
    વનનિહતિવિધાનાયાવતીર્ણો ધરણ્યામ્ ।
ઇતિ દૃઢતરભક્ત્યા નાથ! તુષ્યેત્ કથાયાં
    તવ તુ વિગલદશ્રુશ્ચાથ રોમાઞ્ચિતાઙ્ગઃ ॥ ૫.૪૮॥

પ્રકટિતમયિ ભક્તેષ્વન્વહં તેષુ તેષુ
    સ્ફુટમશરણબન્ધો! તે દયાલુત્વમુચ્ચૈઃ ।
શ્રવણયુગલપાત્ર્યા સમ્યગાસ્વાદ્ય ભક્તિં
    ભવતિ નિરુપધિં દ્રાગ્ વિશ્વમૂર્તૌ વિદધ્યાત્ ॥ ૫.૪૯॥

અપિ પરમિતરેભ્યો વર્ણયંસ્તાઃ કથાસ્તે
    જગદઘહૃતિદક્ષાઃ સાધુ કાલં નયેત ।
ઇતિ તવ તુ કથાયામેવ સક્તોઽત્ર મર્ત્યો
    વિગલિતવિચિકિત્સં મોદમાપ્નોત્યનન્તમ્ ॥ ૫.૫૦॥

અથ કથયિતુમદ્ય પ્રારભેઽહં ગુણાનાં
    ૧સમુદયમુચિતં હિ શ્રીપતે ! શ્રોતૃવક્ત્રોઃ ।
તવ નતજનબન્ધોર્નાથ! કારુણ્યલેશા-
    દિહ નિખિલજનાનાં જ્ઞાનદાનપ્રવીણાત્ ॥ ૫.૫૧॥

૧. શ્રોતુશ્ચ વક્તુશ્ચાનુરૂપમ્ ।

યદિ ન ભવતિ સામ્યં શ્રોતૃવક્ત્રોર્ગુણાનાં
ભવતિ ન રસલબ્ધિસ્તર્હિ પાઠે શ્રુતૌ વા ।
અજિત ! તત ઇહેષ્ટૌ તૌ સમાનૌ ગુણેન
ત્વયિ વિધૃતમનસ્કૌ ત્વત્કથાસ્વાદલોલૌ ॥ ૫.૫૨॥

ઇહ હિ જગતિ વક્તા તે કથાયાસ્તુ ભૂયા-
દઘશમનપરાયા નાતિનીચોચ્ચશબ્દઃ ।
ન ચ વરદ ! વિલુબ્ધો નાપ્યસૂયાદિદુષ્ટો
ન ચ પુનરલસો વા નાપ્યહો ક્રોધશાલી ॥ ૫.૫૩॥

ન ચ ભવિતુમિહાર્હત્યેષ યોષાજિતાત્મા
ન ચ વિગતતમોભિઃ સાધુભિર્વૈરકારી ।
ન ચ મદકલુષીભૂતાશયો નાપ્યદાન્તો
ન ચ કુટિલમતિર્વા નો નૃશંસશ્ચ જાતુ ॥ ૫.૫૪॥

વિરહિત ઇહ દોષૈરીદૃશૈરીશ! વક્તા
ત્વયિ દૃઢતમભક્ત્યા દૂરિતાશેષપાપઃ ।
સુજનસદસિ મોદાદેત્ય દિવ્યાસનસ્થ-
સ્તવ મહિતકથાયાઃ પ્રારભેતાઙ્ગ ! પાઠમ્ ॥ ૫.૫૫॥

મધુમથન ! તથૈવાદ્યન્તનિષ્ઠં તુ પદ્યં
વરદ ! તવ કથાયાં સ્કન્ધકાધ્યાયયોર્વૈ ।
સકુતુકામહ દેવ! દ્વિઃ પઠેત્ ૧સોઽથવા ત્રિઃ
પ્રણતિમથ વિદધ્યાત્ પ્રચ્છકઃ શ્રાવકશ્ચ ॥ ૫.૫૬॥

૧. કથાવક્તા ।

અજિત ! ગુણસમૂહૈરી૧દૃશૈરેવ યુક્ત-
સ્ત્વયિ ૨રતહૃદમાની માધવાહેતુવાદી ।
વરદ ! તવ કથાયાઃ સારસઙ્ક્ષેપદક્ષો
ભવતિ જગતિ મર્ત્યઃ શ્રોતૃમુખ્યોઽત્ર નૂનમ્ ॥ ૫.૫૭॥

૧. વક્તુરુક્તૈઃ । ૨. સક્તમનાઃ ।

ય ઇહ ભવતિ વક્તા સાત્ત્વિકઃ સ પ્રશસ્તો
દનુજમથન ! મધ્યો રાજસસ્તામસોઽન્ત્યઃ ।

ભવતિ નનુ વિભાગઃ શ્રોતુરપ્યેવમેવ
　　ત્રિદશનુત! ગુણાનાં ભેદતસ્તુ ત્રયાણામ્ ॥ ૫.૫૮॥

ય ઇહ જગતિ કૃત્સ્નં ત્વત્કથાયાઃ કિલાર્થં
　　સ્વરરસભરભાવૈરન્વિતં સમ્પ્રકાશ્ય ।
સ્ફુટમહહ સભાયાં શ્રાવયેદ્વીતશઙ્કં
　　સ ભવતિ કિલ મર્ત્યઃ સાત્ત્વિકો નાથ! વક્તા ॥ ૫.૫૯॥

અપિ સકલમજાનંસ્ત્વત્કથાયાઃ કિલાર્થં
　　સ્ફુટમધિકમનોજ્ઞેનાન્વિતં ચ સ્વરેણ ।
સદસિ સકુતુકં યઃ શ્રાવયેદત્ર મર્ત્યઃ
　　સ ભવતિ નનુ વક્તા રાજસો વારિજાક્ષ !॥ ૫.૬૦॥

તવ ચરિતસુધાયા યસ્ત્વિહાબુધ્યમાનઃ
　　કિમપિ સરસમર્થં નિર્ભરજ્ઞાનહેતુમ્ ।
વિરહિતરસલેશં ચાસ્ફુટં શ્રાવયેદ્વૈ
　　સ ભવતિ ભુવિ વક્તા તામસશ્ચાધમશ્ચ ॥ ૫.૬૧॥

મનસિ સુદૃઢભક્ત્યા સર્વકર્માણિ હિત્વા
　　૧પરિલસદુરુમોદં યઃ પુમાનાર્ત્તબન્ધો ! ।
નિશમયતિ કથાં તે દક્ષિણાં ચેહ દત્વા
　　વિધિવદજિત ! સ શ્રોતા સ્મૃતઃ સાત્ત્વિકોઽસૌ ॥ ૫.૬૨॥

૧. નિશમનક્રિયાવિશેષણમિદમ્ ।

પુનરજિત ! સમોદં યઃ પ્રસઙ્ગાચ્છૃણોતિ
　　પ્રવિતતભવબાધાહારિણીં તાં કથાં તે ।
તનુમપિ ચ દદાનો દક્ષિણાં વાચકાય
　　સ્મૃત ઇહ ભુવિ સ શ્રોતા ભૃશં રાજસોઽસૌ ॥ ૫.૬૩॥

વિરહિત ઇહ ભક્ત્યા કૌતુકેનાપિ યો વા
　　નિશમયતિ કથાં તે હેતુવાદ્યર્થગર્હી ।
અલસમતિરપીશ! ક્રોધનો દક્ષિણાં વા
　　દિશતિ ભુવિ ન વા શ્રોતા ભવેત્ તામસોઽસૌ ॥ ૫.૬૪॥

અયમધમતમોઽપિ શ્રોતૃષુ ત્વત્કથાયાઃ
　　ફલમિહ ભુવિ કિઞ્ચિત્ પ્રાપ્નુયાત્ તેઽનુભાવાત્ ।

કલશજલધિતીરં સંશ્રિતો દુગ્ધબિન્દોઃ
 કણમપિ ન કિમાપ્નોતીશ ! લોકે ખલોઽપિ ॥ ૫.૬૫॥

૧મુરમથન ! પુરાણાનીહ સન્ત્યેવ યુષ્મ-
 ન્નવગુણગણલીલાવર્ણનૈર્ભાસિતાનિ ।
જગતિ જયતિ તત્રાપ્યસ્તપાપં તુ તદ્ભા-
 ગવતમિહ પુરાણં યત્ ૨ત્વયૈવ પ્રણીતમ્ ॥ ૫.૬૬॥

૧. ઇત આ શતકાન્તાદ્ભાગવતપુરાણસ્ય મહિમોપશ્લોક્યતે ।
૨. વ્યાસરૂપેણેત્યર્થઃ ।

અમરવિટપિનો વૈ વેદરૂપસ્ય દિવ્યં
 ફલમિહ શુકવક્ત્રાન્નિસ્સૃતં તદ્રસાર્દ્રમ્ ।
શ્રુતિપુટયુગલેન સ્વૈરમાસ્વાદ્ય તદ્ભા-
 ગવતમયમજસ્રં કે ન તુષ્યન્તિ સન્તઃ ॥ ૫.૬૭॥

ઇહ જગતિ બહૂન્યેવાઙ્ગ! શાસ્ત્રાણિ સન્તિ
 સ્ફુટમહહ વિવાદસ્થાનભૂતાનિ કિં તૈઃ ।
૧ભવતિ ભુવનબન્ધૌ ભક્તિમાપ્તું વિના ભા-
 ગવતમિહ હિ શાસ્ત્રં સ્યાત્ કિમન્યત્ સમર્થમ્ ॥ ૫.૬૮॥

૧. ત્વયિ ।

અપિચ જગતિ યે નામાન્યશાસ્ત્રેણ તદ્ભા-
 ગવતમિહ હિ શાસ્ત્રં મન્વતે હન્ત તુલ્યમ્ ।
વિગલિતવિચિકિત્સં દૈવમેવૈષુ ૧ભૂયાદ્-
 વિમુખમતિઘનાજ્ઞાનાન્ધકારાવૃતેષુ ॥ ૫.૬૯॥

૧. ભવનં કવિરાશાસ્તે મન્વાનાનામાક્રોશાર્થમ્ ।

પ્રચુરદુરિતપઙ્કેનાવિલેઽસ્મિન્ કલૌ ભા-
 ગવતમિહ યદિ સ્યાન્નો સતાં તાપહારી ।
ગતિરથ ભુવિ પુંસાં કા ભવેન્નષ્ટદૃષ્ટે-
 રિવ વનભુવિ રાત્રૌ રિક્તસાર્થસ્ય સદ્યઃ ॥ ૫.૭૦॥

અસુલભમિહ યત્નાન્મર્ત્યજન્માધિગમ્યા-
 પ્યજિત ! જગતિ યે વા માનવાઃ પાપભાજઃ ।
દિવસમિહ નયન્ત્યાસ્વાદલેશં વિના ભા-

ગવતમયસુધાયાસ્તજ્જનિર્હા વૃથૈવ ॥ ૫.૭૧॥

યદિહ ભુવિ જનાનાં વાઞ્છિતં દેવ! કૃત્સ્નં
દિશતિ ચ દૃઢભક્તિં ત્વય્યશેષાધિનાથે ।
તદયિ બત વિનિન્દન્ત્યત્ર યે વા પુનર્ભા-
ગવતમહહ હેયા દૂરતસ્તે વિશઙ્કમ્ ॥ ૫.૭૨॥

ત્રિદિવભુવિ યથા વા નિર્જરાણાં મહેન્દ્રો
નભસિ નનુ યથા વા તારકાણાં હિમાંશુઃ ।
સુરસરિદપિ યદ્વન્નિમ્નગાનાં તથા ભા-
ગવતમપિ પુરાણાનાં નિકામં વરેણ્યમ્ ॥ ૫.૭૩॥

૧સુરભિરપિ ચ યદ્વદ્વિશ્વમૂર્તે! પશૂનાં
મુરમથન! તિથીનાં યદ્વદેકાદશી ચ ।
૨શ્રુતિમય ઇહ યદ્વત્ પક્ષભાજાં સુપર્ણો
ભવતિ નનુ પુરાણાનાં તથેદં વરેણ્યમ્ ॥ ૫.૭૪॥

૧. કામધેનુઃ । ૨. વેદમયઃ ।

સકલનિગમવેદાન્તાગમેષ્વદ્વિતીયો-
ઽપ્યવિહતધિષણો વા સર્વશાસ્ત્રેષુ વિદ્વાન્ ।
મનુજ ઇહ મુરારે! ત્વત્પ્રસાદં વિના ભા-
ગવતનિહિતમર્થં નૈવ જાનાતિ ગૂઢમ્ ॥ ૫.૭૫॥

અપિચ ભુવિ પુમાંસ્તત્પાઠગોષ્ઠ્યાં તુ યો વા
પ્રકટયતિ વિભુત્વં વાવલેપં દુરાત્મા ।
ધ્રુવમિહ હિ મનુષ્યાસ્તસ્ય સમ્પર્કભાજો-
ઽપ્યલમઘસમુદાયસ્યાસ્પદત્વં વ્રજન્તિ ॥ ૫.૭૬॥

પ્રથમ ઇહ તથૈવાસ્ય૧ દ્વિતીયશ્ચ પાદૌ
ભવતિ નનુ તૃતીયો વૈ ચતુર્થસ્તથોરૂ ।
સ્મૃત ઇહ કિલ નાભિઃ પઞ્ચમશ્ચાથ ષષ્ઠો
હૃદયમપિ ચ બાહૂ સપ્તમશ્ચાષ્ટમશ્ચ ॥ ૫.૭૭॥

૧. ભાગવતસ્ય ।

નવમ ઇહ તદીયઃ કણ્ઠદેશસ્તથાસ્યં
ભવતિ હિ દશમોઽસ્ય ત્વત્કલીલારસાર્દ્રઃ ।

નિટિલતટમપિ સ્યાત્ તદ્વદેકાદશો દ્વા-
દશ ઇહ હિ શિખા સ્યાત્ સ્કન્ધ ઈશાસ્ય શૌરે ! ॥ ૫.૭૮॥

ઇતિ ખલુ પૃથગઙ્ગૈઃ સ્કન્ધરૂપૈસ્તુ તૈર્દ્વા-
દશભિરપિ સમેતોઽયં પુરાણાવતંસઃ ।
કૃત ઇહ ભવતૈવ વ્યાસરૂપેણ ભક્તિં
જનયિતુમયિ પુંસાં ભૂયસે શ્રેયસે સ્યાત્ ॥ ૫.૭૯॥

અથ ફણિવરશાયિન્ ! સાધવો નૈવ કે કે
૧ભવતિ ધૃતમનસ્કાસ્ત્વેતદાકર્ણ્ય સદ્યઃ ।
હૃદિ જનિતવિરાગજ્ઞાનભક્તિપ્રકર્ષા-
સ્તવ નનુ ૨કૃપયાઽઽપ્તા મોદભારં ત્વપારમ્ ॥ ૫.૮૦॥

૧. ત્વયિ । ૨. નૈવાપ્તા ઇતિ સમ્બન્ધઃ, કિન્તુ પ્રાપ્તા એવેત્યર્થઃ ।

ભુજવિધૃતરથાઙ્ગેનાલમઙ્ગુષ્ઠમાત્રે-
ણ હિ નનુ ભવતા દ્રૌણ્યસ્ત્રતો માતૃગર્ભે ।
૧અવિત ઇહ પુરા યઃ ૨સોઽથ જાતોઽન્વવાયં
ભુવનવિદિતમુચ્ચૈર્મણ્ડયન્ પાણ્ડવાનામ્ ॥ ૫.૮૧॥

૧. રક્ષિતઃ । ૨. પરીક્ષિત્ ।

પરિત ઇહ ૧વલન્તં ગર્ભદેશે ભવન્તં
૨ત્વકલયદિતિ ૩વાહો તત્ર દૃષ્ટેન તુલ્યઃ ।
ક ઇતિ ભુવિ ૪પરીક્ષેતેતિ વા ધર્મજસ્તં
સમતનુત પરીક્ષિત્સંજ્ઞકં સાધુ પૌત્રમ્ ॥ ૫.૮૨॥

૧. સઞ્ચરન્તમ્ ।  સ્ફાયદિતિવત્ પરસ્મૈપદમ્ ।
૨. ઐક્ષતેત્યર્થઃ ૩. આહો ઇતિ પક્ષાન્તરે ।
૪. એવં ચોભયથા પરીક્ષિચ્છબ્દો વ્યુત્પાદિતો ભવતિ
“ગર્ભે પરિતશ્ચરન્તં કૃષ્ણમૈક્ષત” ઇતિ,
“ગર્ભદૃષ્ટદેવસંવાદી ક ઇતિ ભુવિ પરીક્ષેત” ઇતિ ચ ।

તદનુ નનુ વિવૃદ્ધં પૂર્વપક્ષેન્દુવત્ તં
વયસિ સમુચિતે પ્રાપ્તેઽથ રાજ્યેઽભિષિક્તમ્ ।
વ્યતનુત હૃદિ વાત્સલ્યાન્વિતશ્ચાજમીઢ-
શ્ચતુરુદાધિપરીતાં સોઽપિ ભૂમિં શશાસ ॥ ૫.૮૩॥

અથ પરમુપયેમે તામિરાવત્યભિખ્યાં
 નરપતિતિલકોઽસાવુત્તરસ્યેશ ! પુત્રીમ્ ।
પુનરિહ જનયામાસાથ તસ્યાં તનૂજાં-
 શ્ચતુર ઇહ મનોજ્ઞાનાત્મતુલ્યાન્ મુરારે ! ॥ ૫.૮૪ ॥

નરપતિરપિ સોઽયં તં કૃપાચાર્યમદ્ધા
 નિજગુરુમથ કૃત્વા જાહ્નવીતીરદેશે ।
ભવતિ વિધૃતચેતાસ્ત્વાજહારાશ્વમેધ-
 ત્રિતયમલમકામઃ સર્વસમ્પત્સમૃદ્ધઃ ॥ ૫.૮૫ ॥

તદનુ સ તુ નિશમ્ય સ્વીયરાજ્યે પ્રવિષ્ટં
 કલિમહહ વિજેતું તં વિનિશ્ચિત્ય બાઢમ્ ।
અસિતતુરગયુક્તં સ્યન્દનં સ્વં મૃગેન્દ્ર-
 ધ્વજયુજમધિરૂઢો દિગ્વિજિત્યૈ પ્રતસ્થે ॥ ૫.૮૬ ॥

અથ મુરહર! જિત્વા મઞ્જુ ભદ્રાશ્વકાદીન્
 ૧બલિમપિ જગૃહેઽસૌ નાથ ! તેભ્યો મહાત્મા ।
અપિચ સ તુ મહિમ્નો ગાયકાન્ વૈ ૨સ્વકેષાં
 તવ ચ ધનસમૃદ્ધાન્ વ્યાતનોદ્ભક્તિશાલી ॥ ૫.૮૭ ॥

૧. કરમ્ । ૨. પાણ્ડવાનામ્ ।

ઇતિ ખલુ નરપાલો દિગ્જયોત્કઃ સ ધર્મં
 ૧વૃષતનુમપિ પૃથ્વીં દેવ! ગોરૂપયુક્તામ્ ।
અકરુણમિહ પદ્ભ્યાં હન્યમાનાવપશ્ય-
 ૨ન્નિરવધિ કલિનાહો શૂદ્રરૂપેણ દીનૌ ॥ ૫.૮૮ ॥

૧. વૃષભરૂપમ્ । ૨. દીધાત્વર્થે વિશેષણમિદમ્ ।

અભયમથ વચોભિઃ સાન્ત્વપૂર્વૈઃ સ ૧તાભ્યાં
 નૃપતિરિહ વિતીર્ય શ્રીશ! હન્તું કલિં તમ્ ।
વિધૃતમતિરસિં દ્રાગાદદે યાવદેષો-
 ઽચ્યુત ! શરણમુપાગાત્ તાવદેતં સ ભીતઃ ॥ ૫.૮૯ ॥

૧. પૃથ્વીધર્માભ્યામ્ ।

સપદિ સ શરણપ્રાપ્તાવને બદ્ધદીક્ષઃ
 સ્વવસતિપદમુચ્ચૈર્યાચમાનાય તસ્મૈ ।

નૃપતિરથ વિતીર્ય ધૂતહેમાઙ્ગનાદ્યં
 ૧પદમપિ ગમયામાસાશુ રાષ્ટ્રાન્નિજાત્ તમ્ ॥ ૫.૯૦॥

૧. વાસસ્થાનમિત્યર્થઃ ।

વૃષતનુમપિ ધર્મં સત્યરૂપૈકપાદં
 ત્રિભિરહહ તપશ્શૌચાનુકમ્પામયૈસ્તૈઃ ।
નૃપતિરથ સ પાદૈર્યોજયિત્વા વિધાય
 ક્ષિતિમપિ ગતખેદાં પાલયામાસ કૃત્સ્નામ્ ॥ ૫.૯૧॥

તદનુ સ તુ કદાચિત્ સ્વૈરમાખેટ૧સક્તઃ
 કરકલિતશરાસઃ પર્યટન્ કાનનાન્તમ્ ।
અરુણકિરણતપ્તઃ ક્ષુત્પિપાસાકુલો હ્ય-
 ઙ્ગિરસ ઇહ મહર્ષેરાશ્રમં સઞ્જગામ ॥ ૫.૯૨॥

૧. મૃગયાપરઃ ।

મુનિમહહ સમાધૌ સુસ્થિતં મીલિતાક્ષં
 નરપતિરથ દૃષ્ટ્વા તત્ર તોયં યયાચે ।
સ તુ ભવતિ પરાત્મન્ ! ન્યસ્તચેતાસ્તદાનીં
 કિમપિ ન ગિરમેતસ્યાશ‍ૃણોદ્ભૂમિભર્તુઃ ॥ ૫.૯૩॥

હૃદિ સમુદિતમન્યુસ્તાવદેવૈષ૧ કોટ્યા
 ધનુષ ઇહ ગતાસું વ્યાલમસ્યાંસદેશે ।
નરપતિરપિ નિક્ષિપ્યાશુ યાતઃ પુરીં સ્વા-
 મવમતમહહ સ્વં મન્યમાનો નિતાન્તમ્ ॥ ૫.૯૪॥

૧. પરીક્ષિત્ ।

તનય ઇહ મહર્ષેસ્તસ્ય શ‍ૃઙ્ગીતિ નામ્ના
 વિરચિતમપરાધં વીક્ષ્ય રાજ્ઞા સ્વતાતે ।
ઇત ઇહ દિવસે વૈ સપ્તમે તક્ષકોઽમું
 દશતુ વિનયહીનં ચેતિ કોપાચ્છશાપ ॥ ૫.૯૫॥

નરપતિરપિ શાપં તન્નિશમ્યાયમદ્ધા
 ધનતનયકલત્રાગારરાષ્ટ્રાદિષુ દ્રાક્ ।
સ્ફુટમુદિતવિરાગઃ સ્વીયપુત્રે ન્યધાત્ સ્વં
 ધૃતસુવિમલબોધો રાજ્યભારં મહાત્મા ॥ ૫.૯૬॥

અથ નૃપતિરસૌ પ્રાયોપવેશામિમિચ્છં-
      સ્તટભુવમભિસમ્પ્રાપ્યાશુ જહ્નોઃ સુતાયાઃ ।
અખિલવિષયવાઞ્છાં દૂરતો હન્ત હિત્વા
      ન્યવસદયિ ગુણાસ્વાદૈકબદ્ધસ્પૃહસ્તે ॥ ૫.૯૭॥

તદનુ સમભિજગ્મુસ્તત્ર વિશ્વં પુનાના
      મુરમથન! મુનીન્દ્રા નારદાદ્યાસ્તદાનીમ્ ।
ત ઇહ ભવતિ ભક્તિં તસ્ય દૃષ્ટ્વાતિમાત્રં
      પ્રમુદિતમનસસ્તં નાથ! શશ્વાધિરેડલમ્ ॥ ૫.૧૮॥

અજિત ! તદનુ તત્રોપાગમદ્વ્યાસપુત્રો
      ઝટિતિ સકલસન્દેહાપનોદૈકદક્ષઃ ।
નૃપતિરપિ ચ તસ્યૈવાસ્યપઙ્કેરુહાદ્ભા૧-
      ગવતમિહ નિપીય પ્રાપ મુક્તિં સુખેન ॥ ૫.૯૯॥

૧. ભાગવતસ્ય મકરન્દરૂપત્વં ગમ્યમ્ ।

તત ઇહ વિપુલાધિવ્યાધિકલ્લોલભાજો
      ઘનતરભવસિન્ધોઃ પારસમ્પ્રાપ્તિલોલૈઃ ।
વિરહિતવિષયેચ્છાલેશમમ્ભોજનાભા-
      ચ્યુત! ચરિતસુધૈવાસ્વાદનીયા ત્વદીયા ॥ ૫.૧૦૦॥

ઇતિ સ્વાતિશ્રીરામવર્મવઞ્ચિમહારાજવિરચિતાયાં
ભક્તિમઞ્જર્યાં પઞ્ચમશતકમ્ ।

## અથ ષષ્ઠશતકમ્ ।

અથાહં શ્રીભૂમીરમણ ! કથયામ્યદ્ય કિમપિ
      દ્વિતીયાં ત્વન્નામ્નામઘશમનસઙ્કીર્તનમયીમ્ ।
મુરારાતે ! ભક્તિં તવ કરુણયૈવાનતજન-
      સ્ફુટાજ્ઞાનધ્વાન્તપ્રકરહરણૈકપ્રથિતયા ॥ ૬.૧॥

અમેયં લોકેડસ્મિન્ રસભરમવાપ્નોતિ હિ પુમાન્
      ૧જપાદ્યેષ્વેકસ્મિન્નપિ વરદ! તે નામ્નિ કથિતે ।
રસાભિજ્ઞા નામ્નાં યદિ ભવતિ જિહ્વાત્ર ન નૃણાં
      ૨રસજ્ઞાખ્યામન્વર્થયિતુમથ શક્તા કથમસૌ ॥ ૬.૨॥

૧. જપહોમાદિષુ । ૨. રસજ્ઞેતિ નામધેયમ્ ।

ફલાદીન્યાસ્વાદ્યાચ્યુત ! સુમધુરાણીહ ભુવને
સમત્વં હ્યધ્યસ્ય૧ત્યથ યદમૃતેનૈષુ મનુજઃ ।
મુરારાતે! શાર્ઙ્ગિન્નિયમતિશયોક્તિસ્તદરમૃતં
ત્વસૌ સાક્ષાન્નામ્નાં કલયતિ તવાસ્વાદનવશાત્ ॥ ૬.૩॥

૧. ઇદં વાક્યારમ્ભે । ૨. સુધાં મોક્ષં ચ ।

રમાજાને! યસ્મિન્ ન હિ ભવતિ તૃપ્તિસ્તનુભૃતાં
તથાભૂતં વસ્તુ ત્રિજગતિ ન ખલ્વસ્તિ કિમપિ ।
ત્વદીયાનાં નામ્નાં મુરહર ! સમાસ્વાદનવિધૌ
મુનીન્દ્રા અપ્યાપુઃ કિમપિ ન હિ તૃપ્તિં શુકમુખાઃ ॥ ૬.૪॥

અઘાનાં વિચ્છિત્ત્યૈ મુરમથન ! યત્નં વિદધતાં
તપોભિઃ સંવીક્ષ્ય શ્રમમયિ જનાનાં કરુણયા ।
ત્વયૈવાયં સન્દર્શિત ઉચિતમાર્ગો નનુ સતાં
ત્વદીયાનાં નામ્નાં સુગમ ઇહ સઙ્કીર્ત્તનમયઃ ॥ ૬.૫॥

યથા માતા સ્વેષામહહ ગદશાન્તિં તનુભુવાં
વિધાતું ભૈષજ્યેન હિ સુમધુરેણૈવ યતતે ।
તથા પુંસાં પાપાન્યથ શમયિતું ત્વત્પ્રકટિતે
હ્યહો માર્ગે સક્તિં ક ઇહ ન વિદધ્યાદજ ! સુધીઃ ॥ ૬.૬॥

ગુણસ્તાવન્નૈસર્ગિક ઇહ મુરારે! મુખરતા
રસજ્ઞાયાઃ પુંસાં ગલિતવિચિકિત્સં યદિ તદા ।
અસદ્વાદેભ્યસ્તાં કથમપિ નિવર્ત્ત્યાચ્યુત! કુતો
ભવન્નામાસક્તાં ન હિ વિદધતે હન્ત મનુજાઃ ॥ ૬.૭॥

રસેભ્યઃ સર્વેભ્યોઽપ્યયિ બત વરિષ્ઠે હિ મધુરે
રસે જિહ્વા પ્રીતિં રચયતિ સમસ્તસ્ય જગતઃ ।
સુધાધારાતોઽપ્યચ્યુત ! સુમધુરે નામપટલી-
સમાસ્વાદે સક્તિં તવ ન દધતે ભાગ્યરહિતાઃ ॥ ૬.૮॥

સહસ્રાણાં નામ્નાં નનુ જગદઘધ્વંસનકૃતાં
ક્ષણાર્ધે ત્વેકસ્મિન્નપિ બત ગૃહીતે રસનયા ।
કૃતાર્થત્વં પ્રાપ્નોત્યલમિહ શરીરી કિમુ પુન-

હરે તેષામેવાનુદિનમિહ સઙ્કીર્તનપરઃ ॥ ૬.૯॥

તથા સદ્રત્નૌઘૈરપિ વિજિતસપ્તાશ્વરુચિભિઃ
કૃતા કણ્ઠાસક્તા સ્રગિહ મનુજં ભૂષયતિ નો ।
યથા માલા નામ્નામઘશમન ! કણ્ઠાભરણતાં
પ્રપન્ના તે શ્રીમન્નિરુપમકૃપાપૂરજલધેઃ ॥ ૬.૧૦॥

નિદાનત્વં પ્રાપ્તૈરનુદિનમનર્થસ્ય વચનૈ-
ર્નયન્ સર્વં કાલં ક્ષણમિહ ભવન્નામકથનાત્ ।
કથં ધૌતાઘઃ સ્યાદિતિ મમ ન સન્દેહકણિકા
કણો ૧વા કસ્તૂર્યા હરતિ નનુ દુર્ગન્ધમતુલમ્ ॥ ૬.૧૧॥

૧. વાશબ્દોઽપ્યર્થે દૃષ્ટાન્તે વા ।

સ્ફુલિઙ્ગઃ સૂક્ષ્મો વા દહતિ હિ યથા તૂલનિવહં
પરં તીવ્રાન્ રોગાન્ હરતિ ચ યથૈવૌ૧ષધમહો ।
યથા ધ્વાન્તં શાન્તિં નયતિ ગુરુ બાલો દિનમણિ-
સ્તથા પાપવ્રાતં હરતિ ભુવિ નામૈકમપિ તે ॥ ૬.૧૨॥

૧. અત્રાપિ સૂક્ષ્મપદં વિપરિણામેન સમ્બધ્યતે ।

સ વૈ સ્નાતસ્તીર્થેષ્વઘશમન ! સર્વેષુ મનુજઃ
સ યજ્ઞેષ્વદ્ધા દીક્ષિત ઇહ હિ સર્વેષુ વિધિવત્ ।
યદીયે જિહ્વાગ્રે નનુ દનુજવૈરિન્નનુદિનં
નિરસ્તાશેષાઘં પરિલસતિ નામૈકમપિ તે ॥ ૬.૧૩॥

અધર્માણાં મુખ્યાસ્પદમિતિ નિકામં ભુવિ સતાં
વિનિન્દાપાત્રત્વં પરમનુભવન્નપ્યથ કલિઃ ।
પ્રસૂતે સર્વાર્થાન્ વરદ ! તવ ૧નામગ્રહણતો
યતો ગ્રાહ્યસ્તસ્માદજનિ જગદારાધ્ય ! નિતરામ્ ॥ ૬.૧૪॥

૧. કૃતે યદ્ધ્યાયતો વિષ્ણું ત્રેતાયાં યજતો મખૈઃ ।
દ્વાપરે પરિચર્યાયાં કલૌ તદ્ધરિકીર્તનાત્ ॥ ઇતિ ભાગવતમ્ ।

ભજન્તે ત્વાં મર્ત્યા મુરહર! તપોભિઃ કૃતયુગે
યજન્તે ત્રેતાયામથ મખવરૈર્ભૂરિફલદૈઃ ।
નિષેવન્તે ત્વાં દ્વાપર ઇહ હિ તન્ત્રોક્તવિધિના
કલૌ નામ્નાં સઙ્કીર્તનમયિ સમાશ્રિત્ય સુધિયઃ ॥ ૬.૧૫॥

સમુદ્ભૂતા મર્ત્યા મુરહર! કૃતાદિષ્વપિ યુગે-
ષ્વહો યસ્ય પ્રાપ્ત્યૈ જનિમહહ વાઞ્છન્તિ હિ કલૌ ।
અથાસ્ય ત્વન્નામાસ્વદનમયપુણ્યસ્ય હિ તુલાં
સમારોઢું શૌરે! કિમિહ ભુવિ વસ્તુ પ્રભવતિ ॥ ૬.૧૬॥

અશક્તાનાં લોકે ચરિતુમજ! કર્માણિ વિમલા-
ન્યહો વેદોક્તાન્યુદ્ભટદુરિતશાન્ત્યૈ મધુરિપો ! ।
પરં શૂદ્રાદીનામપિ કુશલદોઽસૌ વિજયતે
સ્ફુટં નામાસ્વાદસ્તવ કૃપણલોકૈકસુહૃદઃ ॥ ૬.૧૭॥

અથાધ્યેતું વેદાન્ મુરહર! ષડઙ્ગૈરપિ યુતાં-
સ્તથાગ્નિષ્ટોમાદીનપિ નનુ વિધાતું ભુવિ મખાન્ ।
પરં કાલો નિર્દિષ્ટ ઇહ હિ મહદ્ભિસ્તવ રમા-
પતે! નામાસ્વાદસ્ત્વજ! સકલકાલેષુ વિહિતઃ ॥ ૬.૧૮॥

અભુક્ત્વા ભુક્ત્વા વા ફણિશયન ! સંસ્નાય વિધિવત્
ત્વથાસ્નાત્વા તિષ્ઠન્નુત નનુ શયાનોઽપ્યથ નરઃ ।
મુરારે! ગૃહ્ણીયાત્ ત્રિભુવનગતાઘૌઘશમને
સુનિષ્ણાતં નામ્નાં સમુદયમશઙ્કં તવ ભૃશમ્ ॥ ૬.૧૯॥

સલીલં સઁલ્લાપાદિષુ ચ સવયસ્કૈરપિ જનૈ-
સ્તથૈવૈકાન્તે વા સદસિ ૧ગમનાયાનસમયે ।
સુધાધારાસારસ્મયભરનિરાસૈકનિપુણં
હરે! નામોચ્ચાર્યં તવ રહિતસન્દેહમનિશમ્ ॥ ૬.૨૦॥

૧. ગતાગતકાલે ।

અબુદ્ધ્યા દેવાનુષ્ઠિતમિહ હિ કર્મૈકમપિ ન
વ્રજેદમ્ભોજાક્ષ ! ત્રિજગતિ ચ સાફલ્યમમલમ્ ।
ભવન્નામાસ્વાદસ્ત્વથ પુનરબુદ્ધ્યાપિ રચિતઃ
ફલપ્રાપ્ત્યૈ હેતુર્ભવતિ જગદારાધ્ય ! ભવિનામ્ ॥ ૬.૨૧॥

ઇહાજ્ઞાત્વા જ્ઞાત્વાપિ ચ ગુરુરુજા પીડિતતનુ-
ર્યથા મર્ત્યો દિવ્યૌષધમથ સમાસ્વાદ્ય સહસા ।
ભવેન્મુક્તો રોગૈર્મુરહર! તથા નામપટલી-
સમાસ્વાદસ્ત્વત્કો દિશતિ ૧શમબુદ્ધ્યાપિ રચિતઃ ॥ ૬.૨૨॥

૧. શં સુખમ્ ।

તથા ૧સઙ્કેતાર્થં વિશદમપહાસાર્થમપિ વા
 પુનર્નર્મોક્ત્યા વા વરદ ! તવ નામાવલિરહો ।
ગૃહીતા મર્ત્યાનામપહરતિ પાપં કિમુ પુન-
 ર્મનસ્સ્ફૂર્જદ્ભક્ત્યા ભુજગવરશાયિન્ ! નિગદિતા ॥ ૬.૨૩ ॥

૧. "સાઙ્કેત્યં પારિહાસ્યં વા સ્તોભં હેલનમેવ વા ।
વૈકુણ્ઠનામગ્રહણમશેષાઘહરં વિદુઃ ॥ (ભાગ । ૬. ૨. )

મુરારે! યત્નેનાપ્યહહ મહતા હિ ત્વદિતરાન્
 સુરાનારાધ્યાયં ભવતિ વિફલોદ્યોગ ઇહ વૈ ।
મનુષ્યસ્ત્વં તુ શ્રીરમણ ! નિજનિન્દાપરગિરા-
 મપિ સ્ફીતં શ્રેયો ૧દિશસિ કરુણાભારજલધે! ॥ ૬.૨૪ ॥

૧. તથા ચ ત્વામનુપાસીનો મનુષ્યો મૂઢ ઇતિ તાત્પર્યમ્ ।

અશામ્યદ્રોગાધિપ્રસભશિથિલીભૂતહૃદયો
 વિયુક્તો હન્ત સ્વૈરપિ ખલુ સુહૃદ્ભિશ્ચ વિજને ।
વને તિષ્ઠન્ મર્ત્યઃ સકૃદપિ ભવન્નામ કલયન્
 ભવેન્મુક્તો નૂનં સકલકદનૈઃ પૂર્વમુદિતૈઃ ॥ ૬.૨૫ ॥

સપત્નૈરત્યુગ્રાયુધપરિલસદ્બાહુભિરલં
 પરીતો વા યુદ્ધાઙ્ગણભુવિ સહાયૈર્વિરહિતઃ ।
પુનશ્ચોરૈર્વ્યાઘ્રાદિભિરપિ તથાભિદ્રુત ઇહા-
 લપંસ્તે નામાનિ વ્રજતિ મનુજો નૈવ વિપદમ્ ॥ ૬.૨૬ ॥

તથા રાજ્ઞા પ્રોદ્યન્નિરવધિકરોષાન્ધમનસા
 નિહન્તું ચાજ્ઞપ્તોઽપ્યુરુભયદકારાગૃહગતઃ ।
અપારે મજ્જન્ત્યામપિ ચ જલધૌ નાવિ તરસા
 જપંસ્તે નામાન્યચ્યુત ! શુચમવાપ્નોતિ ન પુમાન્ ॥ ૬.૨૭ ॥

સપુત્રઃ પુત્રાર્થી ભવતિ નરપાલોઽતિમહિત-
 સ્તથા રાષ્ટ્રાર્થી માધવ! નનુ સુખાર્થી સુખયુતઃ ।
યશસ્વી તલ્લિપ્સુર્ભવતિ સુકૃતેચ્છુશ્ચ સુકૃતી
 ન કિં કિં વા દદ્યાચ્છુભમહહ તે નામમહિમા ॥ ૬.૨૮ ॥

પ્રભાવેન શ્રીમન્નપિ ચ તવ નામ્નામિહ નરો

દરિદ્રોऽપિ સ્યાદ્ય૧ક્ષપતિસદૃશૈશ્વર્યનિલયઃ ।
તથા મન્દપ્રજ્ઞોऽપિ ચ ભવતિ વાચસ્પતિસમો
મુરારે! કિં પ્રાપ્યં કુશલમિહ મર્ત્યૈઃ પરમિતઃ ॥ ૬.૨૯॥

૧. યક્ષપતિઃ કુબેરઃ ।

બહૂક્ત્યા કિં સમ્મોચયિતુમિહ લોકે જનમમું
વિપદ્ભ્યઃ સર્વાભ્યસ્ત્વપિ ચ કુશલં દાતુમતુલમ્ ।
ન દક્ષસ્ત્વન્નામામૃતરસસમાસ્વાદનસુખાત્
પરો માર્ગો યત્ તન્મતિરિહ વિધેયા હિ સકલૈઃ ॥ ૬.૩૦॥

સમસ્તાપદ્દૂરીકરણપટુતૈકાધિવસતિં
તથા સીમાતીતપ્રચુરસુખવિશ્રાણનપરામ્ ।
ઇમાં ત્વન્નામાલીમયનવસુધાસાન્દ્રલહરીં
કથં શક્નોત્યાસ્વાદયિતુમવનૌ ભાગ્યરહિતઃ ॥ ૬.૩૧॥

રસજ્ઞાયાસ્તૃપ્તિં દિનમનુ સુધાંશોરયિ હરે !
કરેભ્યશ્ચ્યોતન્ત્યા દિવિ વિરચયન્તોऽપિ સુધયા ।
અમર્ત્યાસ્ત્વન્નામાસ્વદનનિરતેષ્વીશ! દધતે
યદીર્ષ્યાં ૧તત્તુલ્યં કિમિહ તદહો સર્વસુખદમ્ ॥ ૬.૩૨॥

૧. ત્વન્નામાસ્વાદનતુલ્યમ્ ।

સુખાવાપ્તિર્લોકે ન ભવતિ વિનૈવ શ્રમલવં
જનાનામિત્યાસ્તાં વરદ ! ભુવિ વાર્ત્તા મધુરિપો ! ।
સુખેનૈવાવામું સુખમયિ મનોવાગવિષયં
પટુર્માર્ગો રાજત્યયમિહ ભવત્કીર્ત્તનમયઃ ॥ ૬.૩૩॥

અટન્ સ્નાતું તીર્થેષ્વખિલદુરિતધ્વંસુઇષુ નરો
તૈર્વા ભૂયોભિઃ પરમકઠિનૈઃ કશિતતનુઃ ।
સુખં ચ ભુઙ્ક્તે તદિહ હિ વિનૈવ શ્રમલવં
ભવન્નામાસ્વાદે નિરતહૃદયો હન્ત લભતે ॥ ૬.૩૪॥

અકારાદ્યૈર્વર્ણૈઃ પરિણતશરીરા સુવિમલા
ગિરાં દેવી ભર્ત્રા કમલજનુષા સત્યભુવને ।
સ્થિતા સાર્ધં પદ્માસનભુવિ તથા નો સકુતુકા
યથા ત્વન્નામત્વં વિબુધરસનાગ્રેષુ ગમિતા ॥ ૬.૩૫॥

યથા ચેતોરમ્યં વહતિ નનુ માધુર્યમધિકં
 ૧સમત્વં સર્વત્રાપિ ચ વરદ ! ખણ્ડસ્ય શકલઃ ।
૨તથા ત્વન્નામ્નામચ્યુત ! નનુ સહસ્રં મધુરિપો !
 મિથઃ કિઞ્ચોત્કર્ષે વિગતવિચિકિત્સં કલયતિ ॥ ૬.૩૬॥

૧. તુલ્યાસ્વાદવિષયત્વમ્ । ૨. માધુર્યે સમત્વં ચ બહતીત્યર્થઃ ।

મુરારાતે! તેષ્વપ્યહિશયન ! નામસ્વયિ તવ
 સ્ફુટં નામાનિ દ્વાદશ વરદ ! મુખ્યાનિ ભગવન્ ! ।
અથૈતેષાં સઙ્કીર્તનધૃતરતેર્ભાગ્યમહિમા
 પરં ૧પારં વાચાં વ્રજતિ ન હિ કસ્યાત્ર વિદુષઃ ॥ ૬.૩૭॥

૧. અગોચરમ્ ।

અપિ શ્રીગોપીચન્દનતિલકસન્ધારણમહો
 ભવન્નામાન્યે૧તાન્યનવરતમુચ્ચાર્ય કલયેત્ ।
તથૈવાર્ચાયાં તે દૃઢદુરિતશાન્ત્યૈ નિજહૃદિ
 સ્ફુરદ્ભક્ત્યુન્મેષં સરસમુપયુઞ્જીત ચ નરઃ ॥ ૬.૩૮॥

૧. દ્વાદશ ।

અથૈતેષ્વેકં દ્વાદશસુ તવ નામસ્વયિ પુમાન્
 જપેલ્લબ્ધ્વાચાર્યાદિહ નિયમનિષ્ઠઃ પ્રતિદિનમ્ ।
ન સઙ્ખ્યાન્યૂનત્વં મુરહર! કદાપીહ રચયે-
 જ્જપન્નાધિક્યેન ત્વથ ફલમવાપ્નોતિ બહુલમ્ ॥ ૬.૩૯॥

મુરારે ! યો મર્ત્યો નિયમમિમ૧માજન્મમવનૌ
 દૃઢં ધત્તે ભક્ત્યા ભવતિ કરુણાપૂરજલધૌ ।
સ વૈ પૂજ્યો ભૂત્વા ભુવિ દિવિ મનુષ્યૈરપિ સુરૈ-
 રપારં પ્રાપ્નોતિ ત્રિભુવનપતે ! શર્મ નિયતમ્ ॥ ૬.૪૦॥

૧. જન્મનઃ પ્રભૃતિ અનશ્ચ (૫-૪-૧૦૮) ઇતિ

વદામિ શ્રીજાને! કિમપિ જપમાલાથ મનુજૈ-
 ર્વિધેયા કૈઃ કૈર્વસ્તુભિરિતિ ચ સઙ્ક્ષિપ્ય સહસા ।
ફલં ચાવાપ્યં તદ્વિરચિતજપેનાપિ ચ પૃથગ્-
 યથાશક્ત્યદ્યાહં ત્રિભુવનજનસ્તુત્યમહિમન્ !॥ ૬.૪૧॥

વિધેયા શઙ્ખૈર્વા મુરમથન! રૌપ્યેણ ચ પુન-

સ્તથા ચ સ્વર્ણેનોરગશયન ! ભો નિમ્બજફલૈઃ ।
તથા પદ્માક્ષૈર્વા મણિભિરપિ વા વિદ્રુમગણૈઃ
પુનર્મુક્તાભિર્વા વરદ! જપમાલા હિ મનુજૈઃ ॥ ૬.૪૨॥

પ્રકુર્યાદત્રાષ્ટોત્તરશતમયી વા નનુ પુમાન્
જપાર્થં માલાં તે મધુમથન! નામ્નામઘભિદામ્ ।
તદર્ધં પાદં વા પુનરહહ કુર્વન્નિહ તતોઽ-
પ્યલં ન્યૂનાં વિન્દત્યજિત ! ન ફલં તજ્જપભવમ્ ॥ ૬.૪૩॥

જપન્નીશાઙ્ગુલ્યા વ્રજતિ ફલમેકં પુનરહો
જપન્ રેખાભિર્વૈ ભજતિ હિ ફલં ચાષ્ટગુણિતમ્ ।
તથાઽઽપ્નોતીશાચ્છસ્ફટિકમણિભિશ્ચાયુતમહો
પુનર્લક્ષં મુક્તામણિભિરપિ મર્ત્યસ્ત્વયિ રતઃ ॥ ૬.૪૪॥

તથા પદ્માક્ષૈર્વૈ ભજતિ દશલક્ષં પુનરહો
ફલં કોટિં હેમ્ના વરદ ! રચિતૈરીશ ! મણિભિઃ ।
અનન્તં વૈ ભુઙ્ક્તે ફલમયિ જપન્નીશ ! તુલસી-
મણિવ્રાતૈર્ભક્ત્યા ભુજગશયન ! ત્વત્પ્રિયતમૈઃ ॥ ૬.૪૫॥

ભવદ્ભક્તાગ્ર્યત્વં પ્રકટયિતુમન્યેભ્ય ઇહ વૈ
જનેભ્યો બ્રૂતે ચેદિહ હિ જપસઙ્ખ્યાં વિરચિતામ્ ।
ફલં નો વિન્દેતાચ્યુત ! નનુ તતો જાતુચિદપિ
પ્રકાશ્યા નો કસ્મૈચિદપિ જપસઙ્ખ્યાત્ર સુધિયા ॥ ૬.૪૬॥

નૃણાં ભુક્તિં મુક્તિં વિતરતિ ભવન્નામપટલી-
સમાસ્વાદો નિસ્સંશયમયિ તથાપ્યત્ર મનુજઃ ।
અકામં ત્વન્નામાન્યઘશમન ! સઙ્કીર્ત્ય ભુવને
ફલં ભુઙ્ક્તેઽનન્તં તવ કરુણયા કૈટભરિપો !॥ ૬.૪૭॥

મુરારે ! ત્વન્નામસ્વપિ ચ ભુવને દ્વાદશસુ તદ્-
વરીયઃ શ્રીનારાયણ ઇતિ હિ નામાઘશમનમ્ ।
જપન્નેતન્નિત્યં પ્રણવનતિયુક્તં નનુ પુમાન્
પ્રસાદેન શ્રીમંસ્તવ સુખમવાપ્નોત્યનુપમમ્ ॥ ૬.૪૮॥

ય ઇત્થં ભક્ત્યા ત્વય્યખિલજગદીશેઽનવરતં
નયત્યદ્ધા કાલં વરદ ! તવ નામાનિ કલયન્ ।
યમં વા તદ્ભૃત્યાન્ પ્રતિભયતરાકારસહિતાન્

ન પશ્યેત્ સ્વપ્નેઽપિ પ્રશમિતસમસ્તાઘનિકરઃ ॥ ૬.૪૯॥

અસદ્વૃત્તો નીચઃ શઠમતિરતીવાલસતમ-
સ્તથા કામક્રોધાકુલિતહૃદયો વાત્ર મનુજઃ ।
લપન્નન્તે નારાયણ ઇતિ હિ નામાતિશુભદં
નિરસ્તાધિવ્રાતં વ્રજતિ નનુ કૈવલ્યમમલમ્ ॥ ૬.૫૦॥

અભૂત્ કન્યાકુબ્જે મુરહર! પુરાજામિલ ઇતિ
શ્રુતો વિપ્રઃ કોઽપ્યાગમનિગમવિત્ સાધુચરિતઃ ।
વહન્ ભક્તિં પિત્રોરથ સમધિકાં સુસ્થિરમતિઃ
સ્વધર્મે નિર્દોષે પ્રતિદિનમપિ શ્રુત્યભિહિતે ॥ ૬.૫૧॥

અથ પ્રાપ્તે શ્રીમન્ ! વયસિ તુ વિવાહાર્થમુચિતે
સવર્ણાં ચાગર્હ્યાં સ પુનરુપયેમે નનુ સતીમ્ ।
તયા સાકં ચા૧ખણ્ડિતમિહ વિતન્વન્ સુરમહી-
સુરાગ્નીનાં પૂજામનયદથ કાલં કમપિ સઃ ॥ ૬.૫૨॥

૧. વિતનનક્રિયાવિશેષણમિદમ્ ।

કદાચિદ્ધાતોઽસૌ વનમથ નિદેશાન્નિજપિતુઃ
સમાનેતું વિપ્રો નનુ કુશપલાશાદિ સહસા ।
નિવૃત્તો નેત્રાભ્યામકલયદલજ્જાં તુ કુલટાં
તતઃ કાઞ્ચિન્મૂર્તામિવ વિપદમગ્રે પથિ નિજામ્ ॥ ૬.૫૩॥

મદોન્મત્તા ધૃષ્ટા મુહુરપિ પદન્યાસવિષયે
ચલન્તી ચાવ્યક્તં કિમપિ નિગદન્તી ચ વચનમ્ ।
હસન્તી સા ચા૨કારણમહહ શૂદ્રેણ સહિતા
સ્વતુલ્યેનોપાન્તં ત્વરિતમિયમાપાસ્ય કુલટા ॥ ૬.૫૪॥

૨. અકસ્માત્ ।

વિધાતું મગ્નં તં કલુષનિરયાવર્તકુહરે
ગલાસજ્જત્પાશાયિતનિજભુજાયુગ્મલતયા ।
સમાશ્લિષ્ટઃ સોઽયં દ્વિજ ઇહ તયા ધીરમતિર-
પ્યશક્તોઽભૂત્ કામાશુગવિવશતાં સોઢુમમિતામ્ ॥ ૬.૫૫॥

તતો ભ્રશ્યત્તેજાઃ સકલસુગુણૈશ્ચાથ રહિતઃ
સ્વધર્મે વા નિષ્ઠાવિરહિતમતિઃ પાપવસતિઃ ।

સતાં હેયશ્ચાસીદહહ સહસૈવૈષ ભુવને
　　ન દુસ્સઙ્ગઃ કં કં નયતિ વિપદં વા તનુભૃતમ્ ॥ ૬.૫૬॥

અનાથૌ જીર્ણાઙ્ગૌ સુબહુ જરયા હન્ત પિતરૌ
　　સમુત્સૃજ્યાકાણ્ડે સપદિ દયિતાં સ્વાં ચ યુવતિમ્ ।
મહાપાપિષ્ઠાયા અહહ કુલટાયા ૧નિવસને
　　સ નિન્યે કાલં સ્વં સતતમપિ દૌવારિક ઇવ ॥ ૬.૫૭॥

૧. ગૃહે ।

વિયુજ્યન્તે યદ્વજ્જગતિ ધનહીનસ્ય શનકૈઃ
　　સકાશાત્ પુંસો વૈ નિયતમિહ ભૃત્યાશ્ચ સુહૃદઃ ।
તથા વિપ્રાદસ્માત્ કુટિલકુલટાસઙ્ગમજુષો
　　ગુણાઃ સર્વે યાતાઃ ક્રમશ ઇહ લોપં વિધિવશાત્ ॥ ૬.૫૮॥

અથો ધ્યાયંશ્ચેતસ્યનિશમપિ તામેવ કુલટાં
　　વિયોગં વૈ તસ્યાઃ ક્ષણમપિ ચ સોઢું હ્યકુશલઃ ।
હરંસ્તસ્યૈ પિત્ર્યં સકલમપિ પાપો ધનમહો
　　સ તાં નિન્દ્યઃ સર્વૈઃ સુબહુ રમયામાસ કુમતિમ્ ॥ ૬.૫૯॥

પ્રનષ્ટે વૈ પિત્ર્યે નનુ તદનુ વિત્તેઽથ સકલે
　　સ નિરસ્વત્વં જ્ઞાત્વા ગમિતમહહાત્માનમચિરાત્ ।
પુનર્દ્યૂતૈશ્ચૌર્યાદિભિરતિતરાં ગર્હિતતમૈ-
　　રુપાયૈઃ સમ્પાદ્ય દ્રવિણમથ તસ્યૈ બત દદૌ ॥ ૬.૬૦॥

સ પશ્યંસ્તામેવાનુદિનમિદમીયાં ગિરમહો
　　નિશમ્યાતિપ્રીતઃ શ્રવણપરુષાં હન્ત સુધિયામ્ ।
સમસ્તં તત્પ્રીત્યૈ કિમિહ બહુના કર્મ કલયન્
　　વૃથા નિન્યે કાલં જનિમપિ વરિષ્ઠાં નનુ નિજામ્ ॥ ૬.૬૧॥

તતસ્તસ્યાં પુત્રાન્ દશ સ જનયામાસ કુમતિ-
　　ર્દ્વિજોઽયં પુંશ્ચલ્યાં પુનરહહ તેષ્વપ્યયિ વિભો ! ।
કનિષ્ઠોઽભૂન્નારાયણ ઇતિ હિ નામ્નાથ દયિતઃ
　　સ્વપિત્રોરત્યન્તં પ્રચુરતરદુર્માર્ગરતયોઃ ॥ ૬.૬૨॥

હસન્તં બાલં તં સતતમપિ ચાવ્યક્તવચસા
　　લપન્તં જાનુભ્યાં કથમપિ ચરન્તં ભુવિ પુનઃ ।

પતન્તં સંવીક્ષ્ય દ્રુતગતિષુ ખેલન્તમજિરે
      કિયન્તં ન પ્રાપ્તઃ પ્રમદમિહ મોહાકુલમતિઃ ॥ ૬.૬૩॥

અથો લીલાસક્તં તમહહ નિરીક્ષ્યાતિમુદિતો
      મુમોચાશ્રૂણ્યુચ્ચૈઃ સહ દયિતયા નિશ્ચલતનુઃ ।
અહો સન્ત્યજ્યૈવ પ્રચુરભવસન્તાપશમનીં
      સ્મૃતિં તે યોગીન્દ્રૈરપિ મધુરિપો! વાઞ્છિતતરામ્ ॥ ૬.૬૪॥

અપશ્યન્ વાલં તં ક્ષણમપિ વિષણ્ણોઽથ નિતરાં
      સ પશ્યન્ ભૂયોઽપિ પ્રમુદિતમનાઃ સાશ્રુનયનઃ ।
પ્રધાવન્તે દૂરે સ્વયમનુદધાવાતિજરઠો-
      ઽપ્યુપાદાયોત્સઙ્ગે તમહહ, નિધાતું જડમતિઃ ॥ ૬.૬૫॥

લુઠન્ સાર્ધં તેનૈવ હિ સ ખલુ પઙ્કાવિલતમે
      મહીદેશે વિભ્રત્ તમિહ ગલદેશેઽપિ ચ મુહુઃ ।
મનાગ્રુષ્ટેનાનેન હિ રચિતસન્તાડનમુખે-
      ષ્વથાગસ્સુ પ્રાપ્તઃ કિમપિ ન હિ રોષં સ ૧દશમી ॥ ૬.૬૬॥

૧. વૃદ્ધઃ ।

ન ભુઙ્ક્તે મૂઢાત્મા શિશુમમુમસમ્ભોજ્ય કુહચિ-
      ન્ન પાનીયં કિઞ્ચિત્ પિબતિ સ તુ તસ્મૈ તદદિશન્ ।
અહો સ્વપ્નેઽપિ ત્વત્સ્મૃતિમયમહાભાગ્યરહિતઃ
      સ વૃદ્ધઃ પાપૈરપ્યહહ વયસેવાભવદિહ ॥ ૬.૬૭॥

અથૈવં વૈ સૂનોઃ કુટિલકુલટાગર્ભજનુષઃ
      સમાસક્તોઽસૌ લાલનભરણકૃત્યેષુ સતતમ્ ।
બતાષ્ટાશીત્યબ્દપ્રગણિતવયસ્કોઽપિ જડધી-
      ર્ન ૧વેદાસન્નં સ્માન્તકમહહ મોહાકુલમતિઃ ॥ ૬.૬૮॥

૧. વેદ સ્મેતિ યોજ્યમ્ ।

અપશ્યત્ સમ્પ્રાપ્તે હહહ મૃતિકાલે પરવશઃ
      સુઘોરાન્ વક્રાસ્યાન્ જ્વલદનલતુલ્યાક્ષિયુગલાન્ ।
યમપ્રેષ્યાંસ્તુ ત્રીન્ ભુજકલિતપાશાન્ સ્વમિહ વૈ
      સમાનેતું પ્રાપ્તાન ભૃશમકરુણાનેષ સવિધે ॥ ૬.૬૯॥

સ ભીતો દૃષ્ટ્વા તાન્ સરભસમુપાન્તે નનુ જવાત્

૧સમાયાતો બધ્વું સ્વમિહ બત પાશેન સુદૃઢમ્ ।
વિદૂરે ક્રીડન્તં પૃથુકમતિદીનઃ ખલુ સમા-
જુહાવાહો નારાયણમયમથોચ્ચૈર્વિવશધીઃ ॥ ૬.૭૦॥

૧. આગચ્છતઃ ।

નિશમ્યાહો દેહં સ્વકમવશમદ્ધા વિસૃજત-
શ્ચ્યુતં વક્ત્રાન્નામાચ્યુત ! તવ તુ પીયૂષસદૃશમ્ ।
સમાજગ્મુર્વેગાદ્ભવદનુચરાઃ પીતવસના
ઘનાભાશ્ચત્વારો દરવરરથાઙ્ગાન્વિતભુજાઃ ॥ ૬.૭૧॥

વિકર્ષન્તશ્ચૈનં સુદૃઢમિહ પાશેન સહસા
નિબધ્યાહો દીનં નિરુરુધુરમી તાન્ યમભટાન્ ।
નિરુદ્ધાસ્તે સદ્યો વિધુતવિચિકિત્સં ગિરમિમાં
સમાચખ્યુર્દૂતાન્ પ્રતિ તવ ભૃશં વિસ્મિતધિયઃ ॥ ૬.૭૨॥

નિષેદ્ધારઃ કે વા રહિતભયમાજ્ઞાં ત્રિગજતિ
પ્રભોર્ભાસ્વત્સૂનોઃ સુનિયતમધૃષ્યામહહ નઃ ।
કુતો વાપ્યાયાતાઃ પુનરિહ કિમર્થં સુબહુ ૧નો
નિરોધં નિશ્શઙ્કું કુરુથ વદત ક્ષિપ્રમધુના ॥ ૬.૭૩॥

૧. હદં પ્રભોરિત્યનેનાન્વેતિ ।

યુવાનઃ કે યૂયં સજલજલદાનીલરુચય-
સ્ત્વમી સર્વે રાજત્તટિદુપમપીતામ્બરધરાઃ ।
ચતુર્બાહારાજદ્દરવરરથાઙ્ગામ્બુજગદા
લસન્મુક્તાહારાઃ સ્મિતસુલલિતાસ્યા વદત નઃ ॥ ૬.૭૪॥

ઇતિ પ્રોક્તા દૂતાસ્તવ તુ યમદૂતૈઃ પરમમૂન્
પ્રહસ્યેદં વાચા જગદુરતિગમ્ભીરતરયા ।
ઇહ પ્રાપ્તા યૂયં યદિ ભવથ વૈવસ્વતભટાઃ
સ્વરૂપં ધર્મસ્યાપ્યથ તદિતરસ્યેહ ગદત ॥ ૬.૭૫॥

કથં ધાર્યો દણ્ડો ભવતિ નનુ દણ્ડ્યેષ્વથ નરે-
ષ્વિહા૧સ્થાનં કિં વા સમુચિતમિહારસ્યાઙ્ગ ! ભુવને ।
નરો દણ્ડ્યઃ કૃત્વા કિમિહ જગતિ સ્યાદિતિ ચ તે
ભવદ્દૂતૈઃ પૃષ્ટા જગદુરલમેતામયિ ગિરમ્ ॥ ૬.૭૬॥

૧. અવિષયઃ । ૨. દણ્ડસ્ય ।

શ્રુતિપ્રોક્તો ધર્મઃ સુનિયતમધર્મસ્તદિતરઃ
    શ્રુતિઃ સાક્ષાન્નારાયણ ઇતિ વયં સાધુ શ્ૃણુમઃ ।
તપો વેદા યજ્ઞાઃ પુનરિહ હિ ધર્મશ્ચ વિબુધા-
    સ્તતઃ સમ્ભૂતા ઇત્યભિદધુરૃષીન્દ્રાઃ સુધિષણાઃ ॥ ૬.૭૭ ॥

રવિર્વહ્નિર્ગાવો મરુદપિ નભઃ સોમદિવસૌ
    દિશઃ કાલઃ સન્ધ્યા સ્વયમપિ ચ ધર્મસ્ત્વિતિ પરમ્ ।
મતાસ્ત્વેતે વૈ સાક્ષિણ ઇતિ હિ ધર્મસ્ય ભુવને
    ગુહાયાં ન્યસ્તસ્યેવ હિ સુબહુ ગૂઢસ્ય મુનિભિઃ ॥ ૬.૭૮ ॥

અધર્મો વિજ્ઞાતો જગતિ પર૧મેતૈર્નનુ ભવ-
    ત્યપિ સ્થાનં દણ્ડસ્ય ચ સમુચિતં નીતિનિપુણૈઃ ।
નરઃ પાપં યો યાદૃશમિહ વિધત્તે સ તુ પુનઃ
    પરત્રાથો દણ્ડં સપદિ લભતે તાદૃશમહો ॥ ૬.૭૯ ॥

૧. એતૈઃ રવિવહ્ન્યાદિભિર્નિમિત્તભૂતૈરિત્યર્થઃ"એતૈરધર્મો વિજ્ઞાતઃ

સ્થાનં દણ્ડસ્ય યુજ્યતે । ઇતિ ભાગવતમ્ ।
અયં વિપ્રઃ પૂર્વં ક્વચન દિવસે તાતવચનાદ્-
    વનં યાતઃ પશ્યન્નહહ કુલટાં કામપિ તદા ।
સ્મરાર્તઃ સ્વં ધર્મં સકલમપિ સન્ત્યજ્ય વિદધે
    યતઃ પાપ્માનં તં ૧તદજિત ! નયામો નુ નરકમ્ ॥ ૬.૮૦ ॥

૧. તસ્માત્ ।

ઇતિ શ્રુત્વા વાચં સપદિ યમદૂતૈર્નિગદિતા-
    મમૂન્ પ્રત્યૂચુસ્તે ભવદનુચરા નીતિનિપુણાઃ ।
વચોભિર્વૈ ગર્ભીકૃતસકલશાસ્ત્રૈર્મૃદુભિર-
    પ્યહો ગમ્ભીરાર્થૈરમલતરધર્મૈકનિરતૈઃ ॥ ૬.૮૧ ॥

અધર્મો હા કષ્ટં વિશતિ નનુ ધર્મૈકમનસાં
    સભાં વઃ ૧શાસ્તૃણાં સકલજગતાં નિર્ભયતરામ્ ।
અદણ્ડ્યેષ્વંહોભિર્ભુવિ વિરહિતેષ્વપ્યથ નરે-
    ષ્વલં દણ્ડો યદ્વૈ ધ્રિયત ઇહ નિષ્કારણમહો ॥ ૬.૮૨ ॥

૧. શાસિતૃણામ્ । ઇડભાવ આગમશાસનાનિત્યત્વાત્ ।

પ્રજાનાં શાસ્તારો ભુવિ સકલભૂતેષુ ચ સમાઃ
 પરં ન્યાય્યે માર્ગે નિહિતમતયઃ સાધુચરિતાઃ ।
યદા વૈષમ્યં તાસ્વહહ રચયન્તિ હ્યશરણા-
 સ્તદા તાઃ કં લોકે શરણમુપગચ્છન્તુ કૃપણાઃ ॥ ૬.૮૩॥

૧જગત્યત્ર શ્રેયાન્ રચયતિ પુમાન્ યદ્યદિતર-
 સ્તદેવાહો વાઞ્છત્યનિશમવિચાર્યૈવ નિયતમ્ ।
પ્રમાણં યદ્વાસૌ કલયતિ તદેવેહ મનુજાઃ
 સમસ્તા નિશ્શઙ્કં પરમનુસરન્ત્યાશુ વિધિવત્ ॥ ૬.૮૪॥

૧. "યદ્યદાચરતિ શ્રેષ્ઠસ્તત્તદેવેતરો જનઃ ।
સ યત્ પ્રમાણં કુરુતે લોકસ્તદનુવર્તતે ॥"ઇતિ ભગવદ્ગીતા ।

યદઙ્કે વિન્યસ્ય સ્વશિર ઇહ લોકોઽયમકુતો-
 ભયં નિદ્રાત્યદ્ધા સતતમપિ વિસ્રબ્ધમુચિતે ।
સ્વયં ધર્માધર્મૌ પશુવદવિજાનન્ કથમમું
 સ વૈ દ્રોગ્ધું ચાર્હત્યકરુણમથાત્મૈકશરણમ્ ॥ ૬.૮૫॥

કૃતા વિશ્વોત્કૃષ્ટા નિયતમમુના નિષ્કૃતિરહો
 કૃતાનાં પાપાનામપિ પરમનન્તાસુ જનિષુ ।
યદુચ્ચૈર્વ્યાજહ્રે પરમવિવશો ૧નામ જગતી-
 પતેઃ પદ્માભર્તુર્જગતિ સકલાઘૌઘશમનમ્ ॥ ૬.૮૬॥

૧. અજામિલેન ।

જગાદાસૌ૧ વેગાદસુવિગમકાલે વિવશધી-
 શ્ચતુર્વર્ણં ૨નારાયણમયમબુધ્યાપિ ચ યદા ।
તદાનીં જાતા નિષ્કૃતિરપિ નિજાનાં સુમહતા-
 મઘાનાં સર્વેષાં રહિતવિશયં હે યમભટાઃ !॥ ૬.૮૭॥

૧. નારાયણેતિ । ૨. અસ્ય વિશેષ્યમનુવર્તનીય નામ ઇતિ ।

સુવર્ણસ્તેનો વાપ્યહહ ગુરુદારેષુ ચ રત-
 સ્તથા મિત્રદ્રોહી પિતૃનૃપવધૂહિંસનપરઃ ।
તથાન્યે વૈ પાપા જગતિ નનુ સર્વેઽપ્યઘકુલાદ્-
 ભવેયુર્મુક્તાઃ શ્રીરમણશુભનામગ્રહણતઃ ॥ ૬.૮૮॥

તથા નો પૂતઃ સ્યાન્નર ઇહ તપોભિર્વ્રતશતૈઃ

પરં તીર્થસ્નાનાદિભિરપિ સમસ્તાઘશમનૈઃ ।
યથા પદ્માભર્તુર્મધુરતરનામગ્રહણત-
૧સ્તદીયાનાં સેવાદિભિરપિ ભવેત્ પાવિતતમઃ ॥ ૬.૮૯॥

૧. પદ્માભર્તૃભક્તાનામિત્યર્થઃ ।

ત્રિલોકૈકાર્ઘાંશે નિરુપમકૃપાભારજલધૌ
હરૌ ભક્ત્યા હીનેન તુ વિરચિતાન્યત્ર ભુવને ।
ફલપ્રાપ્ત્યૈ કર્માણ્યહહ ન ભવન્ત્યેવ હિ મરૌ
યથા બીજાવાપઃ કુમતિષુ ચ વિદ્યાવિતરણમ્ ॥ ૬.૯૦॥

પરં સદ્ભિર્નિન્દ્યોઽપ્યલમતિદુરાચારનિલયો-
ઽપ્યહો દણ્ડ્યોઽપ્યસ્મિન્ જગતિ નનુ મર્ત્યઃ સકૃદપિ ।
પ્રભોર્લક્ષ્મીભર્તુઃ કથયતિ હિ નામૈકમપિ ય-
દ્યસૌ શિક્ષાં નાર્હત્યહહ ન હિ સન્દેહકાણકા ॥ ૬.૯૧॥

અતશ્ચૈનં મા મા નયત નરકં હન્ત રાચતા-
ખિલાંહોનિર્વેશં૧ સુનિયતમદણ્ડાર્હમધુના ।
પુનઃ સન્દેહશ્ચેદ્વચસિ ખલુ નઃ સ્વં પતિમહો
યમં તત્ત્વં ધર્મસ્ય તુ સુગહનં પૃચ્છત ભટાઃ !॥ ૬.૯૨॥

૧. નિર્વેશ ઇહ નિષ્કૃતિઃ ।

ઇતિ શ્રુત્વા વાણીં ભવદનુચરાણાં યમભટા
યયુઃ પ્રષ્ટું ધર્મં પરમમથ વૈવસ્વતમમી ।
વિમુચ્યૈનં પાશાદહહ પુરુપીડાવહતમાદ્-
દ્વિજં સદ્યો યામ્યાત્ પરમવિવશં ભૂરિજરઢમ્ ॥ ૬.૯૩॥

૧ગુણાન્મુક્તોઽપ્યદ્ધા નનુ સકલદોષૈવરહિતો (ટૈપો)
દ્વિજસ્તાવત્ તં ભાગવતમિહ ધર્મં નિરુપમમ્ ।
નિશમ્યોદ્યદ્ભક્તિસ્ત્વયિ પરમકારુણ્યનિલયે
વવન્દે તે દૂતાન્ સ્વભયહૃતિહેતૂન્ સ શિરસા ॥ ૬.૯૪॥

૧. વિષ્ણુભક્ત્યાદિગુણરહિતોઽપિ ।

વિવક્ષં જ્ઞાત્વા તં દ્વિજમિહ તદા સ્વાન્ પ્રતિ જવાત્
તિરોધાનં ચક્રુર્મુરહર! ભવત્પાર્ષદવરાઃ ।
તતઃ સ્વીયં પાપં સકલમપિ સઞ્ચિન્ત્ય સહસા

મહાન્તં નિર્વેદં સ સમુપજગામૈવમલઘુમ્ ॥ ૬.૯૫॥

અહો કષ્ટં વૃદ્ધૌ સુબહુ પિતરૌ ચાથ દયિતા-
મનાથાં સન્ત્યજ્ય સ્વયમિહ સુનીચાં તુ કુલટામ્ ।
સમાશ્રિત્યાધર્મે નિરતહૃદયોઽસૌ નનુ જનો
ધ્રુવં યાસ્યત્યદ્ધા નનુ નરકમત્યન્તકલુષમ્ ॥ ૬.૯૬॥

વ્યકર્ષન્ યે બધ્વા સુબહુ વિવશં માં રશનયા
ઘૃણાવર્જં યાતાઃ ક્વ બત ભૃશભીમાકૃતિજુષઃ ।
વિમુક્તં માં તેભ્યો વ્યદધુરિહ યે તેઽપિ ચ ગતાઃ
ક્વ વા સ્વપ્નો વાસૌ કિમિતિ પરમં વિસ્મયમગાત્ ॥ ૬.૯૭॥

ભૃશં પાપિષ્ઠસ્યાપ્યહહ મમ વક્ત્રાદ્વિગલિતં
મુરારેર્યન્નામ પ્રચુરભવસન્તાપશમનમ્ ।
તતો બન્ધં મોક્ષ્યે સુદૃઢમિતિ નિશ્ચિત્ય મનસા
યયૌ ૧ગઙ્ગાદ્વારં સપદિ સ મુનીન્દ્રૈઃ પરિવૃતમ્ ॥ ૬.૯૮॥

૧. હરિદ્વારમ્ ।

સ્થિતો દેવાગારે કુહચિદિહ સંવક્ષ્ય સ તુ તાન્
ભવદ્દૂતાન્ નત્વા સ્વવપુરધિગઙ્ગં ચ વિસૃજન્ ।
અવાપ્તો વૈકુણ્ઠં ઝટિતિ સ વિમાનેન તુ યમો
ભવદ્ભક્ત્યુદ્રેકાદ્દૃઢમથ રુરોધાહહ નિજાન્ ॥ ૬.૯૯॥

અસદ્વૃત્તો વિપ્રસ્ત્વયમ૧ઘભૃતોઽજામિલ ઇહ
પ્રયાતઃ સાયુજ્યં દૃઢમહહ યત્કીર્તનવશાત્ ।
તથાભૂતાનાં તે ફણિશયન ! નામ્નામવિરતં
સમાસ્વાદે કાર્યા મતિરખિલલોકૈઃ સકુતુકમ્ ॥ ૬.૧૦૦॥

૧. પાપભરિતઃ ।

ઇતિ સ્વાતિશ્રીરામવર્મવઞ્ચિમહારાજવિરચિતાયાં
ભક્તિમઞ્જર્યાં ષષ્ટશતકમ્ ।

## અથ સપ્તમશતકમ્ ।

અમ્ભોજનાભ! કથયામ્યથ તાં તૃતીયાં
ભક્તિં હતાખિલમલાં સ્મરણાત્મિકાં તે ।

શૌરે ! વિધેહિ સહસા કૃપયા તદર્થં
વાણીં મમેશ! નિતરાં ચતુરામિદાનીમ્ ॥ ૭.૧॥

પુંસાં સકૃત્ સ્મરણમાત્રકૃતામઘૌઘં
સદ્યો યતો હરસિ તેન બુધૈરજસ્રમ્ ।
સઙ્કીર્ત્યસે હરિરિતીશ! તથાવિધસ્ય
કં વા સ્મૃતિર્ન ભવતઃ કુરુતે કૃતાર્થમ્ ॥ ૭.૨॥

કિં વા સ્મૃતૈર્બહુભિરચ્યુત ! બન્ધહેતુ-
ભૂતૈઃ ફલં વ્રજતિ વસ્તુભિરત્ર દેહી ।
યં સંસ્મરન્ ન પતતીશ ! પુનર્ભવાબ્ધૌ
તસ્ય સ્મૃતિઃ કિલ તવૈવ સદા વિધેયા ॥ ૭.૩॥

નૂનં મનશ્ચપલમેવ નૃણાં ક્ષણાર્ધ-
મપ્યે૧કતઃ સ્થિરયિતું સુતરામશક્યમ્ ।
યદ્યપ્યનન્ત ! ભવદીયનિષેવયાથા-
પ્યભ્યાસતસ્તદિદમાશુ વશં નયેત ॥ ૭.૪॥

૧. એકત્ર ।

નૈસર્ગિકે વરદ ! સત્યપિ માનવાના-
મમ્ભોરુહાક્ષ ! મનસઃ સ્ફુટમસ્થિરત્વે ।
યદ્યત્ પ્રભો ! પ્રિયતમં ખલુ તત્ર તત્ર
ચેતો વિશિષ્ય રમતે સ્વયમેવ નૂનમ્ ॥ ૭.૫॥

તસ્માન્નરઃ પ્રિયતમં ખલુ વસ્તુ યદ્યત્
તત્તદ્ભવત્પરમહો સતતં વિદધ્યાત્ ।
તેનાખિલેશ! લભતે સ્મરણં તવેહ
યત્નં વિનૈવ જગતીહ વિધૂતશઙ્કમ્ ॥ ૭.૬॥

ગીતે યદીહ રમતે હૃદયં મનોજ્ઞે
તન્ત્રીનિનાદસુખદાયિનિ તર્હિ મર્ત્યઃ ।
ગીતેષુ તાવકચરિત્રરસોજ્જ્વલેષુ
યુઞ્જીત માનસમજસ્રમનન્તશાયિન્ !॥ ૭.૭॥

યદ્યમ્બુજાક્ષ ! રમતે હૃદયં કથાસુ
રમ્યાસુ તર્હિ મનુજઃ સતતં પ્રભો ! તે ।

નાનાવતારગુણકીર્તનસમ્ભૃતાસુ
　　સક્તં મનઃ ખલુ કથાસુ સદા વિદધ્યાત્ ॥ ૭.૮॥

આલેખ્યકર્મસુ તથૈવ સકૌતુકં ચેત્
　　ચેતોહરેષુ હૃદયં મનુજસ્તદાસૌ ।
નેત્રોત્સવાન્ મધુરિપો! તવ મૂર્તિભેદા-
　　નાલિખ્ય તત્ર વિનિયોજ્ય મનઃ પ્રહૃષ્યેત્ ॥ ૭.૯॥

ચેતો જગત્રયપતે ! પ્રતિમાસુ ચિત્રા-
　　સ્વામોદભાગ્ યદિ તદા પ્રતિમાસ્ત્વદીયાઃ ।
કૃત્વા સુવર્ણમણિભૂષણભાસમાના
　　યુઞ્જીત તત્ર હૃદયં કરુણૈકસિન્ધો! ॥ ૭.૧૦॥

એતાદૃશાદ્ગુરરિપો! મનુજઃ સુસાધા-
　　૧દભ્યાસતઃ સ્મૃતિમવાપ્ય વિભો ! ત્વદીયામ્ ।
લોકે ભવેત્ સકલપાપકુલાદ્વિમુક્તો
　　યત્નં વિનૈવ ધુતસંશયલેશમત્ર ॥ ૭.૧૧॥

૧. અભ્યાસાત્ ।

કાર્યા ન ચૈવ ભુવનેશ ! વિચારણાત્ર
　　સ્મૃત્વા યથારુચિ ભવન્તમનન્તશાયિન્ ! ।
પાપાત્ કથં ભવતિ મુક્ત ઇતીહ યત્ ત્વં
　　સ્વસ્મર્તુરઙ્ગ ! શુભદોઽસિ હિ સર્વથાપિ ॥ ૭.૧૨॥

લોકે સ્મરન્તિ સુધિયો હિ ભવન્તમીશં
　　જ્ઞાત્વા સ્વરૂપમમલં તવ વેદવેદ્યમ્ ।
સ્મર્તું ૧તથા કથમમી પ્રભવન્તિ ભૂમન્ !
　　લક્ષ્મીપતે! જડધિયો નનુ ૨માદૃશોઽપિ ॥ ૭.૧૩॥

૧. યથા સુધિયઃ ૨. મદ્વિધા અપિ ।

તસ્માન્નિજાં સમનુસૃત્ય મનઃપ્રવૃત્તિં
　　ત્વામમ્બુજાક્ષ ! સતતં સ્મરતાં જનાનામ્ ।
તુલ્યં પ્રસીદસિ કિલેત્યયિ બોદ્ધુમસ્તિ
　　કારુણ્યભારજલધે! બહુ નઃ પ્રમાણમ્ ॥ ૭.૧૪॥

ગોપ્યસ્ત્વનારતમિહામ્બુરુહાક્ષ ! વાક્યૈ-

વેદ્યં હ્યકૃત્રિમગિરાં પરચિત્સ્વરૂપમ્ ।
ત્વાં જાર ઇત્યખિલનાથ ! હૃદબ્જમધ્યે
સ્મૃત્વા યયુઃ પરમહંસગતિં ક્ષણેન ॥ ૭.૧૫॥

૧. વેદાનામ્ ।

ધન્યૌ હિ દેવકસુતાનકદુન્દુભી તૌ
ત્વાં પુત્રવત્સલતયા હૃદિ ભાવયિત્વા ।
સમ્પ્રાપતુઃ કિલ પરં તવ ધામ નિત્યં
સમ્મોદસાન્દ્રમમલં વિનિવૃત્તિહીનમ્ ॥ ૭.૧૬॥

૧. દેવકીવસુદેવૌ ।

ગોપાસ્તથા જલજનાભ ! વયસ્યભાવ-
માલમ્બ્ય સાધુ સતતં હૃદયે નિધાય ।
ત્વાં પ્રાપુરમ્બુરુહનેત્ર ! ભવામ્બુરાશેઃ
પારં પરં ભુવનનાથ ! વિના શ્રમેણ ॥ ૭.૧૭॥

ચૈદ્યાદયઃ સકલગર્હ્યતમાઃ સુમૂઢાઃ
સ્મૃત્વાખિલેશ ! રિપુભાવનયા ભવન્તં
નિત્યં ચરાચરજગન્નિવહૈકબન્ધું
મુક્તા બભૂવુરચિરાત્ કિમિતોઽપિ ચિત્રમ્ ॥ ૭.૧૮॥

ભીત્યા ચ ભોજનૃપતિઃ પ્રપિબંશ્ચ ખાદન્
ગચ્છન્ સ્વપન્નથ લપન્ હૃદયેઽનુચિન્ત્ય ।
ત્યામેવ સન્તતમગાદ્ભુવનૈકબન્ધો !
સાયુજ્યમાશુ તવ ખલ્વસુરાંશજોઽપિ ॥ ૭.૧૯॥

તસ્માદ્વિભો ! કથમપીહ ભવન્તમેવ
યો વૈ નરઃ સ્મરતિ માધવ! સર્વદાપિ ।
સોઽયં વિમુક્ત ઇહ પાપકુલાદશેષાત્
ત્વામાપ્નુયાદ્વિહગવાહન ! નિર્વિશઙ્કમ્ ॥ ૭.૨૦॥

રાગેણ વત્સલતયાપિ ચ સૌહૃદેન
દ્વેષેણ હન્ત ભયભાવનયા સ્મૃતોઽપિ ।
યસ્ત્વં પ્રસીદસિ નૃણાં સ કથં ન ભૂયા-
સ્તુષ્ટોઽનિશં કલયતાં હૃદિ પૂર્ણભક્ત્યા ॥ ૭.૨૧॥

તસ્માન્નરો જગતિ દુર્જયભીમભીમ-
ષડ્વૈરિરૂપ૧પૃથુસત્ત્વસમાકુલં તમ્ ।
શૌરે ! તિતીર્ષુરખિલેશ! ભવામ્બુરાશિં
નિત્યં ભવત્સ્મરણમેવ હિ શીલયેત ॥ ૭.૨૨॥

૧. પૃથુસત્ત્વેત્યસ્ય નક્રાદિપ્રાણીત્યર્થઃ ।

વિશ્વૈકનાથ ! કથયામ્યધુનાહમત્ર
ત્વદ્ધ્યાનયોગમરવિન્દદલાયતાક્ષ! ।
સર્વાઘજાતશમનૈકનિદાનભૂતં
ભક્ત્યૈકગમ્ય ! કૃપયા હિ તવૈવ ભૂમન્ !॥ ૭.૨૩॥

મિત્રે રિપૌ વરદ ! પાપિષુ પુણ્યવત્સુ
સ્વીયે પરે ચ સમબુદ્ધિરલં પ્રશાન્તઃ ।
તુલ્યાશ્મલોષ્ટકનકશ્ચ સરોજનાભ !
ધ્યાનેચ્છુરચ્યુત! ભવેત્ તવ સર્વદાપિ ॥ ૭.૨૪॥

સર્વત્ર નિસ્પૃહમતિશ્ચ વિવિક્તદેશ-
સેવી યતાત્મહૃદયસ્ત્વપરિગ્રહશ્ચ ।
ભૂત્વાસનં દૃઢતરં પરિકલ્પયેચ્ચ
દેશે શુચૌ ન ખલુ તુઙ્ગમહો ન નીચમ્ ॥ ૭.૨૫॥

કૃત્વામ્બરેણ ભગવન્નથવાજિનેન
યદ્વા કુશૈર્વિમલમાસનમત્ર તિ૧ષ્ઠન્ ।
પ્રેક્ષ્યાત્મનોઽથ સહસા ખલુ નાસિકાગ્રં
મૌની જિતેન્દ્રિયગણશ્ચ દિશો નરપશ્યન્ ॥ ૭.૨૬॥

૧. આસાન ઇત્યર્થઃ ૨. નઞર્થકનશબ્દસમાસઃ

સન્ધારયન્નપિ ચ વર્ષ્મ શિરશ્ચ કણ્ઠં
સ્વં સ્થાણુવત્ સ્થિરતરં ચ સમં નિકામમ્ ।
ભૃત્વાનિશં નનુ મિતાશનનિદ્ર ઈશ !
ધ્યાયેદ્ભવન્તમરવિન્દદલાક્ષમેવમ્ ॥ ૭.૨૭॥

૧પદ્માસનસ્થ ઇહ માધવ! માનવોઽસૌ
કૃત્વોર્ન્મુખં વિધુનિભં પ્રણવેન સદ્યઃ ।
હૃત્પદ્મમચ્યુત! તતોઽનુ વિકાસયેત્ તં

ત્વદ્ધ્યાનલિપ્સુરજિત ! ત્રિગુણૈર્મુરારે ! ॥ ૭.૨૮॥

૧. ઊર્વોરુપરિ વિન્યસ્ય સમ્યક્ પાદતલે ઉભે ।
અઙ્ગુષ્ઠૌ ચ નિબધ્નીયાદ્ધસ્તાભ્યાં વ્યુત્ક્રમાત્ તતઃ ॥

પદ્માસનમિદં પ્રોક્તમ્" ઇતિ તન્ત્રસારઃ ।
૨. ઊર્ધ્વમુખમ્ ।

તસ્યોપરિ દ્યુમણિસોમ૧શુચીન્ ક્રમેણ
સ્મૃત્વા તતસ્તદુપરીહ કલાયભાસમ્ ।
શઙ્ખારિપઙ્કજગદાઞ્ચિતપાણિપદ્મં
શ્રીવત્સકૌસ્તુભધરઞ્ચ વિચિન્તયેત્ ત્વામ્ ॥ ૭.૨૯॥

૧. શુચિરગ્નિઃ ।

યત્ત્વવ્યયં વરદ ! ધામ તવાતિદિવ્યં
શાન્તં પ્રશાન્તમતિભિર્મુનિભિર્નિષેવ્યમ્ ।
સ્મૃત્વા પુમાન્ પ્રથમમેતદધોક્ષજાથ
ધ્યાયેદિહે૧શ્વર! ભવન્તમચિન્ત્યશક્તિમ્ ॥ ૭.૩૦॥

૧. ધામ્નિ ।

લક્ષ્મીપતે! જગતિ યાન્તિ મહાનુભાવાઃ
સન્તો યદચ્યુત ! પરં તવ ધામ નિત્યમ્ ।
સર્વોત્તમં જયતિ તદ્ધિનિવૃત્તિહીનં
વૈકુણ્ઠસંજ્ઞિતમનન્તસુખૈકસાન્દ્રમ્ ॥ ૭.૩૧॥

ભક્તોત્તમા વિધુતમત્સરરાગવૈરા
યસ્મિન્નનારતમહો નિવસન્તિ પુણ્યાઃ ।
તત્ તાદૃશં તવ પદં તુ વિકુણ્ઠસંજ્ઞં
ચેતસ્યહો ન જનયેન્મુદમીશ ! કસ્ય ॥ ૭.૩૨॥

ભાત્યેતદીશ ! વિવિધૈર્નયનાભિરામૈ-
ર્જુષ્ટં પુનર્જનપદૈરથ હૃષ્ટપુષ્ટૈઃ ।
યત્રામ્બુજાક્ષ ! વસતાં સદનાનિ વીક્ષ્ય
લજ્જાં વહત્યપિ પુરી ત્રિદશાધિભર્તુઃ ॥ ૭.૩૩॥

રથ્યાપણાલ્યજિરનિષ્કુટવેશ્મવર્ત્ત૧-
ન્યુદ્યાનગોષ્ઠહયસિન્ધુરધાન્યશાલાઃ ।

યત્રાનિશં મુખરિતાઃ શ્રવણાભિરામૈ-
    સ્ત્વત્કીર્તનૈર્મુરરિપો! વિલસન્ત્યભીક્ષ્ણમ્ ॥ ૭.૩૪॥

૧. વર્ત્તની એકપદી ।

પ્રાકારપઙ્ક્તિરભિતોઽસ્ય વિકુણ્ઠલોક-
    સ્યોચ્ચૈર્લસત્યજિત ! રત્નમયી વિચિત્રા ।
રૂપં સ્વમીક્ષિતુમનન્ત ! દિગઙ્ગનાનાં
    કુડ્યાર્પિતેવ નવદર્પણચારુપઙ્ક્તિઃ ॥ ૭.૩૫॥

શોભાનુષઙ્ગવશતો ભુવનેશ! તસ્યા
    રત્નાચલેન સમતામિહ હૈમમદ્રિમ્ ।
પ્રાપ્તં નિરીક્ષ્ય મિહિરઃ ક્વ નુ મેરુરત્રે-
    ત્યેવં સશઙ્કહૃદયો ભવતીતિ મન્યે ॥ ૭.૩૬॥

કિઞ્ચ ભ્રમન્ ૧સ પરિતઃ ખલુ રહાટકાદ્રિં
    નાનામણિવ્રજલસદ્દ્યુતિચિત્રરૂપમ્ ।
જ્ઞાતું પટુર્ન ભવતિ સ્વમપીહ વર્ણં
    નૈર્મલ્યભાજિ નનુ તત્ર નિરીક્ષિતાત્મા ॥ ૭.૩૭॥

૧. મિહિરઃ । ૨. "અભિતઃ પરિત" ઇતિ દ્વિતીયા ।

એકત્ર પશ્યતિ નિજાં તનુમેવ ગૌરી-
    મન્યત્ર પાટલતમાં ક્વચિદીશ! કૃષ્ણામ્ ।
એકો યથા જગતિ તાવદુપાધિભેદૈ-
    ર્નાનાત્વમાપ્ત ઇવ ભાતિ કિલાયમાત્મા ॥ ૭.૩૮॥

માણિક્યવાસવદૃષન્નવહીરસાન્દ્રાત્
    પ્રાકારતસ્તત ઇહ પ્રસૃતા મરીચિઃ ।
ગઙ્ગાં કલિન્દતનયાં ચ સરસ્વતીં ચ
    જેતું વિભાતિ યુગપદ્વિહિતોદ્યમેવ ॥ ૭.૩૯॥

લક્ષ્મીપતે! વલયિતે નનુ તાદૃશેન
    પ્રાકારમણ્ડલવરેણ વિકુણ્ઠધામ્નિ ।
રાજન્તિ ભાસુરવિમાનવરાણિ ભક્તૈ-
    રધ્યાસિતાનિ તવ ધન્યતમૈનિકામમ્ ॥ ૭.૪૦॥

ભાસા તથોન્નતતયા ચ મિથો નિતાન્ત-

મુત્કર્ષમચ્યુત! વહત્સ્વથ તેષુ ભૂમન્ ! ।
સ્વૈરં દિનાનિ કમલાક્ષ ! સદા નયન્તો
મોદં કમપ્યનુભવન્તિ હિ તાવકીનાઃ ॥ ૭.૪૧॥

કિઞ્ચાતિવેલમનિશં ભવદીયગાથા-
નામામૃતૈર્મુખરિતાનનપઙ્કજાસ્તે ।
ત્વત્કીર્તિમ્મચ્યુત ! મિથઃ પરિકીર્તયન્તઃ
પૂતં પ્રભો ! વિદધતે જગદન્તરાલમ્ ॥ ૭.૪૨॥

રાજત્સુવર્ણનવરત્નમયા વિચિત્રા
હર્મ્યા નિજોન્નતતયા ગિરિરાજતુલ્યાઃ ।
આભાન્તિ તત્ર ભુવનેશ! ધનેશગર્વ-
સર્વઙ્કુષાં વરદ ! સમ્પદમાવહન્તઃ ॥ ૭.૪૩॥

આપિઞ્જરેષુ મણિભિર્નનુ પઞ્જરેપુ
સઞ્જાતમોદમનિશં શુકશારિકાશ્ચ ।
સ્વૈરં વસન્તિ ભગવન્ ! ભવદીયનામા-
ન્યુચ્ચૈસ્તરાં શ્રુતિસુખાનિ સમુદ્ગૃણન્ત્યઃ ॥ ૭.૪૪॥

શ્રોત્રદ્વયાધિકસુખપ્રદવાદ્યયુક્ત-
તૌર્યત્રિકેણ ભગવન્ ! મુદિતા નિતાન્તમ્ ।
ભાવત્કદિવ્યચરિતામૃતસમ્ભૃતેન
સ્વૈરં નયન્તિ નનુ તત્ર દિનાનિ સન્તઃ ॥ ૭.૪૫॥

નાનામણિવ્રજમયેષ્વયિ દેવ ! તેષુ
સૌધેષુ હન્ત વિચરન્નથ કો ન સદ્યઃ ।
સર્વત્ર વીક્ષ્ય પૃથગાત્મન એવ દેહં
બાહુલ્યમીશ! મનુતે વપુષો નિજસ્ય ॥ ૭.૪૬॥

ધારાગૃહેભ્ય ઇહ તાસ્વયિ સૌધરાજિ-
ષ્વદ્ધા નિપત્ય સહસા સ્ફુટિતામ્બુધારા ।
તત્રત્યહીરમયકુડ્યરુચોઽનુષઙ્ગાત્
તારાતતેરનુકરોતિ મરીચિવેણીમ્ ॥ ૭.૪૭॥

ઉદ્યાનભૂમિષુ ચ તત્ર મહીરુહૌઘા
યત્ તે વહન્તિ કુસુમોદ્ગમમપ્યકાલે ।
નૈતદ્વિચિત્રમખિલેશ્વર! ૧માધવે ત્વ-

ય્યશ્રાન્તમચ્યુત! લસત્યાય શેષશાયિન્ !॥ ૭.૪૮॥

૧. વિષ્ણૌ વસન્તમાસે ચ ।

જ્યોત્સ્નાન્વિતાસુ રજનીષુ નિજં શરીરં
સંવીક્ષ્ય રત્નમયકુડ્યતલેષુ તત્ર ।
આસાદિતા સ્વદયિતેતિ નિશીથકાલે-
ઽપ્યદ્ધા ભ્રમેણ પરિતુષ્યતિ ચક્રવાકઃ ॥ ૭.૪૯॥

સમ્ફુલ્લસારસસમૂહલસત્પરાગ-
સંવાસિતઃ સકલતાપહરામ્બુપૂર્ણઃ ।
વાપીતટાકનિકરશ્ચ સરોરુહાક્ષ !
ચેતો ન કસ્ય શિશિરીકુરુતે નુ તત્ર ॥ ૭.૫૦॥

મધ્યે તુ તસ્ય ભગવન્ ! નગરી વિભાતિ
સાધ્યેતિ કાપિ પરમસ્ય વિકુણ્ઠધામ્નઃ ।
ભ્રાજિષ્ણુભૂરિમણિતલ્લજહેમરૂપા
પ્રાકારતોરણવૃતા નયનાભિરામા ॥ ૭.૫૧॥

સા નામ દિક્ષુ ચતસૃષ્વતુલૈર્વિશાલૈ-
ર્દ્વારૈશ્ચતુભિરખિલેશ! લસત્યતીવ ।
અત્યુન્નતૈઃ સુરુચિરૈર્મણિગોપુરૈશ્ચ
ગેહૈસ્તથા પરિવૃતા ખલુ ભક્તજુષ્ટૈઃ ॥ ૭.૫૨॥

પર્યન્તભાસિવલભિન્મણિમેચકાભ-
સામોદદિવ્યતુલસીવનનિર્જિહાનઃ ।
સન્તાપહૃન્નનુ જગત્રિતયસ્ય પુર્યાં
તસ્યાં તુ કૈટભરિપો ! મૃદુ વાતિ વાયુઃ ॥ ૭.૫૩॥

ભૂમન્ ! ભવત્પ્રણયભાજનભૂતતાદૃગ્-
વિશ્વાભિરામતુલસીમકરન્દલોભાત્ ।
ગોવિન્દ ! હન્ત વિહરન્ત ઇહ દ્વિરેફા
વિન્દન્તિ સૌખ્યમધિયોઽપ્યથ યોગિભોગ્યમ્ ॥ ૭.૫૪॥

પીયૂષદીધિતિસિતચ્છવિગર્વભાર-
સર્વઙ્કુષસ્ફટિકતલ્લજનિર્મિતાભિઃ ।
સોપાનપાલિભિરતીવ સમુલ્લસન્ત્યો

વાપ્યશ્ચ તત્ર વિલસન્તિ મનોજ્ઞતોયાઃ ॥ ૭.૫૫॥

૧પઙ્કચ્છિદાપટુતયા રસસમ્ભૃતત્વાત્
ઉતાપોત્કરપ્રશમનૈકપટુત્વતશ્ચ ।
લક્ષ્મીપતે! પરમજહંસનિષેવિતત્વાદ્-
વાપ્યસ્તુ તાસ્તવ કથા ઇવ ભાન્તિ નિત્યમ્ ॥ ૭.૫૬॥

૧. પઙ્કશબ્દઃ કર્દમપાપયોઃ ૨. રસશબ્દો જલાનન્દયોઃ ।
૩. તાપશબ્દઃ સૂર્યોષ્મસંસારક્લેશયોઃ ૪. હંસશબ્દઃ મરાલયોગિનોઃ ।

ચણ્ડાદિભિર્ભુવનનાયક! રક્ષિતેયં
દ્વારેષુ ચક્રધર ! સન્નિહિતૈશ્ચતુર્ષુ ।
સાધ્યા નગર્યવાહતૈઃ શિતહેતિહસ્તૈ-
દિવ્યસ્વરૂપસહિતૈઃ પરમષ્ટસઙ્ખ્યૈઃ ॥ ૭.૫૭॥

ચણ્ડાહ્વયો નનુ રમેશ ! તથા પ્રચણ્ડઃ
પ્રાગ્દ્વારિ યામ્ય ઇહ ભદ્રસુભદ્રકૌ ચ ।
તદ્વજ્જયોઽથ વિજયોઽપિ ચ પશ્ચિમે તુ
સૌમ્યે સ્થિતાવાજિત ! ૧ધાતૃયુતો વિધાતા ॥ ૭.૫૮॥

૧. ધાતા વિધાતા ચેત્યર્થઃ ।

કિઞ્ચાખિલેશ ! કુમુદોઽપ્યથ પુણ્ડરીકઃ
શૌરે! તથૈવ કુમુદાક્ષકશઙ્કુકર્ણૌ ।
તદ્વચ્ચ વામનસમાહ્વયસર્વનેત્રૌ
પુર્યાં સ્થિતાવથ તથા સુમુખાહ્વયશ્ચ ॥ ૭.૫૯॥

પ્રોક્તા ઇમે વરદ! દિક્પતયઃ પુરસ્ય
તસ્યાસ્ય કૈટભનિષૂદન ! નિસ્તુલસ્ય ।
રક્ષન્તિ તે સતતમીશ! પુરં તદેત-
દક્ષીણનિત્યવિભવૈકનિકેતભૂતમ્ ॥ ૭.૬૦॥

તસ્યાથ મધ્યભુવિ ભાતિ સમસ્તલોક-
નેત્રદ્વયાનુપમકૌતુકદાયિ દિવ્યમ્ ।
અન્તઃપુરં તવ વિભો ! નવરત્નભાસિ-
પ્રાકારતોરણયુતં ભુવનૈકરમ્યમ્ ॥ ૭.૬૧॥

પ્રાકારપઙ્ક્તિભિરતીવ સમુચ્છ્રિતૈશ્ચ

તદ્વદ્વિમાનનિવહૈર્હૃદયાભિરામૈઃ ।
જુષ્ટં વિભાતિ તદિદં ૧ભવદીયભક્તૈ-
રધ્યાસિતૈર્ભુવનનાયક! ધન્યધન્યૈઃ ॥ ૭.૬૨॥

૧. અધ્યાસનક્રિયાપેક્ષયા કર્તરિ તૃતીયા ।

મધ્યે તુ તસ્ય વિલસ૧ત્યતિદિવ્યરાજ-
સ્થાનં સુતુઙ્ગમયિ મણ્ડપમમ્બુજાક્ષ ! ।
બાલાર્કકોટિસુષમોજ્જ્વલપદ્મરાગ-
સ્તમ્ભોત્તમૈઃ શતસહસ્રમિતૈઃ સમેતમ્ ॥ ૭.૬૩॥

૧. અતિદિવ્યં ભૃશપ્રશસ્તં રાજસ્થાનં રાજાસનં યસ્મિંસ્તત્ ।

દિવ્યસ્રગમ્બરવિભૂષિતનાકનારી-
યુક્તૈરશેષદિવિજૈશ્ચ નિષેવ્યમાણમ્ ।
યુક્તં ચ મુક્તનિવહૈરથ ભાતિ સામ-
ગાનોપશોભિતમિદં મધુકૈટભારે! ॥ ૭.૬૪॥

તસ્યાપિ મધ્યભુવિ ભાતિ રમેશ ! દિવ્યં
સિંહાસનં સકલવેદમયં ત્વદીયમ્ ।
ધર્માદિદૈવતગણૈર્વિધૃતં તદીય-
પાદત્વમીશ! ગમિતૈર્ભુવનૈકબન્ધો! ॥ ૭.૬૫॥

જ્ઞાનં ચ ધર્મ ઇહ દેવ ! તથા વિરક્તિ-
રૈશ્વર્યમિત્યભિહિતાઃ ખલુ દેવતાસ્તાઃ૧।
સાર્ધં વહન્તિ નનુ વેદચતુષ્ટયેન
સિંહાસનં સરસિજાક્ષ ! પરં તદેતત્ ॥ ૭.૬૬॥

૧. સિંહાસનપાદત્વાપન્નાઃ ।

આધારશક્તિરખિલેશ ! તથૈવ શક્તિ-
શ્ચિચ્છક્તિરચ્યુત! તથૈવ સદાશિવાખ્યા ।
ઇત્યમ્બુજાક્ષ ! કથિતાઃ! ખલુ શક્તયો વૈ
ધર્માદિદૈવતગણસ્ય પરં મુરારે! ॥ ૭.૬૭॥

મધ્યે ચ તસ્ય નિવસન્તિ રથાઙ્ગપાણે !
સિંહાસનસ્ય રવિવહ્નિસુધામયૂખાઃ ।
કૂર્મસ્તથા ફણિવિહઙ્ગપતી ચ વેદાઃ

પીઠત્વમીશ! ગમિતાશ્ચ સમસ્તમન્ત્રાઃ ॥ ૭.૬૮॥

સર્વાક્ષરાકલિતમીશ! વદન્તિ સન્તો
યદ્યોગપીઠમિતિ માધવ! દિવ્યદિવ્યમ્ ।
તન્મધ્યતોઽષ્ટદલમીશ! વિભાતિ પદ્મ-
મુદ્યત્સહસ્રકિરણચ્છવિ કૈટભારે !॥ ૭.૬૯॥

એતાદૃશં મધુરિપો ! તવ ધામ શાન્તં
ધ્યાત્વા નરઃ પ્રથમમચ્યુત ! યોગિસેવ્યમ્ ।
પશ્ચાચ્ચ તત્કમલમધ્યગકર્ણિકાયાં
ભાન્તં સ્મરેદ્યતમતિશ્ચ ભવન્તમીશમ્ ॥ ૭.૭૦॥

નો જાયતે ભુવિ નૃણાં મનસઃ પ્રવૃત્તિ-
ર્વસ્તુન્યસંશયમદૃષ્ટચરે પરોક્ષે ।
ધ્યાતું તતસ્ત્વસુકરં તદિદં વિકુણ્ઠ-
ધામેતિ કેચન વદેયુરશેષબન્ધો!॥ ૭.૭૧॥

શ્રોત્રત્વગીક્ષણમુખૈઃ કરણૈસ્તુ યદ્ય-
દ્યૈર્યૈઃ પ્રભો ! સમુચિતં નનુ ભોક્તુમત્ર ।
તૈસ્તૈસ્તુ તાન્યનનુભૂય તદીયતત્ત્વં
નો વેત્તિ ચેતિ વચનં ખલુ સત્યમેવ ॥ ૭.૭૨॥

લોકે સિતાસિત હરિન્મુખવર્ણભેદં
જાનાતિ નૈવ બહુધા નનુ બોધિતોઽપિ ।
વાક્યૈઃ સવિસ્તરતરૈરપિ દૈત્યવૈરિ-
ન્નાજન્મનેત્રવિકલો મનુજો હિ નૂનમ્ ॥ ૭.૭૩॥

તદ્વચ્ચ કર્ણવિકલોઽત્ર નરઃ કથં વા
તન્ત્રીનિનાદરસમિશ્રિતગાનસૌખ્યમ્ ।
જાનાતિ હન્ત ભુવનેશ! કવીશ્વરાણાં
વક્ત્રાબ્જનિર્ગલિતસત્કવિતારસં વા ॥ ૭.૭૪॥

મર્ત્યો જગત્યતિદરિદ્રતમઃ કથઞ્ચિત્
ભિક્ષાટનાર્જિતકદન્નભૃતાત્મકુક્ષિઃ ।
બોદ્ધું પ્રભો ! કથમિહાર્હતિ હન્ત સૌખ્યં
વિત્તેશભોગ્યમતુલં ભુજગેન્દ્રશાયિન્ !॥ ૭.૭૫॥

વન્ધ્યા વધૂર્ભુવનનાથ! કથં નુ વેત્તિ
    પીડાં પ્રસૂતિસમયે કિલ જાયમાનામ્ ।
તદ્વજ્જડઃ કથમવૈતિ પરિશ્રમં તં
    વિદ્યાઽઽપ્તિબદ્ધમનસા ત્વનુભૂયમાનમ્ ॥ ૭.૭૬॥

તસ્માદદૃષ્ટચરમીશ ! તથા પરોક્ષં
    તદ્ધામ દિવ્યમખિલેશ! વિકુણ્ઠસંજ્ઞમ્ ।
ધ્યાતું જનૈર્ન ખલુ શક્યમિતિ ત્રિધામન્ !
    વાર્ત્તા ચ નૈવ સુધિયા પુરુષેણ હેયા ॥ ૭.૭૭॥

તત્ પઙ્કજાક્ષ ! સકલૈઃ શ્રમલેશવર્જં
    ધ્યાતું વિભો ! વરદ! ધામ તવેહ લોકે ।
કારુણ્યવારિનિધિના ભવતૈવ સોઽયં
    લક્ષ્મીપતે! વિરચિતઃ સુકરોઽસ્ત્યુ૧પાયઃ ॥ ૭.૭૮॥

૧. ઉપાયશ્ચ વૈકુણ્ઠતુલ્યસ્યાનન્દૂરપુરસૃષ્ટિરૂપ ઉત્તર શ્લોકે સ્પષ્ટઃ ।

ભાગ્યં જગત્યયિ સતામિવ પુઞ્જભૂતં
    યત્ તે પરં પ્રિયતમં ચ વિકુણ્ઠતુલ્યમ્ ।
તદ્ધામ શાશ્વતમિહા૧શ્રમતઃ સ્મરેત્ સ્યા-
    નન્દૂરસંજ્ઞમનિશં પુરુષો મુરારે! ॥ ૭.૭૯॥

૧. અશ્રમેણ ।

ધ્યાત્વા પુરા પુરમિદં કમલાક્ષ ! પશ્ચાત્
    તત્રત્યમન્દિરગતે નનુ પાવનાખ્યે ।
રમ્યે વિમાનવરસીમ્નિ સદા શયાનં
    ત્વાં ભાવયેદિહ પુમાન્ ભુજગેન્દ્રતલ્પે ॥ ૭.૮૦॥

આદૌ સહસ્રકિરણાયુતદિવ્યકાન્તિ-
    સન્દોહજિષ્ણુમણિમણ્ડલમણ્ડિતેન ।
ભાન્તં જગત્ત્રયગુરો! મકુટેન તત્ તે
    ધ્યાયેત સુનિશ્ચલમતિઃ પરમુત્તમાઙ્ગમ્ ॥ ૭.૮૧॥

પશ્ચાદ્રમેશ! તુલસીવકુલામ્બુજાત-
    મન્દારકુન્દસુમનોમયમાલિકાસુ ।
લોભચ્છલેન મકરન્દનિષેવણસ્ય

ધ્યાયેऽન્નતં મધુકરૈસ્તવ કેશપાશમ્ ॥ ૭.૮૨॥

૧. ગુણતઃ પરાજયાન્નમસ્કારેણ સમ્ભાવિતમિતિ તાત્પર્યમ્ ।

ભૂયઃ સ્મરેદજિત ! શારદપૂર્ણચન્દ્ર-
બિમ્બચ્છવિપ્રકટગર્વહરં મનોજ્ઞમ્ ।
સાફલ્યદાયિ જગતામિહ નેત્રસૃષ્ટે-
ર્લક્ષ્મીપતે! તવ વિભો ! વદનારવિન્દમ્ ॥ ૭.૮૩॥

અત્યન્તમેચકતરાલકસંવૃતં તે
ધ્યાયેત્ તતઃ શિશુશશાઙ્કસમાનશોભમ્ ।
અસ્તોકસૌરભતતાખિલદિગ્વિતાન-
કસ્તૂરિકાતિલકિતં નનુ ભાલદેશમ્ ॥ ૭.૮૪॥

અસ્માદૃશેષ્વલમનન્યપરાયણેષુ
નિત્યં પ્રદર્શિતકૃપામયવારિરાશેઃ ।
કલ્લોલરૂપમનિશં યતધીઃ સ્મરેત્ તે
ચિલ્લીયુગં તદનુ નાથ! રથાઙ્ગપાણે !॥ ૭.૮૫॥

સમ્ફુલ્લસારસદલચ્છવિ નેત્રયુગ્મં
શૌરે ! દ્વિવર્ણમપિ દૃશ્યતરત્રિવર્ણમ્ ।
આકર્ણદીર્ઘમખિલેશ ! તતઃ સ્મરેત્ તે
ભક્તાર્તિભઞ્જનકટાક્ષસુધારસાર્દ્રમ્ ॥ ૭.૮૬॥

ધ્યાયેત્ તતશ્ચ મનસા મધુકૈટભારે !
તાં નાસિકાં તવ વિભો ! જગદાધિહન્તુઃ ।
રાજત્તિલપ્રસવતલ્લજગર્વભાર-
સર્વઙ્કુષાનુપમિતદ્યુતિલોભનીયામ્ ॥ ૭.૮૭॥

રાગં સમસ્તજગતામપિ વિદ્યમાન-
માત્મન્યથો બહિરપિ પ્રકટં વિધાતુમ્ ।
ઉદ્યોગવાનિવ ય ઈશ ! બરીભરીતિ
રાગં તમચ્યુત ! તતસ્ત્વધરં સ્મરેત્ તે ॥ ૭.૮૮॥

લક્ષ્મીપતે! દરવિકાસવિરાજમાન-
કુન્દાવદાતરવૃન્દરુચા સનાથમ્ ।
મન્દસ્મિતં ત્રિભુવનૈકવિમોહનં તે

ધ્યાયેત્ તતઃ સરસિજાક્ષ! કૃપાતિસાન્દ્રમ્ ॥ ૭.૮૯॥

ધ્યાયેત્ તતઃ શ્રવણયુગ્મલસન્મનોજ્ઞ-
રત્નૌઘયુઙ્મકરકુણ્ડલકાન્તિવેણ્યાઃ ।
સંશીલનાદ્દ્વિગુણિતાનુપમેયશોભં
ગણ્ડદ્વયં તવ વિભો ! મણિદર્પણાભમ્ ॥ ૭.૯૦॥

આરુઢપૂર્વધરણીધરવાસરેશ-
કોટિપ્રભાનિલયકૌસ્તુભરત્નભાસા ।
સઞ્જાતપાટલરુચં તદનુ સ્મરેત્ તે
ગ્રીવાં પ્રભો! રુચિરકમ્બુસમાનશોભામ્ ॥ ૭.૯૧॥

સઙ્ગ્રામદુર્જયતરત્રિદશારિવીર-
પ્રૌઢાસુવાતગણભુગ્ભુજગાયિતૌ તૌ ।
બાહૂ મહાર્ઘમણિકઙ્કણમણ્ડિતૌ તે
ધ્યાયેત્ તતો ભુવનનાયક ! ભક્તિપૂર્વમ્ ॥ ૭.૯૨॥

રાજત્યહો યદનિશં ત્રિજગજ્જનન્યા
લક્ષ્મ્યાસ્તુ નિત્યનિલયાયિતમાર્ત્તબન્ધો ! ।
ધ્યાયેત્ તદેતદથ રમ્યમુરસ્સ્થલં તે
શ્રીવત્સલક્ષ્મ વિલસન્નવવન્યમાલમ્ ॥ ૭.૯૩॥

યત્રામ્બુજાક્ષ ! નિવસન્તિ જગન્તિ હન્ત
ભૂમઞ્ચતુર્દશ ચરાચરવન્તિ શૌરે ! ।
તં સંસ્મરેદિહ તતો જઠરં ત્વદીયં
લક્ષ્મીપતે! નનુ વલિત્રયશોભમાનમ્ ॥ ૭.૧૪॥

અશ્રાન્તમાસ્યજલજૈર્ભગવઞ્ચતુર્ભિ-
રાઘોષ્યમાણનિગમેન પરં વિધાત્રા ।
અધ્યાસિતં નનુ રમેશ ! તતઃ સ્મરેત્ તે
નાભીપુટોદ્ભવમશેષગુરો ! સરોજમ્ ॥ ૭.૯૫॥

અત્યુત્તમચ્છવિનિકેતનભૂતરત્ન-
પર્યુપ્તયા મધુરિપો! કલધૌતકાઞ્ચ્યા ।
ધ્યાયેદલઙ્કૃતમહો તવ મધ્યદેશ-
મસ્થૂલમપ્યકૃશયાથ રુચા સનાથમ્ ॥ ૭.૯૬॥

સન્ધ્યાભ્રવર્ણલસિતેન તતો મનોજ્ઞ-
 પીતામ્બરેણ પરિવેષ્ટિતમૂરુયુગ્મમ્ ।
જઙ્ઘે ચ કેકિવરકણ્ઠસમાનશોભે
 ધ્યાયેત્ તવ ત્રિજગદેકપતેર્મુરારે! ॥ ૭.૯૭ ॥

અમ્ભોજગર્ભસુકુમારપયોધિકન્યા-
 પાણિદ્વયેન પરિલાલિતમીશ! નિત્યમ્ ।
ભક્તૌઘવાઞ્છિતફલપ્રદમાર્ત્તબન્ધો !
 ધ્યાયેત્ પદામ્બુજયુગં તવ યોગિસેવ્યમ્ ॥ ૭.૯૮ ॥

અઙ્ગેષુ દેવ ! સકલેષુ તવાતિરમ્યે
 તત્રાઙ્ઘ્રિપઙ્કજયુગે વિનિયોજ્ય ચેતઃ ।
સન્ત્યક્તસર્વવિષયસ્પૃહ એષ મર્ત્યઃ
 સમ્પ્રાપ્નુયાદ્દૃઢમનિર્વચનીયસૌખ્યમ્ ॥ ૭.૯૯ ॥

તસ્માત્ પ્રભો ! નલિનપત્રગતામ્બુબિન્દુ-
 લોલં ત્વવાપ્ય નરજન્મ ભુવીહ દેહી ।
ત્વામેવ ચક્રધર ! શાશ્વતમોદલબ્ધ્યૈ
 ધ્યાયેદમેયકરુણાનિધિમચ્યુતૈવમ્ ॥ ૭.૧૦૦ ॥

ઇતિ સ્વાતિશ્રીરામવર્મવઞ્ચિમહારાજવિરચિતાયાં
ભક્તિમઞ્જર્યાં સપ્તમશતકમ્ ।

## અથાષ્ટમશતકમ્ ।

અથ કથયામિ ચતુર્થીં
 તવ પદયુગસેવનાખ્યભક્તિમહમ્ ।
સરસિજનાભ! તદર્થં
 કુરુ મમ સહસા પટીયસી વાણીમ્ ॥ ૮.૧ ॥

શ્રુતિનિચયાગમષટ્ક-
 સ્મૃતિસન્તતિસત્પુરાણશતકેષુ ।
ત્વત્પદભજનાદન્યત્
 સારં પ્રતિપાદ્યમસ્તિ નૈવ દૃઢમ્ ॥ ૮.૨ ॥

સ્મરહરસરસિજનિલય-

ત્રિદિવકુલાધીશમુખ્યસકલસુરાઃ ।
યત્ કિલ વાઞ્છન્ત્યનિશં
તતો વરં કિં તવાઙ્ઘ્રિયુગભજનાત્ ॥ ૮.૩॥

૧કલશપયોનિધિકન્યા
જગતાં જનની નિસર્ગચપલાપિ ।
ત્યજતિ હિ સહસા સ્વીયં
શીલં શૌરે ! ત્વદઙ્ઘ્રિભજનવિધૌ ॥ ૮.૪॥

૧. લક્ષ્મીઃ ।

જગતિ સતૃષ્ણાઃ સર્વે
યલ્લેશાપ્ત્યૈ તથાવિધા ૧સેયમ્ ।
યત્ર સતૃષ્ણા નિત્યં
કિં પરમસ્માત્ પદાબ્જભજનાત્ તે ॥ ૮.૫॥

૧. લક્ષ્મીઃ

યદ્ગલિતં વરદ ! રજો
મૂર્ધ્ના સન્ધાર્ય હન્ત વિબુધવરાઃ ।
સ્વયમિહ રજસા રહિતા
જાયન્તે નાથ! ચિત્રમહો ॥ ૮.૬॥

તૃણવદિદં જગદખિલં
મન્વાના નિસ્પૃહાઃ પરં મુનયઃ ।
શુકભૃગુનારદમુખ્યા-
સ્ત્વત્પદભજને તુ સસ્પૃહા નિત્યમ્ ॥ ૮.૭॥

યત્પ્રાપ્ત્યૈ ભુવિ કેચિદ્-
વિગલિતદેહાભિમાનમતિઘોરમ્ ।
તપ ઇહ ૧દધતે ભૂમન્ !
સા પદસેવા ન કેન વાઞ્છ્યા તે ॥ ૮.૮॥

૧. પુષ્ણન્તિ ।

શ્રમલવરહિતં તસ્યાં
પ્રાપ્તાયામયિ તવાઙ્ઘ્રિસેવાયામ્ ।
તવ કૃપયૈવ મુરારે !

પ્રાપ્યં મનુજૈરતોऽપિ કિં ભાગ્યમ્ ॥ ૮.૯॥

નિગમાગમવિહિતાનિ
પ્રચુરતરાઘૌઘશમનદક્ષાણિ ।
તન્યન્તે વરદ! બુધૈ-
ર્યલ્લાભાયૈવ સકલકર્માણિ ॥ ૮.૧૦॥

યદ્વન્નગરીમેકાં
સન્તિ પ્રાપ્તું બહૂનિ વર્ત્માનિ ।
તદ્વત્ ત્વત્પદસેવા-
મેકાં લબ્ધું સમસ્તકર્માણિ ॥ ૮.૧૧॥

વ્રજતિ ન વૈ સાફલ્યં
જગતિ વિના યાં કિલૈકમપિ કર્મ ।
સુવિમલમપિ મુરવૈરિં-
સ્તાં પદસેવાં તવેહ કો નેચ્છેત્ ॥ ૮.૧૨॥

૧ઇષ્ટાપૂર્તૈઃ કેચિત્
કતિચિદજસ્રં તથાન્નદાનેન ।
કતિચન દાનૈર્વિવિધૈઃ
સુકૃતમમેયં કિલાર્જયન્ત્યત્ર ॥ ૮.૧૩॥

૧. ઇષ્ટૈર્યજ્ઞૈઃ પૂર્તૈઃ ખાતાદિકર્મભિશ્ચ ।

તૈસ્તૈર્ધર્મૈરેભિ-
ર્બહુષુ ચ તુષ્ટેષુ જીવજાલેષુ ।
સકલહૃદન્તર્યામી
તુષ્ટો ભવિતા ત્વમેવ વિશ્વાત્મન્ !॥ ૮.૧૪॥

તુષ્ટે ત્રિભુવનનાથે
ભવતિ કિલોદ્યત્કૃપાસુધામ્ભોધૌ ।
પ્રાપ્તા તવ પદસેવા
શ્રમલવરહિતં ભુવીહ મર્ત્યૈઃ સ્યાત્ ॥ ૮.૧૫॥

તસ્માત્ કમપિ હિ માર્ગં
જગતિ સમાલમ્બ્ય નાથ ! ધુતદોષૈઃ ।
યત્નો વિધીયમાન-

સ્તવ પદસેવૈકલિપ્સયૈવ દૃઢમ્ ॥ ૮.૧૬॥

ભુવનવિધાતૃત્વં વા
ત્રિભુવનમાન્યં પદં તથૈન્દ્રં વા ।
અપિ દિગધીશત્વં વા
ત્વત્પદસેવાફલાન્નાન્યત્ ॥ ૮.૧૭॥

જગતઃ સૃષ્ટિં કુર્વ-
ન્નપિ નનુ ભવદાજ્ઞયૈવ વિધિરીશ ! ।
લભતે બન્ધાન્મુક્તિં
મનસા સ્મૃત્વૈવ તે પદામ્ભોજમ્ ॥ ૮.૧૮॥

ભુવનદુરાપાન્ ભોગાન્
ભુઞ્જાનોઽપ્યથ વલારિરયિ નાકે ।
અધિગતસકલાર્થોઽસૌ
વૃણુતે ત્વત્પાદસેવનૈકરતિમ્ ॥ ૮.૧૯॥

તદ્વદ્ધનદજલેશ-
જ્વલનયમોગ્રાદયોઽપિ દિક્પાલાઃ ।
શિરસિ કૃતાઞ્જલિબન્ધં
ત્વત્પદસેવાં સદૈવ યાચન્તે ॥ ૮.૨૦॥

ઇદમિહ શીલં ૧ભવિનાં
યદિહ કિલાવાપ્તુમીપ્સિતં કિમપિ ।
સેવન્તે મુરવૈરિં-
સ્તત્પ્રાપ્તેર્હેતુભૂતમયિ વસ્તુ ॥ ૮.૨૧॥

ઈપ્સિતલાભે તુ પુનઃ
ક્ષણમપિ તન્નાદ્રિયન્ત ઇહ નૂનમ્ ।
ચિરમિહ વાઞ્છિતલબ્ધ્યૈ
સંસેવિતમપ્યતીવ યત્નેન ॥ ૮.૨૨॥

શાન્તપિપાસઃ કૂપં
સમ્ભૃતજઠરસ્તથાતિથિર્ગેહમ્૧।
ભિષજં પરિહતરોગ-
સ્ત્યજતિ ધરાયાં નરોઽત્ર નિશ્શઙ્કમ્ ॥ ૮.૨૩॥

૧. અન્નદાતુર્ગૃહમ્ ।

ધનભુવમાપ્તદ્રવિણો
    લબ્ધામ્નાયસ્તથા કિલાચાર્યમ્ ।
જિતરિપુરપિ રણભૂમિં
    પ્રોજ્ઝતિ જગતીહ માનવો નૂનમ્ ॥ ૮.૨૪॥

ઋત્વિઙ્નિકરસ્તદ્વદ્-
    યજમાનં દત્તદક્ષિણં વિધિવત્ ।
દાતારં ત્યજતિ દૃઢં
    સમ્પૂર્ણમનોરથસ્તથૈવાર્થી ॥ ૮.૨૫॥

લબ્ધમરન્દશ્ચ તથા
    મધુપસમૂહઃ સરોજિનીં ત્યજતિ ।
મધુરફલાન્યથ ભુક્ત્વા
    વિટપિનમપિ તદ્વદેવ વિહગતતિઃ ॥ ૮.૨૬॥

અધ્યાત્મજ્ઞાનવિધૂ-
    તાખિલમોહસ્તથા કુતર્કરતિમ્ ।
ત્યજતિ ચ સિદ્ધૌષધભાઙ્-
    ૧માર્ગણમપિ વીરુધામરણ્યભુવામ્ ॥ ૮.૨૭॥

૧. અન્વેષણમપિ ।

વનભુવિ ધાવન્ ધાવન્
    વિધૃતશરાસેષુરચ્યુત ! પુલિન્દઃ ।
મૃગમનુ મૃગમદલાભે
    ત્યજતિ તદેતચ્ચ સાહસં સહસા ॥ ૮.૨૮॥

તસ્માદ્ભવિનઃ સર્વે
    જગતિ કિલાશ્રિત્ય વાઞ્છિતાવાપ્ત્યૈ ।
તત્પ્રદમચ્યુત ! વસ્તુ
    ત્યક્ષ્યન્તીતિ સ્ફુટં તદિષ્ટાપ્તૌ ॥ ૮.૨૯॥

૧તર્હિ ત્રિદિવદુરાપા-
    નપિ ભોગાન્ દાતુમત્ર કા દક્ષા ।
ઇતિ ખલુ વિચાર્યમાણે

ત્વત્પદસેવૈવ ભૂતલે ત્વેકા ॥ ૮.૩૦॥

૧. એવં સ્થિતે ।

અનધિગતાર્થા મનુજા
વરદભવત્પાદસેવયાથ તયા ।
અધિગતસકલાર્થાઃ સ્યુ-
ર્લક્ષ્મીજાને ! ભુવીહ નિશ્શઙ્કમ્ ॥ ૮.૩૧॥

અધિગતસકલાર્થાશ્ચ
દ્રુહિણવલારાતિમુખ્યવિબુધેન્દ્રાઃ ।
કિમિહ સ્પૃહયન્તસ્ત્વત્-
પદભજનં સારસાક્ષ ! રચયન્તિ ॥ ૮.૩૨॥

તાવકચરણસરોજ-
દ્વન્દ્વનિષેવાફલસ્વરૂપાણામ્ ।
સ્વીયાનાં પદવીનાં
નિત્યં પરિરક્ષણાર્થમિતિ વિદ્મઃ ॥ ૮.૩૩॥

તર્હિ જગન્નશ્વરતાં
વિજ્ઞાયાશેષવસ્તુવિમુખાનામ્ ।
જનયતિ કસ્માત્ સક્તિં
યમિનામપિ તાવકાઙ્ઘ્રિયુગસેવા ॥ ૮.૩૪॥

ઇતિ ખલુ ભૂયો ભૂયો
મનસા સમ્યગ્વિચાર્યમાણે તુ ।
ભાતિ હિ મે ધિષણાયાં
પઙ્કજનાભૈવમેવ વાચ્યમિતિ ॥ ૮.૩૫॥

અસ્તિ સ્ફુટમિહ તસ્યાં
કિમપિ સુખં ત્વત્પદાબ્જસેવાયામ્ ।
અનુપમમક્ષુબ્ધતમં
સ્થિરમમલં ત્વનુભવૈકવેદ્યમહો ॥ ૮.૩૬॥

જગતિ વિભો ! વિજ્ઞાતું
યદશક્યં કરણપઞ્ચકેનાપિ ।
વાઙ્મનસયોરવિષયો

જયતિ સુખં તત્ તવાઙ્ઘ્રિભજનભવમ્ ॥ ૮.૩૭॥

નિર્ણેતું તદ્રૂપં
શેકુર્નાદ્યાપિ હન્ત મુનયોઽપિ ।
કિમુત સુમન્દમનીષાઃ
સ્યાનન્દૂરેશ ! માદૃશા મનુજાઃ ॥ ૮.૩૮॥

સકૃદનુભૂય ચ સૌખ્યં
તત્ પદસેવાભવં તવેહ વિભો ! ।
કો નુ વિદધ્યાત્ સક્તિં
જડમતિરપિ લૌકિકેષ્વયિ સુખેષુ ॥ ૮.૩૯॥

વિષયસુખેષુ નરાણાં
સ્યાન્નૂનં તાવદેવ સુખબુદ્ધિઃ ।
યાવત્ ત્વત્પદસેવા-
ભવસૌખ્યં નાપ્યતે નિરસ્તતમઃ ॥ ૮.૪૦॥

યદ્વન્મૃગતૃષ્ણાયાં
તોયભ્રાન્ત્યા પ્રધાવતીહ મૃગઃ ।
તદ્વદ્વિષયસુખેષુ
ભ્રમતિ કિલાજ્ઞો જનઃ સુખભ્રાન્ત્યા ॥ ૮.૪૧॥

કિઞ્ચન ગુળસમ્મિશ્રાં
ગુળિકાં લોકેઽત્ર નિમ્બચૂર્ણકૃતામ્ ।
મુક્ત્વા કઃ સુખમીયાત્
૧તદ્વદહો સુખમપીહ વિષયભવમ્ ॥ ૮.૪૨॥

૧. તાદૃશગુળિકાભોજનસુખવત્ ।

હાસ્યો યત્નો યદ્વત્
કાચમણેર્લબ્ધયે હિ મર્ત્યાનામ્ ।
તદ્વદ્વિષયસુખસ્ય
પ્રાપ્ત્યૈ રચિતઃ સ્ફુટં નૃભિર્યત્નઃ ॥ ૮.૪૩॥

સ્તોકસુખં બહુદુઃખં
યસ્માલ્લોકે વિભાતિ વિષયસુખમ્ ।
દુઃખદમેવેતિ તતો

विज्ञेयं तन्मुकुन्द ! निश्शङ्कम् ॥ ८.४४॥

કિઞ્ચ ન જાગર્તિ તથા
કિમપિ સુખં ત્રિષ્વપીશ! ભુવનેષુ ।
યન્ન હિ દુઃખવિમિશ્રં
ત્વત્પદસેવાસુખાદૃતે વિમલાત્ ॥ ૮.૪૫॥

તસ્માત્ ત્વત્પદ્સેવા-
જન્યસુખસ્યાંશલેશમપિ લોકે ।
પ્રાપ્તું દક્ષાણિ સ્યુઃ
કથમન્યાન્યમ્બુજેક્ષણ! સુખાનિ ॥ ૮.૪૬॥

પ્રચલત્તુઙ્ગતરઙ્ગ-
સ્યામ્ભોધેરપિ કદાચિદધ તોયમ્ ।
૧ગણયેન્ન તુ બત સીમાં
ત્વત્પદસેવાભવસ્ય સૌખ્યસ્ય ॥ ૮.૪૭॥

૧. પરિચ્છિન્દ્યાત્ ।

ગણયેદપિ ૧પુરટાનાં
રાશીન્ હેમાચલસ્થિતાનમિતાન્ ।
જગતિ તથાપિ ન સીમાં
શર્મતતેસ્તાવકાઙ્ઘ્રિભજનભુવઃ ॥ ૮.૪૮॥

૨. સુવર્ણાનામ્ ।

કિં બહુના સિદ્ધાન્તાઃ
સર્વે યાન્ત્યેવ પૂર્વપક્ષત્વમ્ ।
પદભજનાત્મક એક-
સ્તવ ભગવન્ ! શિષ્યતે હિ રાદ્ધાન્તઃ ॥ ૮.૪૯॥

કિઞ્ચ જગત્ત્રયપાપ-
વ્યૂહચ્છેદે કિલા૧સ્ય વૈદગ્ધ્યમ્ ।
પ્રથયતિ જહ્નોસ્તનયૈ-
વોદ્ભૂતા નનુ પદાજયુગલાત્ તે ॥ ૮.૫૦॥

૧. પદભજનસ્ય ।

પ્રભવતિ વક્તું કો વા

માહાત્મ્યં જગતિ જહ્નુતનયાયાઃ ।
વહતે યાં નનુ શિરસા
સાદરમદ્યાપિ પાર્વતીશોઽપિ ॥ ૮.૫૧॥

શ્રવણં દર્શનમાત્રં
યસ્યાઃ પાપાનિ હન્તિ સકલાનિ ।
કિમુત વિભો ! ૧તત્ર કૃતં
મજ્જનમથવા તદમ્ભસાં પાનમ્ ॥ ૮.૫૨॥

૧. ગઙ્ગાયામ્ ।

તસ્યાસ્તુઙ્ગતરઙ્ગો-
લ્લુઠનસમુદ્ભૂત કલકલારાવમ્ ।
શ્રુત્વા ભૃશતરભીત્યા
ધાવતિ પાપં ન કાસ્વહો દિક્ષુ ॥ ૮.૫૩॥

ક્ષુદ્રતરૈનસ્કાનાં
પાતકહારીણિ સન્તિ તીર્થાનિ ।
નિષ્કૃતિનિવહૈરપ્યઘ-
મનિવાર્યં હરતિ દેવ ! ગઙ્ગેયમ્ ॥ ૮.૫૪॥

૧યન્નામાક્ષરમાદ્યં
શ્રુત્વા ૨કલયન્તિ કર્ણયોઃ પાણિમ્ ।
તીર્થાન્યન્યાનીદૃ૩ક્-
પાતકિલાભો મહોત્સવો યસ્યાઃ ॥ ૮.૫૫॥

૧. યસ્ય પાતકિનો નામઘટકમક્ષરમ્ । ૨. પાતકસઙ્ક્રમભયાદિતિ ભાવઃ ।
૩. ઈદૃગ્ અન્યતીર્થોદ્વેજકનામધેયો યઃ પાતકી તસ્ય લાભઃ ।

અધ્વરદાનાદિભિર-
પ્યનિવાર્યં રોગમીશ! પાપમયમ્ ।
સહસા દૂરીકર્તું
વિલસતિ પરમં હિ ભેષજં ગઙ્ગા ॥ ૮.૫૬॥

પાયં પાયં તોયં
ગઙ્ગાયા યાવદિચ્છમિહ યે તુ ।
જાયન્તે ગતતાપા-

સ્તદ્ભાગ્યં કો ભવેત્ પટુર્વક્તુમ્ ॥ ૮.૫૭॥

તાપત્રયમભિહન્તું
લોકસ્યાત્માનમાશ્રિતસ્ય પરમ્ ।
મન્યે ગઙ્ગા જાતા
નામ્નેયં ૧ત્રિપથગેતિ વિશ્વગુરો !॥ ૮.૫૮॥

૧. ત્રિપથેન આધ્યાત્મિકાધિભૌતિકાધિદૈવિકરૂપતાપત્રયહનનાનુકૂલેન
માર્ગત્રયેણ ગચ્છતીત્યેવં ત્રિપથગાનામનિર્વચનમુત્પ્રેક્ષ્યતે ।

સંસેવ્યેહ શરીરી
ભાગ્યાદ્ભાગીરથીં હતાઘૌઘામ્ ।
દેવત્વં દિવિ લબ્ધ્વા
ભવિતા ૧ભાગીરથી નનુ સુધાયામ્ ॥ ૮.૫૯॥

૧. યથાક્રતુન્યાયેન સેવ્યાભિન્નઃ, અથ ચ (સુધાયાં) ભાગી અંશી રથી ।
રથવાંશ્ચ ।

તનુરિવ સા વિશ્વસૃજો
ભાતિ ભૃશં ૧સર્વતોમુખવતી ચ ।
વહતિ તથૈવ સરાગાં
શ્રીનાથ! ૨સરસ્વતીં ચ મુરવૈરિન્ ॥ ૮.૬૦॥

૧. જલવતીં સર્વત આનનવતીં ચ । ૨. નદીં વાગ્દેવીં ચ ।

વિન્દતિ નરકે પાપી
નાનારૂપં શ્રમં ન વૈ પાપમ્ ।
લભતે ગઙ્ગાયાં તુ
શ્રમમતુલં પાપમેવ ન તુ પાપી ॥ ૮.૬૧॥

દણ્ડયતીહ કૃતાન્તો
નરકે ખલુ પાપિનં વિધૂતદયમ્ ।
નિર્મુચ્યાઘિનમઘતો
દણ્ડયતીહાઘમેવ સુરતટિની ॥ ૮.૬૨॥

સકુતુકમહહ લુઠન્ત-
સ્તદ્વીચીતતિષુ માનવાઃ કે કે ।
લુઠનૈર્નરકે રહિતા

ભગવન્ ! નો યાન્તિ મોદમનવદ્યમ્ ॥ ૮.૬૩॥

હન્ત વિમાનારૂઢા-
નાયાતો વીક્ષ્ય પાપિનો નાકે ।
૧તત્સમ્પર્કાદ્દિવા
અપિ મૂર્ધ્ના સન્નમન્તિ હિ રવિમાનાઃ ॥ ૮.૬૪॥

૧. ગઙ્ગાસમ્પર્કાત્ । ૨. નિરહઙ્કારાઃ ।

અઘિનાં સુકૃતવતાં ચ
સ્યાન્નૂનં તાવદેવ નનુ ભેદઃ ।
યાવજ્જહ્નુસુતાયાઃ
સલિલેન ક્ષાલ્યતે નિજં ન વપુઃ ॥ ૮.૬૫॥

સદ્ભિર્ગર્હિતમવનૌ
દર્શનમપિ પાપિનાં યેષામ્ ।
અનુષઙ્ગાદ્ગઙ્ગાયા-
સ્તેઽપિ ભવન્ત્યતિથયો ૧નિલિમ્પપુરે ॥ ૮.૬૬॥

૧. દેવનગરે ।

યામ્યભટોત્સાહો વા
તદ્વત્ કોલાહલશ્ચ તન્નગરે ।
યાતો વિલયં સહસા
યાવદ્ગઙ્ગા મહીતલં પ્રાપ્તા ॥ ૮.૬૭॥

સુમનઃસૌરભ૧હરણ-
પ્રોદ્ભૂતોદ્વેલપાતકોઽપિ પરમ્ ।
અનુષઙ્ગાજ્જહ્નુભુવ-
સ્ત્રિભુવનમનિશં પુનાતિ પવમાનઃ ॥ ૮.૬૮॥

૧. હરણેતિ - ચોરણેત્યર્થઃ ।

કૃત્વા પૂતાન્ કૃત્સ્નાન્
પાતકિનઃ પુનરપીહ તાન્ લિપ્સુઃ ।
મન્યે માર્ગયતીયં
સુરતટિની ગિરિશમૌલિમધિરુહ્ય ॥ ૮.૬૯॥

ભરિતક્ષારજલં તં

સ્વીકૃત્યામ્ભોનિધિં સ્વભર્તૃતયા ।
હેયમપેયમપીયં
કલયતિ તીર્થાવતંસમિહ લોકે ॥ ૮.૭૦॥

અગ્ર્યગિરોઽપ્યનુભાવં
ગઙ્ગાયાઃ વક્તુમુદ્યતાઃ કવયઃ ।
૧વ્યગ્રતરત્વં વચસિ
સ્ફુટમનઘ! પ્રાપ્નુવન્તિ નો કે કે ॥ ૮.૭૧॥

૧. આકુલતરત્વમ્ ।

ગઙ્ગાવર્ણનલોલૈઃ
કવિતિલકૈરતિશયોક્તિરિહ લોકે ।
કરુણાનિધે ! પ્રયુક્તા
ભવતિ હિ નિસ્સંશયં સ્વભાવોક્તિઃ ॥ ૮.૭૨॥

સાદૃશ્યાનુપપત્તે-
સ્તસ્યાઃ કેનાપિ વસ્તુના લોકે ।
ઉપમાનાભાવવશાદ્-
વાચ્યો નૂનં ત્વનન્વયઃ કવિભિઃ ॥ ૮.૭૩॥

નિજરસનાગ્રાત્ કવિભિ-
ર્જ્ઞાતું સમ્પ્રેષિતેવ ગુણમસ્યાઃ ।
મન્યે ૧સરસ્વતી સા
શ્લિષ્યતિ ગઙ્ગાં રસરસ્વતીભૂય ॥ ૮.૭૪॥

૧. વાગ્દેવી । ૨. નદીવિશેષીભૂય ।

ધીરસમીરોદ્ધૂત-
સ્વચ્છસુશીતામ્બુશીકરોપેતમ્ ।
તીરં ગાઙ્ગં શ્રિત્વા
સ્વર્વાસેઽપિ સ્પૃહાં ન કસ્ત્યજતિ ॥ ૮.૭૫॥

તરવસ્તત્તીરભવાઃ
પવનચલૈર્મૃદુતલૈઃ સ્વપર્ણાગ્રૈઃ ।
રચયન્તિ વીજનવિધિં
યેઽસ્યાસ્તે નૂનમીશ! ધન્યતમાઃ ॥ ૮.૭૬॥

લસતાં ગઙ્ગાસલિલે
    સરસિરુહાણાં મિષેણ સુરસુદૃશામ્ ।
પશ્યન્તીનામેનાં
    દૃશ્યન્તે બિમ્બિતાનિ વદનાનિ ॥ ૮.૭૭॥

ચિત્રં ૧ભઙ્ગવતી સા
    તનુતે સંશ્રિતમરભઙ્ગસુખપૂર્ણમ્ ।
૩જલમચ્યપ્યથ નૃણા-
    મજ્ઞાનં હરતિ નિસ્તુલં સહસા ॥ ૮.૭૮॥

૧. તરઙ્ગવતી અપાયવતી ચ । ૨. અનપાયિસૌખ્યભરિતમ્ ।
૩. જલશબ્દો જડે પયસિ ચ ।

મનુજૈર્મુક્તિકરીતિ
    સ્વનદીતિ સુરૈસ્ત્વદઙ્ગજેતિ વરૈઃ ।
શં તનુતામિતિ મુનિભિઃ
    શન્તનુદાયિતા પ્રકીર્તિતા સેયમ્ ॥ ૮.૭૯॥

શિશુશશિચૂડાં સ્વકરૈઃ
    કુમ્ભામ્ભોજે વરાભયે દધતીમ્ ।
શુભ્રાં શુભ્રાભરણાં
    સિતમકરસ્થાં સ્મરન્તિ તાં કૃતિનઃ ॥ ૮.૮૦॥

ઇયમપિ મકરન્દત્વં
    પ્રાપ્તા યત્રાઙ્ઘ્રિપઙ્કજે ભવતઃ ।
ગઙ્ગા સકલાઘહરા
    તસ્ય નિષેવા કથં નૃણાં ન સ્યાત્ ॥ ૮.૮૧॥

તસ્માત્ કાર્યો યત્નો
    જગતિ સમસ્તૈઃ શુભેચ્છુભિર્મનુજૈઃ ।
તાવકચરણસરોજ-
    દ્વન્દ્વનિષેવાપ્તયે હિ નિશ્શઙ્કમ્ ॥ ૮.૮૨॥

અથ કથયામ્યયિ ભગવન્ !
    પદયુગસેવાવિધિં તવેહ મુદા ।
સકલસુરાસુરમર્ત્ય-
    પ્રણતપદામ્ભોરુહસ્ય તવ કૃપયા ॥ ૮.૮૩॥

વપુષા વચસા મનસે-
　　ત્યેવં ભવતિ ત્રિધા ચરણસેવા ।
ઉત્કર્ષમાસુ ચ તિસૃ-
　　ષ્વીશ! વદન્ત્યુત્તરોત્તરં મુનયઃ ॥ ૮.૮૪॥

શિરસા તવ પદયુગલા-
　　ન્નિસ્સૃતમથ તીર્થતીર્થમજ! તોયમ્ ।
સકલવિધાંહઃક્ષતયે
　　સન્તતમખિલેશ ! ધારયેન્મનુજઃ ॥ ૮.૮૫॥

તદિદં સમ્પ્રોક્ષ્ય પુનઃ
　　સર્વાઙ્ગેષ્વપિ પુમાનસૌ સલિલમ્ ।
સ્વતનુસ્થિતમિહ પાપં
　　સર્વં વિદ્રાવયેદશેષગુરો !॥ ૮.૮૬॥

તદ્વત્ ત્વત્પદકમલ-
　　દ્વયવરિવસ્યાર્હમાદરાન્નિત્યમ્ ।
સુરભિલકુસુમકદમ્બક-
　　મવચિત્યારાત્ તવોપદીકુર્યાત્ ॥ ૮.૮૭॥

ભવદઙ્ઘ્રિવ્યતિકરતો
　　ધન્યતમૈસ્તુલસિકાદલૈર્નિતરામ્ ।
નિચિતાયાં ચિરમવનૌ
　　વિલુઠેત્ પુલકી સબાષ્પનેત્રશ્ચ ॥ ૮.૮૮॥

તાવકચરણસરોજ-
　　દ્વન્દ્વસમાલોકનેન નનુ પરમમ્ ।
સાફલ્યં વરદ ! દૃશો-
　　ર્લક્ષ્મીનાથાર્જયેદયં મનુજઃ ॥ ૮.૮૯॥

પદયુગવિગલત્તુલસી-
　　દલનિચયાઘ્રાણતસ્તવાજસ્રમ્ ।
ધન્યતમામઘવૈરિન્ !
　　મનુજોઽયં નાસિકાં તથા કલયેત્ ॥ ૮.૯૦॥

દોર્ભ્યામઞ્જલિવન્ધં

કલયેત્ તદ્વત્ તવાઙ્ઘ્રિસરસિજયોઃ ।
હરતિ હિ નિશ્શઙ્કં યો (FN  યો - અઞ્જલિબન્ધઃ)
બન્ધમશેષં રમાપતે ! ભવિનામ્ ॥ ૮.૯૧॥

અઘહર! વચસા ચ તથા
સેવાં રચયેન્મુકુન્દ ! પદયોસ્તે ।
સકલપરીતાપૌઘ-
ક્ષતયે મર્ત્યોઽયમાદરાન્નિત્યમ્ ॥ ૮.૯૨॥

પ્રથયતિ વાગેકૈવ
સ્ફુટમિહ ભેદં નરસ્ય તિર્યગ્ભ્યઃ ।
ક્વ નુ વિનિયોજ્યા સા ચ
શ્રીરમણ! વિના તવાઙ્ઘ્રિસેવાયાઃ ॥ ૮.૯૩॥

દ્રવિણમદોન્મત્તાના-
મસતાં પ્રીત્યૈ વચોભિરલમુદિતૈઃ ।
મનુજેન કણ્ઠશોષા-
દપરં કિં ફલમિહાપ્યતે ભૂમૌ ॥ ૮.૯૪॥

તસ્માન્નૈગમ૧વચસાં
માલિકયા મુખરિતાસ્ય ઇહ મનુજઃ ।
ચરણસરોરુહયોસ્તે
સેવાં કલયેદમેયસુખદાત્રીમ્ ॥ ૮.૯૫॥

૧. વૈદિકવાચામ્ ।

યદ્યધિકારો ન સ્યાત્
૧તત્ર તુ પૌરાણિકૈર્નુતિવચોભિઃ ।
અથવા કેવલવચનૈઃ
પ્રણતિપરૈસ્તવ નિષેવ્યમજ ! ચરણમ્ ॥ ૮.૯૬॥

૧. વૈદિકવચસ્સુ ।

મનસાપ્યજિત ! શરીરી
તવ ચરણસરોજયોસ્તથા સેવામ્ ।
સુદૃઢતરેણ વિધ્યાત્
સર્વવરિષ્ઠામશેષલોકગુરો !॥ ૮.૯૭॥

ન ચલતિ કરણસમૂહો
      યસ્ય વ્યાપારમન્તરા લોકે ।
મનસા તેનૈવ કૃતા
      તવ પદસેવા રમેશ ! મુખ્યતમા ॥ ૮.૯૮॥

તસ્માદ્વિષયસમૂહાત્
      સહસેદં સન્નિવર્ત્ત્ય નનુ હૃદયમ્ ।
પઙ્કજનાભ! તવાઙ્ઘ્રિ-
      દ્વન્દ્વનિષેવારતં સદા કલયેત્ ॥ ૮.૯૯॥

કરણત્રિતયેનૈવં
      પદકમલં તે નિષેવતે યો વા ।
ઇહ ચ પરત્ર ચ સોઽયં
      શર્મ પરં પ્રાપ્નુયાદસન્દિગ્ધમ્ ॥ ૮.૧૦૦॥

ઇતિ સ્વાતિશ્રીરામવર્મવઞ્ચિમહારાજવિરચિતાયાં
ભક્તિમઞ્જર્યાં અષ્ટમશતકમ્ ।

## અથ નવમશતકમ્ ।

સ્યાનન્દૂરાધીશ! વક્ષ્યામ્યથાહં
      ભાગ્યપ્રાપ્યાં તાવકીનાર્ચનાખ્યામ્ ।
ભક્તિં સદ્યઃ પઞ્ચમી કૈટભારે !
      વિશ્વોત્કૃષ્ટાં નાથ! સર્વાર્થદાત્રીમ્ ॥ ૯.૧॥

ક્વાહં શૌરે ! મન્દબુદ્ધિર્નિકામં
ક્વાસૌ ભૂમા તાવકીનાર્ચનસ્ય । (FN ભૂમા - મહિમા)
દેવાથાપિ પ્રેરયેત્ ત્વત્કૃપા મે
વાણીં યદ્વત્ તદ્વદેતાં બ્રવીમિ ॥ ૯.૨॥ (FN એતાં - ભક્તિમ્)
દેવાઃ સેન્દ્રાસ્તાપસાસ્ત્યક્તમોહા
      યદ્વૈ નિત્યં પ્રાર્થયન્તે નિકામમ્ ।
તસ્માલ્લક્ષ્મીનાયકાભ્યર્ચનાત્ તે
      કોઽન્યો લાભઃ કેશવાસ્તે વરીયાન્ ॥ ૯.૩॥

તસ્માત્ સમ્પ્રાપ્યેહ દેહી નરત્વં
      તત્રાપ્યમ્ભોજાક્ષ ! મુખ્યં દ્વિજત્વમ્ ।

યો વા ધત્તે નિત્યમારાધને તે
　　વાઞ્છાં સોઽયં ધન્યધન્યોઽત્ર નૂનમ્ ॥ ૯.૪॥

જન્મન્યદ્ધા પાણયો વૈ પરસ્મિન્ (FN પરસ્મિન્ - અન્યસ્મિન્ અતીતે ઇત્યર્થઃ)
　　યેષાં પૂજાં ચક્રિરે ન ત્વદીયામ્ ।
જાયન્તે તે ચક્રવર્ત્યેકયોગ્યૈ-
　　શ્ચિહ્નૈર્ભાસ્વત્પાણિપદ્માઃ કથં વા ॥ ૯.૫॥

કિઞ્ચ શ્રીમન્ ! સાર્થકત્વં હિ પાણે-
　　ર્મર્ત્યોઽયં તે પ્રાપ્નુયાત્ પૂજયૈવ ।
નો ચેદુચ્ચૈર્જૃમ્ભિતાનાં તરૂણાં
　　શાખાભ્યઃ કસ્તસ્ય જાગર્તિ ભેદઃ ॥ ૯.૬॥ (FN કઃ - પાણેઃ)
ત્વામારાધ્ય શ્રીપતે! વિશ્વનાથં
　　પ્રીતિં લબ્ધું શક્નુયાદત્ર કસ્તે ।
કિન્તુ ૧સ્ફૂર્જદ્ભક્તવાત્સલ્યભાવાદ્-
　　૨ગૃહ્ણીષેઽ૩ર્ચામલ્પિકામપ્યનલ્પામ્ ॥ ૯.૭॥

૧. સ્ફૂર્જદ્ભક્તેષુ વાત્સલ્યં યસ્ય તસ્ય ભાવાત્ । ૨. ગણયસીત્યર્થઃ,
૩. પૂજામ્ ।

નાલઙ્કારો લેપનં નો નિવેદ્યં
　　નો વા નૂનં ગીતવાદિત્રઘોષઃ ।
સમ્પ્રીત્યૈ સ્યાદઙ્ગ ! તે ભક્તિદત્તં
　　યત્ કિઞ્ચિત્ ત્વં મન્યસે વસ્તુ પૂર્ણમ્ ॥ ૯.૮॥

કિં માર્ત્તણ્ડસ્તેજસામેકધામ
　　પ્રીતો નાસ્તે દીપનીરાજનાભિઃ ।
સિન્ધુસ્તદ્વચ્ચાર્પિતૈઃ સ્નાનકાલે
　　રત્નૈસ્તુષ્યેત્ કિં ન રત્નાકરોઽપિ ॥ ૯.૯॥

શ્રીમંસ્તદ્વલ્લોકપાલૈરશેષૈ-
　　રપ્યત્યર્થં પૂજિતસ્ત્વં મુરારે ! ।
પૂજાયામપ્યસ્મદાદ્યૈઃ કૃતાયા-
　　મઙ્ગૈર્નિત્યં તુષ્યસિ હ્યસ્તશઙ્કમ્ ॥ ૯.૧૦॥

તસ્માદ્યાવચ્છક્તિ મર્ત્યૈરશેષૈઃ
　　પૂજાયાં તે પૂજિતસ્યાખિલેશૈઃ ।

દ્રાગાલમ્બ્યં જાગરૂકત્વમદ્ધા
　　નિત્યં શ્રેયોલિપ્સુભિઃ શાર્ઙ્ગપાણે! ॥ ૯.૧૧॥

લક્ષ્મીજાને! વક્તુમદ્યારભેઽહં
　　કિઞ્ચિત્ પાથોજાક્ષ! પૂજાવિધિં તે ।
ભક્તોત્તંસાયોદ્ધવાયોપદિષ્ટં
　　કારુણ્યામ્ભોરાશિનાહો ત્વયૈવ ॥ ૯.૧૨॥

ત્વત્પૂજાયાં લોલુપોઽથ દ્વિજન્મા
　　મર્ત્યો લોકે સ્વીયશાખાનુસારાત્ ।
યુક્તે કાલે તૂપનીતો મુહૂર્ત્તે
　　બ્રાહ્મે તુ સ્યાદુત્થિતઃ શાર્ઙ્ગપાણે! ॥ ૯.૧૩॥

કૃત્વા પશ્ચાદ્દન્તસઙ્ક્ષાલનાદ્યં
　　ગૃહ્ણન્મૃત્સ્નાં વૈદિકૈસ્તાન્ત્રિકૈશ્ચ ।
મન્ત્રૈઃ કૃત્વા પ્રોક્ષણાદીનિ સમ્યક્
　　સ્નાતઃ સન્ધ્યાવન્દનાદીનિ કુર્યાત્ ॥ ૯.૧૪॥

ભૂયો વિષ્ણું પૂજયામીતિ કૃત્વા
　　સઙ્કલ્પં તે પ્રારભેતાઙ્ગ ! પૂજામ્ ।
સમ્પ્રાપ્યારાદ્દેવગેહં ચ પૂજા-
　　સમ્ભારાંસ્તે સાધુ સમ્ભૃત્ય મર્ત્યઃ ॥ ૯.૧૫॥

શૈલી તદ્વદ્દારુરૂપા ચ લૌહી
　　૧લેપ્યા લેખ્યા સૈકતી હૃન્મયી ચ ।
દૈત્યારાતે ! રત્નમય્યપ્યથૈવં
　　હ્યષ્ટાસ્વદ્ધા પૂજયેન્મૂર્ત્તિષુ ત્વામ્ ॥ ૯.૧૬॥

૧. સુધાદિકલ્પિતા ।

તાસુ શ્રીમંસ્ત્વાં તિસૃષ્વાદિમાસુ
　　પ્રાર્ચન્ ભક્ત્યા રત્નમય્યાં ચ મૂર્તૌ ।
નિર્માલ્યોદ્વાસં વિધાયાથ મન્ત્રૈઃ
　　પુંસૂક્તાદ્યૈસ્તેઽભિષેકં ચ કુર્યાત્ ॥ ૯.૧૭॥

લેપ્યાલેખ્યાસૈકતીષ્વત્ર ભૂમન્ !
　　કૃત્વા મર્ત્યઃ કેવલં ૧માર્જનં ચ ।

ગન્ધૈઃ પુષ્પૈર્ભૂષિતાયાસ્તુ મૂર્ત્તે-
સ્તિષ્ઠેદ્ભાગે દક્ષિણે પૂજકસ્તે ॥ ૯.૧૮॥

૧. માર્જનં કેવલં, ન ત્વભિષેકમ્ ।

પાણૌ સન્ધાર્યાથ સવ્યે પવિત્રં
૧ગુર્વાદીનપ્યાશુ સંવન્દ્ય પાણિમ્ ।
સંશોધ્યારાદસ્ત્રમન્ત્રેણ કુર્યા-
૨ન્મન્ત્રાત્માનૌ મૂલમન્ત્રેણ હસ્તૌ ॥ ૯.૧૯॥

૧. આદિપદગ્રાહ્યા વિનાયકાદયઃ ।
૨. "મૂલવ્યાપકતો વરૌ મનુમયૌ હસ્તૌ સમુત્પાદ્ય ચ"
ઇતિ તન્ત્રસમુચ્ચયઃ ।

કૃત્વા તાભ્યાં ચ ૧ત્રિતાલાદિકં વૈ
૨ભાસ્વત્સઙ્ખ્યૈર્માનસોઙ્કારલાપૈઃ ।
પ્રાણાયામં સંવિધાયાથ નાસા-
નિષ્ઠા નાડીઃ શોધયેત્ ૩પિઙ્ગલાદ્યાઃ ॥ ૯.૨૦॥

૧. આદિપદાદ્ દિગ્બન્ધાદિ ગ્રાહ્યં "અસ્ત્રેણાતનુયાત્
ત્રિતાલદશદિગ્બન્ધાગ્નિસાલોદયાન્" (તન્ત્રસમુચ્ચયઃ)।
૨. દ્વાદશભિઃ । ૩. આદ્યપદાદિલાસુષુમ્નયોર્ગ્રહણં"સમી-
રયામવિધિના સંશોધ્ય નાડીત્રયમ્" (તન્ત્રસમુ।)

પશ્ચાત્ કુર્વન્ રેચકં ૧દ્વ્યષ્ટવારં
જપ્ત્વોઙ્કારં સાધ્વથો ૨પૂરકં ચ ।
દ્વાત્રિંશદ્વારં ૩ચતુષ્ષષ્ટિવારં
૪કુમ્ભં કુર્યાદર્ચકસ્તે મુરારે !॥ ૯.૨૧॥

૧. ષોડશકૃત્વઃ"પ્રભઞ્જનં પિઙ્ગલયા
બહિસ્ત્યજેદ્વિકારસઙ્ખ્યૈઃ પ્રણવૈરથેડયા ।
પ્રપૂરયેત્ તદ્દ્વિગુણૈઃ પ્રભઞ્જનં પ્રપૂરિતં
બ્રહ્મપથે પ્રકુમ્ભયેત્ ॥"(તન્ત્રસમુ) ।
૨. પૂરકં કુર્વન્ દ્વાત્રિંશદ્વારં ઓઙ્કારં જપ્ત્વેતિ યોજના ।
૩. ચતુષ્ષષ્ટિવારમોઙ્કારં જપન્ કુમ્ભકં કુર્યાદિતિ યોજ્યમ્ । ૪. કુમ્ભકમ્ ।

ભૂયશ્ચાસૌ ૧ભાવયન્નાત્મસામ્યં

જીવસ્યાહો હંસમન્ત્રં ચ જપ્વા ।
જીવં પશ્ચારધોજયેદાત્મનીશે
ત્વામભ્યર્ચન્ બાઢમેકાગ્રચેતાઃ ॥ ૯.૨૨॥

૧. આત્મના પરમેશ્વરેણ સામ્યં “એવં કુમ્ભકકર્મણા
સ્વપરમૈશ્વર્ય સુધીર્ભાવયેત્ । ઉન્નીય હંસમનુનાધર
ચક્રતસ્તમર્કામ્બુજસ્થપરમાત્મનિ સઙ્ગમય્ય ॥” (તન્ત્રસમુચ્ચયઃ)।
૨. સઙ્ગમયેત્ ।

દૈત્યારાતે! પઞ્ચભૂતાન્યથાસૌ
પાદાગ્રાદિષ્વઙ્ગકેષુ ૧સ્થિતાનિ ।
તત્તન્મન્ત્રૈર્વૈ ક્રમેણાચ્યુત ! ભ્રૂ-
મધ્યસ્થાયાં ૨સંહરેચ્ચ પ્રકૃત્યામ્ ॥ ૯.૨૩॥

૧. ”પાદાગ્રનાભિહૃદયાબ્જાશરોધિતાલુદેશસ્થિતાનિ
પૃથિવીપ્રમુખાનિ પઞ્ચ”
(તન્ત્રસમુચ્ચયઃ)। ૨. સ્વસ્વકારણેષુ પ્રવિલાપયેત્ ।
“સંહૃત્યૈવં ક્ષિતિં વારિ તદનલ ઇમં માતરિશ્વન્યમં ખે”
ઇત્યાદિ (તન્ત્રસમુચ્ચયઃ) ।

તાં ચ શ્રીમન્ ! સોઽથ તન્મન્ત્રપૂર્વં
સંહૃત્યારાચ્છ્રીપરાત્મન્યુપેન્દ્ર ! ।
કુર્યાત્ પશ્ચાદ્દેહ૧સંશોષણાદ્યં
કર્મ શ્રેષ્ઠં વક્ષ્યમાણક્રમેણ ॥ ૯.૨૪॥

૧. આદ્યપદાત્ પ્લોષણં પ્લાવનં ચ ગ્રાહ્યમ્ ।

વાયોર્બીજેનાઙ્ગમુચ્છોષ્ય વહ્ને-
ર્બીજેનાભિપ્લોષ્ય બીજેન ચાપામ્ ।
સમ્પ્લાવ્યાત્યન્તં ઘનીકૃત્ય ૧પૃથ્વ્યા
૨રન્ધ્રીકુર્યાત્ ખસ્ય બીજેન સોઽયમ્ ॥ ૯.૨૫॥

૧. પૃથ્વ્યા બીજેન ઘનીકૃત્યેતિ યોજ્યમ્ । ૨. ”કાઠિન્યરન્ધ્રીકરણે
વિધાય સ્વબીજતઃ” (તન્ત્રસમુચ્ચયઃ) ।

સઙ્કલ્પ્યાહો દિવ્યદેહં ચ પશ્ચા-
જ્જપ્ત્વોદ્ધારં ચાન્તરાવેશ્ય જીવમ્ ।

સંહારસ્ય ૧વ્યુત્ક્રમેણેહ સૃષ્ટિં
      કુર્યાન્માયાયાશ્ચ ભૂતોત્કરસ્ય ॥ ૯.૨૬॥

૧. સંહારક્રમવૈપરીત્યેન ।

પ્રાણાયામેનાલમોઙ્કારયુક્તે-
      નાણ્ડં નિર્ભિદ્યાયમંશૌ તદીયૌ ।
૧સઙ્કલ્પ્યાથો ૨રોદસી ચક્રપાણે !
      પ્રાણાયામં ચાપિ કુર્યાન્મુરારે !॥ ૯.૨૭॥

૧. ધ્યાત્વા । ૨. દ્યાવાભૂમી । ઇદં તદન્તર્યેયપુરુષસ્યાપ્યુપલક્ષણં,
તદ્ધ્યાનસ્યાપિ તન્ત્રસમુચ્ચયેઽભિધાનાત્ ।

બાહ્યોર્દેહે ચાથ ૧વિન્યસ્ય વર્ણાં
      વર્ણાત્માનં ભાવયન્નીશ ! દેહમ્ ।
જીવં મૂર્ધસ્થે પરાત્મન્યથાસૌ
      દૈત્યારાતે! યોજયેદર્ચકસ્તે ॥ ૯.૨૮॥

૧. બાહોરક્ષરન્યાસમુક્ત્વા "આકેશાદાપદામ્ભોજં લિપ્યા
સંવ્યાપયેત્ તનૌ" ઇતિ તન્ત્રસમુચ્ચયઃ ।

મન્ત્રાત્માનં ભાવયન્મૂલમન્ત્રે-
      ણૈનં પશ્ચાદચ્યુતા૧વેશ્ય ચાન્તઃ ।
પ્રાણાયામેનેશરૂપસ્ય જીવ-
      સ્યાથો દેહં કલ્પયેત્ સ્થૂલસૂક્ષ્મમ્ ॥ ૯.૨૯॥

૧. નિવેશ્ય । નિવેશિતસ્ય ચાસ્ય પઠિપૂજાનન્તરમ્ ।

બિમ્બે આવાહનં ૪૪ શ્લોકે વક્ષ્યતે ।
ઉત્પાદ્યાથો તત્પરીવારવૃન્દં
      તસ્ય સ્થિત્યૈ પૂર્વમુક્તક્રમેણ ।
વિન્યસ્યામ્ભોજાક્ષ ! ગુર્વાદિકાન્ વૈ
      તત્તત્સ્થાનેષ્વર્ચયેદીશ! પીઠમ્ ॥ ૯.૩૦॥

પીઠે તસ્મિન્ સુસ્થિતસ્યેશિતુર્વૈ
      તેજોવ્યાપ્તં ભાવયન્ પાણિયુગ્મમ્ ।
પશ્ચાત્ તેન ૧વ્યાપકોપેતમદ્ધા
      ન્યસ્યેદ્દેહે દેવ! બાહ્યોશ્ચ વર્ણમ્ ॥ ૯.૩૧॥

૧. મૂલમન્ત્રોપેતમ્ ।

પશ્ચાદ્ભૂમન્! ૧પઞ્ચતત્ત્વાનિ તદ્વદ્-
દૈત્યારાતે! ૨મૂલમન્ત્રાક્ષરાણિ ।
૩અષ્ટાઙ્ગં ચાપ્યત્ર ૪પઞ્ચાઙ્ગકઞ્ચ
ન્યસ્યેત્ સ્ફૂર્જદ્ભક્તિરીશાર્ચકસ્તે ॥ ૯.૩૨॥

૧. પૃથિવ્યાદીનિ । ૨. મૂલમન્ત્રાક્ષરસહિતાનીત્યર્થઃ ।
૩. દોર્ભ્યાં પદાભ્યામંસાભ્યામુરસા શિરસા દૃશા વચસા મનસા ।
૪. બાહુભ્યાં ચ સજાનુભ્યામુરસા ચેતિ ઉક્તાષ્ટાઙ્ગયુક્તમિતિ ક્રિયાવિશેષણમ્ ।
શિરસા દૃશા ઇતિ પઞ્ચાઙ્ગાનિ ભક્તિમઞ્જર્યામ્ ।

ભૂયઃ શ્રીમન્! શઙ્ખચક્રાબ્જકૌમો-
દક્યાદીન્યપ્યત્ર દિવ્યાયુધાનિ ।
કોટીરોત્તંસોરુકેયૂરહારા-
દીનિ ન્યસ્યેદર્ચકો ભૂષણાનિ ॥ ૯.૩૩॥

લક્ષ્મી ભૂમી ચાથ તૈસ્તૈશ્ચ મન્ત્રૈ-
ર્મુદ્રાભિશ્ચાપ્યઙ્ગ ! વિન્યસ્ય પશ્ચાત્ ।
વિધ્યુક્તાં તાં સમ્પ્રકુર્વીત સોઽયં
દૈત્યારાતે! માનસીમીશ! પૂજામ્ ॥ ૯.૩૪॥

જપ્ત્વા યાવચ્છક્તિ તે મૂલમન્ત્રં
સદ્યઃ પૂજામારભેતાથ બાહ્યામ્ ।
પ્રેમોદ્રેકાત્ ત્વય્યશેષાધિનાથે
કારુણ્યાબ્ધૌ બાઢમેકાગ્રચેતાઃ ॥ ૯.૩૫॥

ભૂયઃ સોઽયં પૂર્વમુક્તક્રમેણૈ-
વામ્ભઃપૂર્ણં સાધુ સમ્પૂજ્ય કુમ્ભમ્ ।
કૃત્વા શૌરે ! શઙ્ખસમ્પૂરણં વૈ
કુર્યાત્ પશ્ચાદાદરાદાત્મપૂજામ્ ॥ ૯.૩૬॥

તત્તદ્દ્રવ્યૈસ્ત્રીણિ પાત્રાણિ પૂર્ણા-
ન્યદ્ધા વિન્યસ્યાર્ઘ્યપાદ્યાઽચમાર્થમ્ ।
સદ્યઃ શૌરે ! પીઠપૂજાં પ્રકુર્યાત્
ત્વત્પૂજાયાઃ પૂર્વમેવાખિલાત્મન્ !॥ ૯.૩૭॥

૧. આચમેત્યસ્ય આચમનેત્યર્થઃ ।

ભાગે પીઠસ્યોત્તરે ૧દેશિકં ચ
ધ્યાયેત્ તદ્વદ્દક્ષિણે વારણાસ્યમ્ ।
ભાગે ચાધસ્તદ્વદાધારશક્તિં
માયાં કર્મ ચાપ્યનન્તં ચ પૃથ્વીમ્ ॥ ૯.૩૮॥

૧. ગુરુમ્ ।

તદ્વત્ પીઠસ્યોપરિષ્ટાન્મુરારે !
ધર્મજ્ઞાના૧દીંસ્તરદન્યાંશ્ચ ભૂયઃ ।
પાદસ્થાનત્વં કિલામાન્ યથાવદ્-
ધ્યાયેત્ સોઽયં દિક્ષુ ભૂયો વિદિક્ષુ ॥ ૯.૩૯॥

૧. આદિપદાદ્વૈરાગ્યૈશ્વર્યયોર્ગ્રહણમ્ । ૨. અધર્માદીન્ ।

પશ્ચાદ્ભૂમંસ્તદ્ગુ૧ણાનાં ત્રયં વૈ
સૂત્રસ્થાનાપન્નમદ્ધા વિભાવ્ય ।
માયાં વિદ્યાં ચાલમાચ્છાદનાર્થં
વસ્ત્રસ્થાનત્વં કિલામે સ્મરેત્ સઃ ॥ ૯.૪૦॥

૧. સત્ત્વરજસ્તમસામ્ ।

ધ્યાયેત્ તસ્યાથોપરિષ્ટાદનન્તં
યુક્તં પદ્મં ત્વષ્ટભિર્વૈ દલૈશ્ચ ।
૧સૂર્યં સોમં વહ્નિમાત્મારન્તરાત્મા-
દીનપ્યદ્ધા વિષ્વગારાધકસ્તે ॥ ૯.૪૧॥

૧. સૂર્યાદયશ્ચાષ્ટ । ૨. આદિપદગ્રાહ્યા જીવાત્માદયઃ ।

ધ્યાયેત્ સોઽયં તદ્દલેષ્વત્ર ભૂમં-
સ્તદ્વચ્ચાહો કર્ણિકાયાં ક્રમેણ ।
શૌરે ! શક્તીર્વૈ નવ પ્રેમભારૌ-
ત્કણ્ઠ્યાન્નિત્યં ન્યસ્તચેતાસ્ત્વયીશે ॥ ૯.૪૨॥

એવમ્ભૂતાં તાં સમષ્ટિં મુરારે !
પીઠસ્યાહો તોયગન્ધપ્રસૂનૈઃ ।ટ્યો
તદ્વત્ પૂતૈર્ધૂપદીપામ્બુભિશ્ચા-
પ્યેષ શ્રીમન્ ! પૂજયેત્ પૂજકસ્તે ॥ ૯.૪૩॥

પશ્ચાન્મૂર્ત્તૌ નાથ! પીઠસ્થિતાયાં
ચેતોમધ્યાદ્દેવમાવાહ્ય સદ્યઃ ।
પૂર્વં તાવદ્દેહશુદ્ધ્યુક્તરીત્યા
ન્યસ્યેદ્ભૂષાહેતિમુખ્યાન્યથાસૌ ॥ ૯.૪૪॥

પશ્ચાચ્ચાસાવાસનસ્વાગતાદિ
સ્ફૂર્જત્પ્રેમ્ણા વૈ સમર્પ્યાભિષેકમ્ ।
કુર્યાત્ તોયેનાતિસૌરભ્યભાજા
પુંસૂક્તાદીંસ્ત્રીન્ સમુચ્ચાર્ય મન્ત્રાન્ ॥ ૯.૪૫॥

ભૂયો વસ્ત્રં ભૂષણં ચોપવીતં
ગન્ધં પુષ્પં ચાર્ચકોઽસૌ સમર્પ્ય ।
યુક્તં દેવં પઞ્ચકેનાવૃતીનાં
લક્ષ્મીજાને! પૂજયેદુક્તરીત્યા ॥ ૯.૪૬॥

એકીકુર્વંસ્તત્પરીવારમીશે
યાવચ્છક્તિ શ્રીશ! કુર્વન્ નિવેદ્યમ્ ।
મધ્યે વહ્નેર્હોમકર્માદિ કુર્યાત્
તદ્વદ્વિપ્રાન્ સાધુ સમ્ભોજયેચ્ચ ॥ ૯.૪૭॥

વિષ્વક્સેનાયાર્પયંસ્તન્નિવેદ્યં
ગણ્ડૂષાસ્યક્ષાલનૈ૧રાસ્યવાસૈઃ ।
ગીતૈર્નૃત્યાદ્યૈશ્ચ સન્તોષ્ય દેવં
કુર્યાત્ પશ્ચાદાશુ પૂજાં પ્રસન્નામ્ ॥ ૯.૪૮॥

૧. મુખાધિવાસનૈઃ ।

ભૂયશ્ચાપૂપાદિ શક્ત્યા નિવેદ્ય
૧પ્રેષ્ઠૈર્મન્ત્રૈઃ સાધુ પુષ્પાઞ્જલિં ચ ।
કૃત્વા યાવચ્છક્ત્યહો મૂલમન્ત્રં
જપ્ત્વા કુર્યાદર્પણં વૈ જપસ્ય ॥ ૯.૪૯॥

૧. ભગવત્પ્રિયતમૈઃ ।

નત્વા બ્રાહ્મણ્યર્પયંશ્ચ પ્રસન્નં
દત્વાથાર્ઘ્યં શઙ્ખતોયેન પશ્ચાત્ ।

પ્રોક્ષ્ય સ્વીયાન્ સ્વં તથાન્ત્યાર્ઘ્યદાયી
કુર્વન્ પૂજાં પૂરયેદ્વૈ ૧લયાઙ્ગમ્ ॥ ૯.૫૦॥

૧. સમાસ્યઙ્ગમ્ ।

એવં ભક્ત્યા નિત્યમારાધયેદ્ય-
સ્ત્વામારાધ્યં નાથ! વિશ્વૈકનાથૈઃ ।
સોઽયં પાપૈર્દૂરિતો હન્ત સર્વૈ-
ર્નૂનં શર્મ પ્રાપ્નુયાન્નિર્મલં તત્ ॥ ૯.૫૧॥

તત્રાપિ ત્વામર્ચયન્ શ્રીતુલસ્યાઃ
પત્રૈરેષ શ્યામલૈઃ કોમલૈસ્તે ।
પ્રીતિં દત્તે યાદૃશીં તાદૃશીં ન
ત્વામારાધ્યન્ કૈશ્ચિદન્યપ્રસૂનૈઃ ॥ ૯.૫૨॥

ત્યક્ત્વા તાવત્ પારિજાતાદિપુષ્પૈ-
રપ્યાનદ્ધાસ્ત્વં સ્રજો વિશ્વહૃદ્યાઃ ।
ધત્સે નિત્યં યાં કથં નામ વીરુ-
ત્સ્વેષા ગણ્યા સ્યાત્ તુલસ્યાર્તબન્ધો !॥ ૯.૫૩॥

ત્વદ્ભક્તઃ કિં માનુષેષ્વત્ર ગણ્યો
ગણ્યઃ કિં વા પક્ષિજાતૌ ગરુત્માન્ ।
ગણ્યા શૌરે ! સ્યાત્ કથં સા તુલસ્ય-
પ્યઙ્ગ ! પ્રેષ્ઠા તેઽત્ર વીરુદ્ગણેષુ ॥ ૯.૫૪॥

સંવાદોઽભૂદ્યઃ પુરા શક્તિસૂનો-
માર્કણ્ડેયસ્યાપિ વિશ્વૈકબન્ધો ! ।
માહાત્મ્યાવિષ્કારકઃ શ્રીતુલસ્યા-
સ્તં વક્ષ્યેઽદ્ય ત્વત્કૃપાવૈભવેન ॥ ૯.૫૫॥

ગાઙ્ગે તાવત્ સૈકતે વૈ વસિષ્ઠા-
દીનાં પૂર્વં સઙ્ગતાનાં મુનીનામ્ ।
જ્ઞાતું શ્રેયો વાઞ્છતામસ્ય લોક-
સ્યાસીદ્ભૂમન્! કોઽપિ સંવાદ એવમ્ ॥ ૯.૫૬॥

કિં વા શ્રેયઃ પૂરુષાણાં પ્રિયં કિં
લક્ષ્મીજાનેઃ કોઽત્ર જીવત્યમોઘમ્ ।

કો વા દેવઃ સેવિતઃ સર્વદોષાન્
નિર્હન્ત્યસ્ય પ્રાણિજાલસ્ય ચેતિ ॥ ૯.૫૭॥

માર્કણ્ડેયઃ સપ્તકલ્પાન્તજીવી
પ્રાપ્તસ્તાવત્ સર્વસન્દેહહારી ।
પૂર્વોક્તૈસ્તૈસ્તાપસૈઃ પૂજિતોઽસૌ
પ્રીત્યાભીક્ષ્ણં તત્ર ૧ચોપાવિવેશ ॥ ૯.૫૮॥

૧. ઉપાવિષ્ટઃ ।

સોઽયં તેષાં સંશયૌઘં જિહીર્ષુ-
ર્દૃષ્ટ્વાઽઽસીનં વૈ વસિષ્ઠાઙ્ગદેશે ।
શક્તેઃ ૧પુત્રં સપ્તવર્ષં ત્વદીય-
સ્મૃત્યા ધન્યં તૂત્થિતસ્તં વવન્દે ॥ ૯.૫૯॥

૧. પરાશરમ્ ।

માર્કણ્ડેયં સ્વં નમન્તં સદસ્યાન્
કૃત્વાત્યન્તં વિસ્મિતાન્ ભૂરિવૃદ્ધમ્ ।
દૃષ્ટ્વા ભીતસ્તં પ્રણમ્યાયમુત્થા-
પ્યૈતદ્વાક્યં પ્રશ્રિતઃ સઞ્જગાદ ॥ ૯.૬૦॥

વન્દ્યો જ્યાયાંસ્ત્વં મયા નેહ બાલઃ
સોઽહં વૃદ્ધૈર્જાતુચિત્ ત્વાદૃશૈસ્તુ ।
ધુન્યઃ સર્વાસ્ત્વાશ્રયન્ત્યેવ સિન્ધું
સિન્ધુઃ કામપ્યાપગામાશ્રયેત્ કિમ્ ॥ ૯.૬૧॥

માર્કણ્ડેયસ્તાવદૂચે તથા ચે-
દાયુર્ગણ્યં ત્વાવયોરદ્ય સદ્યઃ ।
શ્રુત્વાથૈતચ્છક્તિસૂનુર્વભાષે
ક્વાહં બાલઃ ક્વાતિવૃદ્ધો ભવાંશ્ચ ॥ ૯.૬૨॥

શ્રુત્વાથેદં ભાષિતં શક્તિસૂનો-
સ્તેષાં મધ્યે તાપસાગ્રેસરાણામ્ ।
માર્કણ્ડેયસ્તં પ્રહસ્યાબભાષે
વાણીમેનાં વક્ષ્યમાણાં વરેણ્યામ્ ॥ ૯.૬૩॥

યદ્વલ્લોકે સાધુ હિત્વા બુસૌઘં

શુદ્ધસ્તાવન્મીયતે ધાન્યરાશિઃ ।
એવં શૌરેર્ધ્યાનરિક્તં સુવન્ધ્યં
કાલં ત્યક્ત્વા ગણ્યમાયુર્નરાણામ્ ॥ ૯.૬૪॥

તસ્માદ્વિષ્ણોર્ધ્યાનધન્યં યદાયુ-
ર્વન્દ્યઃ સોઽયં વીતસન્દેહલેશમ્ ।
બાલોઽપિ ત્વં જાતુચિચ્ચાનપેતઃ
શૌરેઃ સ્મૃત્યા યત્ તતઃ સર્વવન્દ્યઃ ॥ ૯.૬૫॥

જાત્યૈવાત્યન્તાલસોઽહં કદાચિદ્-
યુક્તઃ સ્મૃત્યા દિવ્યયા કૈટભારેઃ ।
તસ્માન્મત્તો ન્યૂનવર્ષોઽપિ સ ત્વં
વન્દ્યો નૂનં મે પરં જ્યાયસોઽપિ ॥ ૯.૬૬॥

તસ્માદ્બાલો હ્રસ્વકાયોઽપિ મર્ત્યો
વન્દ્યો વૃદ્ધૈરપ્યહો વિષ્ણુભક્તઃ ।
યદ્વત્ સામ્યં શ્રીતુલસ્યા મહિમ્ના
પ્રાપ્તું શક્તા નો મહાન્તોઽપિ વૃક્ષાઃ ॥ ૯.૬૭॥

કો વા શક્તો વક્તુમત્રાનુભાવં
વિશ્વોત્કૃષ્ટં ભૂતલે શ્રીતુલસ્યાઃ ।
યાભૂચ્છ્રેષ્ઠા સર્વવીરુદ્ગણેભ્યો
હ્રસ્વાપિ શ્રીચક્રપાણેઃ પ્રિયા ચ ॥ ૯.૬૮॥

લક્ષ્મીનાથઃ કલ્પવૃક્ષપ્રસૂના-
ન્યપ્યુજ્ઝિત્વા ભૂરિગન્ધાવહાનિ ।
ધત્તે નિત્યં વક્ષસા યાં સહર્ષે
સેયં માન્યા સ્યાન્ન કેનેહ પુંસા ॥ ૯.૬૯॥

ઇત્યુક્ત્વાસૌ શ્રીતુલસ્યા મહત્ત્વં
માર્કણ્ડેયસ્તદ્દૃઢીકર્તુકામઃ ।
તેષાં મધ્યે તાપસાગ્રેસરાણા-
મેનાં ગાથાં વક્ષ્યમાણાં ન્યગાદીત્ ॥ ૯.૭૦॥

આસીત્ પૂર્વં કૃષ્ણકો નામ વિપ્ર-
સ્ત્યક્તાશેષસ્વીયધર્મઃ ખલાત્મા ।
મૂઢઃ ક્ષેત્રાજીવકો હન્ત નિત્યં

ગર્હ્યઃ સર્વૈર્હિંસકઃ પ્રાણિનાં ચ ॥ ૯.૭૧॥

નો જાનીતે તદ્રસજ્ઞા મુરારે-
નર્મિકં વા ગર્હાસઁલ્લાપવર્જમ્ ।
નો વા બાહૂ વન્દનં વિશ્વભર્તુ-
ર્હિંસાવર્જં પ્રાણિનાં દૈન્યભાજામ્ ॥ ૯.૭૨॥

પ્રાતર્ભુક્ત્વા યાતયામં બતાન્નં
યાતોઽરણ્યં ત્વેકદાસૌ નિકેતાત્ ।
કઞ્ચિત્ કાલં પર્યટંસ્તત્ર તત્ર
દ્રાગાજહ્રે ભૂરિ નૂત્નં તૃણૌઘમ્ ॥ ૯.૭૩॥

ભૂયઃ સોઽયં શાકસમ્પાદનાર્થં
તત્રૈવાહો સઞ્ચરન્ કાનનાન્તે ।
આલોકિષ્ટોચ્ચૈર્વનં શ્રીતુલસ્યા
દિષ્ટ્યા રમ્યં નિર્જરેન્દ્રોપલાભમ્ ॥ ૯.૭૪॥

સર્વોત્કૃષ્ટાં સાહિતીં યદ્વદજ્ઞો
રત્નં યદ્વદ્ભૂરિમૂલ્યં વિચક્ષુઃ ।
યદ્વદ્ભોજ્યં સ્વાદ્વલં રાસભો વા
તન્માહાત્મ્યં કૃષ્ણકો ન વ્યજાનાત્ ॥ ૯.૭૫॥

ભૌમં તોયં ચાતકો હન્ત યદ્વદ્
યદ્વદ્ગીતં જાતિબાધિર્યશાલી ।
યદ્વદ્ગુગણો ભોજ્યવસ્તૂનિ તદ્વત્
તન્માહાત્મ્યં વેદ ન ૧બ્રહ્મબન્ધુઃ ॥ ૯.૭૬॥

૧. બ્રાહ્મણાધમઃ ।

યદ્યપ્યેવં સસ્પૃહોઽથાપિ તસ્યાં
પશ્યન્ નૃણાં નો ગવાં ચોપયોગમ્ ।
તાં દાસ્યે મત્સન્નિધિસ્થાય વિપ્રા-
યેતિ ધ્યાયન્ પ્રાપ તસ્યાઃ સમીપમ્ ॥ ૯.૭૭॥

તાવદ્વિપ્રં તં બતાસન્નમૃત્યું
નેતું પ્રાપ્તા યામ્યદૂતાઃ કિલાષ્ટૌ ।
સ્પર્શાત્ પ્રાગેવામુમદ્ધા તુલસ્યા

દંષ્ટું કશ્ચિદ્વ્યાલ૧મૂચુઃ ક્ષણેન ॥ ૯.૭૮॥

૧. ચોદિતવન્તઃ ।

વિપ્રસ્તાવત્ તં નજાનન્ નિદેશં
દૈવાત્ સર્પસ્યાગતેઃ પૂર્વમેવ ।
જગ્રાહાલ્પં ભાગમારાત્ તુલસ્યા-
સ્તન્માહાત્મ્યસ્તોમલેશાનભિજ્ઞઃ ॥ ૯.૭૯॥

તાવજ્જ્વાલાધ્વસ્તગાઢાન્ધકારં
દૈતેયાસૃક્પઙ્કશોણાગ્રભાગમ્ ।
વિષ્ણોશ્ચક્રં સ્પર્શપૂતં તુલસ્યાઃ
પાતું વિપ્રં પ્રાપ દૃશ્યેતરત્ સત્ ॥ ૯.૮૦॥

સન્ત્યક્તાયાં શ્રીતુલસ્યાં હનિષ્યા-
મ્યેનં વિપ્રં દ્રાગિતિ વ્યાલ એષઃ ।
આસીત્ સદ્યઃ સમ્પ્રવિષ્ટસ્તૃણાન્ત-
ર્યામ્યા દૂતાશ્ચાન્વયુસ્તં ક્ષણેન ॥ ૯.૮૧॥

અજ્ઞાત્વેદં હન્ત વિપ્રસ્તૃણાનાં
રાશિં મૂર્ધ્નાસૌ વહન્ ગૃઢસર્પમ્ ।
ચક્રજ્યોતિર્ભીતદૂરાપયાતૈ-
ર્યુક્તો યામ્યૈરાવિવેશ સ્વગેહમ્ ॥ ૯.૮૨॥

કાલે તસ્મિંસ્તદ્ગૃહદ્વારિ તિષ્ઠન્
વિપ્રોત્તંસઃ કોઽપિ કૃષ્ણાર્ચકોઽથ ।
યામ્યાન્ દૂતાન્ દિવ્યદૃગ્ભાઙ્મુદા તાન્
પપ્રચ્છૈવં કૃષ્ણકાભ્યર્ણવાસી ॥ ૯.૮૩॥

ભો ભો યામ્યાઃ ! કિઙ્કરા યૂયમત્ર
પ્રાપ્તાઃ કસ્માત્ કૃષ્ણકેનાઙ્ગ! સાકમ્ ।
મહ્યં બ્રૂતાત્યન્તજિજ્ઞાસમાના-
યેત્યાદિષ્ટાસ્તે કિલોચુઃ સમસ્તમ્ ॥ ૯.૮૪॥

સ્વેષાં વિપ્રં કૃષ્ણકં નેતુ૧માપ્તિં
કૃત્યં ચાહેઃ સ્વાનુશિષ્ટસ્ય રક્ષામ્ ।
ચક્રેણારસ્ય સ્પર્શતઃ શ્રીતુલસ્યા-

સ્તસ્યાસ્ત્યાગે નેતુમિચ્છાં તથા ૩તમ્ ॥ ૯.૮૫॥

૧. આગમનમિત્યર્થઃ । ૨. કૃષ્ણકસ્ય । ૩. કૃષ્ણકમ્ ।

શ્રુત્વા વાણીમીરિતાં યામ્યદૂતૈઃ
સદ્યઃ સમ્ભૂતાનુકમ્પારસાર્દ્રઃ ।
રક્ષોપાયં તસ્ય હિ બ્રહ્મબન્ધોઃ
પપ્રચ્છામૂનેવ કૃષ્ણાર્ચકોઽસૌ ॥ ૯.૮૬॥

ઊચુસ્તાવત્ તે ફલં દાસ્યસિ ત્વં
યદ્યેકસ્યા નસ્તુલસ્યર્ચનાયાઃ ।
મુઞ્ચમોઽ૧મું સોઽકરોત્ તદ્વદ્ધા
જગ્મુર્દૂતાશ્ચોરગઃ સ્વં નિકેતમ્ ॥ ૯.૮૭॥

૧. ઇતિ શબ્દાર્થો ગમ્યઃ ।

દૃષ્ટ્વાથૈતદ્વિસ્મિતાયૈષ તસ્મૈ
વૃત્તં શંસન્ જાતબોધેન તેન ।
ભેજે કિઞ્ચિદ્વૈષ્ણવક્ષેત્રમારા-
ધ્યાજં મુક્તિ પ્રાપતુસ્તૌ તુલસ્યા ॥ ૯.૮૮॥

એનાં ગાથાં શક્તિસૂનું મુનીનાં
મધ્યે તેષાં શ ૃણ્વતાં ભક્તિભાજામ્ ।
માર્કણ્ડેયઃ સઞ્જગાદાનુભાવં
વિશ્વોત્કૃષ્ટં દ્યોતયન્તીં તુલસ્યાઃ ॥ ૯.૮૯॥

શ્રુત્વા સર્વે વૃત્તમેતન્મુનીન્દ્રાઃ
સર્વજ્ઞાસ્તે હર્ષરોમાઞ્ચિતાઙ્ગાઃ ।
માર્કણ્ડેયં પ્રત્યનન્દંસ્તદાસ્ય-
શ્ચોતદ્ગાથાસ્વાદતૃપ્તિં વિનૈવ ॥ ૯.૯૦॥

તસ્માત્ સેવ્યા ત્વત્પદાબ્જપ્રિયૈષા
નિત્યં મર્ત્યૈનેહ સર્વાર્થસિદ્ધ્યૈ ।
ત્યક્ત્વા વીરુદ્બુદ્ધિમસ્યાં સુતીર્થે-
ષ્વદ્ધા યદ્વત્ તોયબુદ્ધિં વિગર્હ્યામ્ ॥ ૯.૧૧॥

નૂનં તાવત્ ત્ર્યક્ષરી સા તુલસ્યા-
ખ્યાસાવામ્નાયત્રયીતોઽપિ ગુર્વી ।

યં ત્વાં નિત્યં સેવતે હિ દ્વિતીયા
સ ત્વં પ્રીત્યા યદ્ભજસ્યચ્યુતાદ્યામ્ ॥ ૯.૯૨
દેશે મેધ્યે લોમકીટાસ્થિરિક્તે
      પ્રાગ્વિસ્તીર્ણં સંવિધાયાલવાલમ્ ।
બીજાવાપં શ્રીતુલસ્યાઃ પ્રકુર્યાત્
      તસ્મિન્ પૂતો માનુષોઽન્તર્બહિશ્ચ ॥ ૯.૯૩॥

પ્રાતસ્સાયં શીતલેનામ્ભસા તા-
      માસિઞ્ચંસ્તત્પત્રસમ્પર્કપૂતમ્ ।
તોયં મૂર્ધ્ના ચોદ્વહેન્મૃગ્યમદ્ધા
      બ્રહ્મેશામર્ત્યાધિપૈઃ સર્ષિસિદ્ધૈઃ ॥ ૯.૧૪॥

સાયં કુર્વન્નેતદીયાલવાલ-
      સ્યાલઙ્કારં દીપમાલાવિશેષૈઃ ।
ભક્ત્યાભીક્ષ્ણં તાં ૧પરિક્રમ્ય નત્વા
      યાવચ્છક્તિ પ્રાર્થયેદચ્યુતૈવમ્ ॥ ૯.૯૫॥

૧. પ્રદક્ષિણીકૃત્ય ।

ભો ભો દેવિ! શ્રીતુલસ્યચ્યુતાઙ્ઘ્રિ-
      દ્વન્દ્વામ્ભોજૈકાસવાસ્વાદધન્યે ।
સંસારામ્ભોરાશિમગ્નં સુદીનં
      કારુણ્યાન્મામુદ્ધરેત્યુલ્લપેચ્ચ ॥ ૯.૯૬॥

એકાદશ્યાં વૈ વિશેષેણ તસ્યા
      મૂલે રાત્રિં યાપયેદપ્રમત્તઃ ।
સાર્ધં સદ્ભિસ્ત્વત્કથામૃષ્ટપીયૂ-
      ષાસ્વાદાત્યન્તાનુરક્તૈઃ સુધન્યૈઃ ॥ ૯.૯૭॥

તન્મૂલસ્થાં કિઞ્ચ મૃત્સ્નાં સુપુણ્યાં
      તદ્વન્મૂર્ધ્ના ચાવહન્નેષ મર્ત્યઃ ।
મુક્તો હિ સ્યાત્ પાતકેભ્યોઽખિલેભ્યઃ
      કારુણ્યાત્ તે નાત્ર કાર્યો વિચારઃ ॥ ૯.૯૮॥

કિં ભૂયોભિર્ભાષિતૈસ્ત્વત્પદાબ્જ-
      સ્પર્શાદ્ધન્યાં નાથ! વિશ્વં પુનન્તીમ્ ।
એનાં નિત્યં સેવમાનો હિ શર્મ

શ્રીમન્ નૂનં પ્રાપ્નુયાદ્ધાનિહીનમ્ ॥ ૯.૯૯॥

તસ્માદેવમ્ભૂતયા શ્રીતુલસ્યા
ધન્યૈરન્યૈઃ ૧સઙ્ગતોઽસ્યાઃ પ્રસૂનૈઃ ।
યો નિત્યં ત્વામર્ચયેદુક્તરીત્યા
કસ્તત્પુણ્યં વક્તુમીષ્ટે ધરાયામ્ ॥ ૯.૧૦૦॥

૧. સઙ્ગાદ્ધેતોઃ

ઇતિ સ્વાતિશ્રીરામવર્મવઞ્ચિમહારાજવિરચિતાયાં
ભક્તિમઞ્જર્યાં નવમશતકમ્ ।

## અથ દશમશતકમ્ ।

વદામ્યથામ્ભોરુહનાભ! ષષ્ઠીં
ભક્તિં ભવદ્વન્દ્વનિરૂપિણીં તામ્ ।
તદર્થમુર્વીકમલેશ! વાણીં
વિધેહિ દાસસ્ય પટીયસીં મે ॥ ૧૦.૧॥

વિરિઞ્ચશર્વામરનાયકાદ્યા
જાતા જગદ્વન્દ્યપદાધિરૂઢાઃ ।
ત્વદઙ્ઘ્રિનત્યૈવ કથં ન વાઞ્છયા
ભવેદિયં ભુવ્યાખલૈરપાપૈઃ ॥ ૧૦.૨॥

અવાપ્યમન્યચ્છિરસા નરસ્ય
સાફલ્યમમ્ભોરુહનાભ! કિં વા ।
વિના પ્રણામાત્ તવ નન્વગણ્ય-
પુણ્યૈકલભ્યાદહિનાથશાયિન્ !॥ ૧૦.૩॥

હરત્યઘં યચ્છતિ વાઞ્છિતાર્થં
સમસ્તપાપૌઘમપાકરોતિ ।
તનોતિ કલ્યાણપરમ્પરામ-
પ્યધોક્ષજાઙ્ઘ્રિદ્વયવન્દનં તે ॥ ૧૦.૪॥

ન હેમકોટીરશતૈઃ સુરત્નૈ-
ર્ન મૂર્ધજૈર્વા સુમદામબદ્ધૈઃ ।
અલઙ્ક્રિયા સ્યાચ્છિરસો યથા વૈ

પ્રણામતસ્તાવકપાદયુગ્મે ॥ ૧૦.૫॥

વહન્નથોષ્ણીષકિરીટકાનાં
સહસ્રમપ્યેષ નરો બતા૧ન્તે ।
સુઘોરવૈવસ્વતદણ્ડઘાતં
નિરોદ્ધુમેતેનર ભવેત્ પટુઃ કિમ્ ॥ ૧૦.૬॥

૧. દેહાપાયે । ૨. ઉષ્ણીષાદિવહનેન ।

અજાનતા ચે૧દમહો જનુષ્મતા
જડાત્મમના ભૂરિમદાન્ધચેતસા ।
અવાપ્યતે જન્મશતેષુ મજ્જનં
પુનઃપુનર્ઘોરભવાબ્ધિવીચિષુ ॥ ૧૦.૭॥

૧. ઉક્ત વસ્તુતત્ત્વમ્ ।

તતો યથા જન્તુરસૌ સુદુર્લભં
પ્રપદ્ય તન્માનવજન્મ વિષ્ટપે ।
વૃથા તદેતદ્વિફલીકરિષ્યતિ
બ્રવીમિ ચૈતત્ કૃપયા તવાધુના ॥ ૧૦.૮॥

યદા જનન્યા જઠરં વિશત્યસૌ
નરોઽસૃગસ્થ્યામિષકલ્પિતાકૃતિઃ ।
તદા ધ્રુવં જ્ઞાનલવેન વર્જિત-
શ્ચિરાય શેતે સ પુરીષકુણ્ડકે ॥ ૧૦.૯॥

ક્રમેણ માસૈર્દશભિઃ સમુદ્ય-
ચ્છિરોભુજોર્વઙ્ઘ્રિમુખપ્રતીકઃ ।
સમેધતે ત્વત્કૃપયૈવ તત્ર
સ્થિતઃ સુદીનઃ કરુણૈકસિન્ધો !॥ ૧૦.૧૦॥

સ્વમાતૃભુક્તૈઃ કટુતિક્તકામ્લ-
મુખૈ રસૈરાકુલિતશ્ચ નિત્યમ્ ।
કદા બહિર્નિર્ગમનં મમ સ્યા-
દિતસ્ત્વિતિ ધ્યાયતિ સર્વકાલમ્ ॥ ૧૦.૧૧॥

વિનિર્ગતોઽપ્યેષ બહિશ્ચ ગર્ભા-
દ્રુદન્ જનન્યાઃ સ્તનમાત્રજીવી ।

ન વેત્તિ નૂનં ભુજગાનલાદીન્
    સ્વનાશહેતૂનપિ બાલ્યકાલે ॥ ૧૦.૧૨॥

સ્વદેહજાતામપિ હન્ત પીડા-
    મશક્ત ઈશાલપિતું પરસ્મૈ ।
રુદત્યસૌ વીક્ષ્ય મુખં સ્વપિત્રો-
    સ્તદઙ્કશાયી ચરણે વિધૂન્વન્ ॥ ૧૦.૧૩॥

રુદત્યમન્દં બહિરપ્યદૃશ્યયા
    સ્તનન્ધયેઽસ્મિન્ રુજયા કયાચન ।
સ્તનં દદાતિ ક્ષુધિતત્વશઙ્કયા
    પ્રસૂસ્ત૧દપ્યસ્ય ગદાય કલ્પતે ॥ ૧૦.૧૪॥

૧. સ્તનદાનમપિ ।

તતઃ શનૈરેષ રમેશ ! પિત્રોઃ
    પરાં મુદં સઞ્જનયંસ્તદગ્રે ।
ચરન્નજાવ્યક્તવચાંસિ વક્તું
    શનૈઃ શનૈરારભતેઽબ્જનાભ! ॥ ૧૦.૧૫॥

અયં નિયુક્તોઽપ્યથ પાઠયોગ્યે
    વયસ્યવાપ્તે શનકૈસ્ત૧દર્થમ્ ।
ગુરોરનાદૃત્ય વચાંસિ ખેલે
    મતિં વિધત્તે સહ નાથ ! બાલૈઃ ॥ ૧૦.૧૬॥

૧. પાઠાર્થમ્ ।

૧તમોમયં હન્ત ૨તમો નરાણાં
    પ્રશાન્તિમભ્યેતિ હિ વિદ્યયૈવ ।
તદર્થમુચ્ચૈર્યતતે ન કાલે
    યદીશ્વર ! સ્યાન્નુ કદા ૩તદાપ્તિઃ ॥ ૧૦.૧૭॥

૧. અજ્ઞાનમયમ્ । ૨. તિમિરમ્ ।
૩. વિદ્યાપ્તિઃ ।

યથૈવ સસ્યાન્યતિલઙ્ઘ્ય કાલં
    વૃષ્ટ્યાપિ ન સ્યુઃ ફલવન્તિ લોકે ।
તથા શ્રમોઽપીશ! કૃતઃ શ્રુતાર્થે

સ્યાદેવ વન્ધ્યો ભગવન્નાલે ॥ ૧૦.૧૮॥

ઇત્થં રમાનાયક! બાલ્યકાલં
વિનીય વિદ્યાગમમન્તરેણ ।
ઉપૈતિ તારુણ્યદશાં સ પશ્ચા-
દજય્યષડ્વૈરિવિહારભૂમિમ્ ॥ ૧૦.૧૯॥

નરેણ યસ્યાં સહસા દશાયાં
સમ્પ્રાર્થનીયઃ ખલુ સાધુસઙ્ગઃ ।
સ એષ દૌર્ભાગ્યવશેન તસ્યાં
નિષેવતે હન્ત ૧તદન્યમેવ ॥ ૧૦.૨૦॥

૧. અસાધુસઙ્ગમેવ ।

તતશ્ચ વિત્તાર્જનલમ્પટોઽસૌ
ચલાનવાપ્યાશુ તથાધિકારાન્ ।
વિમુક્તભાવત્કપદાબ્જચિન્તઃ
પ્રવર્તતે સાધુજનાપકારે ॥ ૧૦.૨૧॥

અતૃપ્તિમાન્ ભૂષણચેલયાન-
ધનોપજીવ્યાવસથેષુ નિત્યમ્ ।
વિહાય સાધ્વીં સ્વવધૂમનાથાં
રતિં વિધત્તે નનુ પુંશ્ચલીપુ ॥ ૧૦.૨૨॥

અવાપ્તમન્યાયવશેન વિત્તં
વિતીર્ય તાભ્યો બત રિક્તહસ્તઃ ।
શનૈર્બલીકઞ્ચુકિતાખિલાઙ્ગો
જરાતુરો હન્ત ભવત્યુપેન્દ્ર !॥ ૧૦.૨૩॥

ન વીક્ષિતું દૃષ્ટિ૧રલં શ્રુતિર્ન
શ્રોતું સદા યષ્ટિરપેક્ષિતા ચ ।
ત્યજન્તિ પુત્રાશ્ચ વધૂશ્ચ શૌરે !
નરો ન કાં યાતિ શુચં જરાયામ્ ॥ ૧૦.૨૪॥

૧. નાલં ન સમર્થા ।

તથા સ્થિતો હન્ત જહાતિ મધ્યં
લોકં વિકૃષ્ટો બત યામ્યદૂતૈઃ ।

અવાપ્ય ઘોરાં નિરયે ચ હિંસાં
 પુનશ્ચ કામપ્યથ યોનિમેતિ ॥ ૧૦.૨૫॥

ઇતિ સ્રગેષા જનિમૃત્યુરૂપિણી
 રમાપતે! નો વિરમેદ્યન્દ૧દન્તરા ।
તદીશ ! તે પાદસરોજવન્દનં
 સદા વિદધ્યાન્મનુજસ્તદેકધીઃ ॥ ૧૦.૨૬॥

૧. યદ્વિના ।

કૃતાઞ્જલિશ્ચાનતકન્ધરો મનાઙ્-
 નિમીલ્ય નેત્રે વિષયેષુ ૧લાલસમ્ ।
મનો નિરુધ્યાઙ્ગ ! તવાઙ્ઘ્રિપઙ્કજે
 નિવેશ્ય કુર્યાત્ સહસા નમસ્ક્રિયામ્ ॥ ૧૦.૨૭॥

૧. લોલુપમ્ ।

ઉરશ્શિરોનેત્રમનોવચોભિઃ
 પદ્ભ્યાં કરાભ્યામહિનાથશાયિન્ ! ।
તથૈવ કર્ણદ્વિતયેન ભક્ત્યા
 કૃતા હિ સાષ્ટાઙ્ગનમસ્ક્રિયોક્તા ॥ ૧૦.૨૮॥

ઇયં વિધેયા વ્રજતા ત્વદાલયં
 નરેણ ભક્ત્યા પુરતસ્તવાનિશમ્ ।
પ્રદક્ષિણીકૃત્ય વિભો ! યથાવિધિ
 સ્તવોત્તમં વ્યાહરતા પદે પદે ॥ ૧૦.૨૯॥

ત્વદીયનામશ્રવણે કથાસુ
 પ્રબોધનિદ્રાગમભોજનેષુ ।
ત્વદાલયસ્થોત્તમવસ્તુદૃષ્ટૌ
 કાર્યા નતિ૧સ્તાવકવીક્ષણે ચ ॥ ૧૦.૩૦॥

૧. ત્વદ્ભક્તદર્શને ।

ઇતીહ યો વન્દનમાચરેત્ પુમાન્
 લોકત્રયીવન્દ્યપદામ્બુજસ્ય તે ।
સ વૈ કૃતાન્તં ચ તદીયકિઙ્કરાન્
 સ્વપ્નેઽપિ નો પશ્યતિ નાત્ર સંશયઃ ॥ ૧૦.૩૧॥

અથારભેઽહં સહસાભિધાતું
 ભક્તિં પરાં માધવ! સપ્તમીં તે ।
જગત્પતે! દાસ્યમિતિ પ્રતીતાં
 કૃપાં તદર્થં કુરુ ૧તાવકે દ્રાક્ ॥ ૧૦.૩૨॥

૧. અર્થાન્મયિ ।

ત્વદીયદાસોઽસ્મ્યહમઙ્ગ ! તુભ્યં
 સમર્પિતં કર્મ મયા કૃતં યત્ ।
ઇતીહ યઃ શ્રેષ્ઠતમસ્તુ ભાવો
 વિદુર્બુધાસ્તાં નનુ દાસ્યભક્તિમ્ ॥ ૧૦.૩૩॥

કરોતિ કર્માણિ યદીહ ચેતનઃ
 ફલેચ્છયા તત્ફલમાત્રમશ્નુતે ।
સમર્પ્ય સર્વં ત્વયિ ચેત્ કરોત્યસા-
 વનન્તમાનન્દમનન્ત ! વિન્દતિ ॥ ૧૦.૩૪॥

સુપર્વવેદાધ્વરમન્ત્રતન્ત્ર-
 તપોવ્રતાદીન્યપિ યન્મયાનિ ।
તથાવિધે ત્વય્યસમર્પિતાનિ
 કથં ભવેયુઃ કુશલાય તાનિ ॥ ૧૦.૩૫॥

યથા હુતં ભસ્મનિ વૃષ્ટિપાતનં
 યથોષરે વા રુદિતં યથા વને ।
યથોપદેશશ્ચ કૃતો જડાત્મને
 તથૈવ કર્મ ત્વદનર્પિતં ભવેત્ ॥ ૧૦.૩૬॥

યથોપકારશ્ચ કૃતઃ કૃતઘ્ને
 યથા ધૃતો વા મુકુરોઽન્ધવક્ત્રે ।
યથૈવ ઘાતશ્ચ તુષસ્ય રાશે-
 સ્તથૈવ કર્મ ત્વદનર્પિતં સ્યાત્ ॥ ૧૦.૩૭॥

યદત્ર દૃષ્ટં યદપીશ્વર ! શ્રુતં
 યચ્ચાનુભૂતં યદધોક્ષજાર્જિતમ્ ।
યદપ્યધીતં ચ યદપ્યુદીરિતં
 ત્વય્યચ્યુતે તત્સકલં સમર્પયેત્ ॥ ૧૦.૩૮॥

ઇષ્ટં યદમ્ભોરુહનાભ! યદ્ધુતં
　　યચ્ચાપિ દત્તં નનુ વિત્તમર્હતે ।
કિં વા બહૂક્ત્યા તનુવાક્યમાનસૈ-
　　ર્યદ્યત્ કૃતં ત્વય્યખિલં તદર્પયેત્ ॥ ૧૦.૩૯॥

સરોજનાભૈવમશેષકર્મા-
　　ર્પણં મનુષ્યસ્ત્વયિ યો વિધત્તે ।
ન બધ્યતે કર્મભિરેષ જાતુ
　　પરં ચ વિન્દત્યયિ શર્મ નિત્યમ્ ॥ ૧૦.૪૦॥

અહીન્દ્રશાયિન્ ! સમુદીરયામિ તાં
　　વરીયસીં ભક્તિમથાહમષ્ટમીમ્ ।
ત્વદીયસખ્યાહ્વયશાલિની જવાદ્-
　　દયા વિધેયા માય નાથ! તત્કૃતે ॥ ૧૦.૪૧॥

સમસ્તવસ્તુષ્વલમસ્થિરેષુ
　　નિસ્સારતાં સમ્યગવેક્ષ્ય બુદ્ધ્યા ।
ત્વય્યેવ વિસ્રમ્ભભરો યદિ સ્યા-
　　ન્ન્યસ્તો ભવેદેષ હિતાય પન્થાઃ ॥ ૧૦.૪૨॥

સમીહમાનસ્ય મનઃ સ્વમસ્મિન્
　　માર્ગે સ્થિરીકર્તુમધીશ! જન્તોઃ ।
પ્રત્યૂહભૂતાનિ મિથો વિભિન્ન
　　તત્ત્વાનિ સન્ત્યઙ્ગ ! મતાનિ લોકે ॥ ૧૦.૪૩॥

પુંસાં તુ યેષામિહ યેષુ યેષુ
　　શાસ્ત્રેષુ ભૂમન્! પ્રતિપત્તિરસ્તિ ।
ભજન્તિ તે માધવ ! તેષુ તેષુ
　　સેવ્યત્વબુદ્ધ્યા પ્રતિપાદ્યભૂતમ્ ॥ ૧૦.૪૪॥

ઉપાસતે કેચન શબ્દ એવ
　　બ્રહ્મેતિ કર્મેત્યણુરિત્યથાન્યે ।
તથા પરે કાલ ઇતીહ લોકે
　　સ્વાભ્યસ્તશાસ્ત્રાનુગુણં મુરારે !॥ ૧૦.૪૫॥

યથારુચીત્થં બહુનામભેદૈ-
　　રુપાસનાસ્વપ્યવનૌ કૃતાસુ ।

તાઃ પર્યવસ્યન્ત્યખિલાત્મકત્વાત્
  ત્વય્યેવ નિસ્સંશયમમ્બુજાક્ષ ! ॥ ૧૦.૪૬॥

અતસ્ત્વયીશાન્યમતેષ્વસક્તો
  દધાતિ વિસ્રમ્ભભરં નરશ્ચેત્ ।
૧સ પાલયત્યેનમહો વિપદ્ભ્યો
  નિશ્શઙ્કમુચ્ચૈરપિ દુસ્તરાભ્યઃ ॥ ૧૦.૪૭॥

૧. વિસ્રમ્ભમરઃ ।

વને સુઘોરે પુરુષાદસેવિતે
  મહાર્ણવે મજ્જતિ વાયુના પ્લવે ।
સમીપવર્તિષ્વથવાऽऽततायિષુ
  પ્રપાલયત્યેનમસૌ ન સંશયઃ ॥ ૧૦.૪૮॥

તથામયે મૂર્છતિ ચાનિવાર્યે
  પતત્સુ શસ્ત્રેષુ રણેऽતિઘોરે ।
ઉપાગતે દસ્યુકુલે જિઘાંસા-
  વવત્યસૌ નિર્વિચિકિત્સમેનમ્ ॥ ૧૦.૪૯॥

પુરા ન કે કે ભગવન ! મહાન્ત-
  સ્ત્વય્યેવ વિસ્રબ્ધધિયોऽખિલાત્મન્ ! ।
વિમોચિતા હન્ત મહાવિપદ્ભ્ય-
  સ્ત્વયૈવ કારુણ્યસુધાર્ણવેન ॥ ૧૦.૫૦॥

સુયોધનઃ પ્રાક્ કુમતિર્વૃકોદરં
  મુખે મિથો ભક્ષ્યસમર્પણચ્છલાત્ ।
અભોજયદ્વૈ ગરદુષ્ટમોદનં
  પયોવિહારેऽથ સુરાપગામ્બુનિ ॥ ૧૦.૫૧॥

સુમૂર્છિતં તં પતિતં ચ નિદ્રયા
  વશીકૃતં હન્ત સ એષ રજ્જુભિઃ ।
નિબધ્ય તોયે શિતશૂલકીલિતે
  દ્રુતં નિચિક્ષેપ તદા દુરાશયઃ ॥ ૧૦.૫૨॥

(યુગ્મકમ્)
અવિક્ષતો દિષ્ટબલેન શૂલૈ

રસાતલં પ્રાપ્ય સ નાગદંશાત્ ।
વિનષ્ટપૂર્વોક્તવિષોઽચ્યુતાહી-
નતાડયત્ તાન્ ભૃશમન્યુતપ્તઃ ॥ ૧૦.૫૩॥

આવેદયામાસુરમી ચ તક્ષકં
સ ચૈત્ય તં વીક્ષ્ય તદાતિમાનયન્ ।
તસ્મૈ દદૌ ૧કુણ્ડરસાષ્ટકં હરે !
નિપીય સુષ્વાપ ૨સ તત્ સુખેન ॥ ૧૦.૫૪॥

૧. કુણ્ડાષ્ટકાભિતં રસમિતિ તાત્પર્યમ્ ।"એવમષ્ટૌ સ કુણ્ડાનિ હ્યપિબત્ પાણ્ડુનન્દનઃ" (ભારતમ્) ૨. વૃકોદરઃ ।

પ્રબુદ્ધમેનં ચ વિવૃદ્ધસત્ત્વં
પ્રમાણકોટ્યાહ્વયદેશમેતે ।
નિન્યુર્ભુજઙ્ગાઃ સ પુરં તતોઽગાત્
શુચે રિપૂણાં ચ મુદે ૧સ્વકાનામ્ ॥ ૧૦.૫૫॥

૧. જ્ઞાતીનામ્ ।

કદાચિદીર્ષ્યાવશગઃ સ પાર્થે
જનાનુરાગાન્વિતરાજ્યલક્ષ્મીમ્ ।
સુયોધનો વીક્ષ્ય કણિઙ્કનામ્ના
સમ્મન્ત્રયામાસ સુદુર્નયેન ॥ ૧૦.૫૬॥

પ્રજ્ઞાદૃશો માધવ! વારણાવતં
પિતુર્મુખેનાશુ તતઃ સ ધર્મજમ્ ।
સમ્પ્રેષ્ય શુશ્રૂષણકર્મણે છલા-
ન્નિયોજયામાસ પુરોચનાહ્વયમ્ ॥ ૧૦.૫૭॥

પુરં ગતાસ્તત્ ખલુ ધર્મજાદ્યાઃ
પુરોચનેનાથ સમં ખલેન ।
ક્રમેણ લાક્ષાસદનં પ્રવિષ્ટા-
શ્ચિકીર્ષિતજ્ઞા અપિ ૧નાગકેતોઃ ॥ ૧૦.૫૮॥

૧. દુર્યોધનસ્ય ।

વસત્સુ તત્રૈષ્વથ ભીમવાચા
સમેત્ય તાવત્ ખનકોઽથ કોઽપિ ।

સમ્પ્રેષિતો વૈ વિદુરેણ ચક્રે
      માર્ગં ૧સુરુઙ્ગામયમાશુ ગૂઢમ્ ॥ ૧૦.૫૯॥

૧. ભૂવિવરરૂપમ્ ।

સમીક્ષ્ય કાલં સપુરોચનં તત્
      પ્લુષ્ટ્વા ગૃહં વાયુસુતઃ ૧સગર્ભ્યૈઃ ।
નિર્ગત્ય તેનેશ ! પથા હિડિમ્બં
      હત્વૈકચક્રં પુરમધ્યવાત્સીત્ ॥ ૧૦.૬૦॥

૧. સોદર્યૈ ।

ઇત્થં મહદ્ભ્યોઽપિ વિપદ્ગણેભ્યો
      મુક્તો હિ યેનૈવ ભવેન્નરોઽસૌ ।
તમીશ! સઙ્ખ્યાત્મકભક્તિયોગં
      ત્વય્યેવ દધ્યાત્ સતતં મનીષી ॥ ૧૦.૬૧॥

રમેશ ! ભક્તિં નવમીમથાહં
      બ્રવીમિ તામાત્મનિવેદનાખ્યામ્ ।
કૃપા તદર્થં તવ પદ્મકોશે
      દિનેશલીલાં હૃદિ મે વિધત્તામ્ ॥ ૧૦.૬૨॥

મમૈતદિત્યઙ્ગ ! સમસ્તવસ્તુ-
      ષ્વત્યન્તસક્તિં સહસા વિધૂય ।
ત્વદર્પણં યત્ ક્રિયતે વિદુસ્તાં
      ભક્તિં બુધા સ્વાત્મનિવેદનાખ્યામ્ ॥ ૧૦.૬૩॥

અથેદૃશજ્ઞાનવિહીનચિત્તાઃ
      કે કે ભ્રમન્તો નનુ કર્મમાર્ગે ।
પુનઃપુનઃ સંસૃતિસિન્ધુમગ્ના
      નો યાન્તિ કં કં ભગવન્ ! વિષાદમ્ ॥ ૧૦.૬૪॥

અહં ધની નાસ્તિ મયા સમોઽન્યો
      મયા સમસ્તા રિપવોઽભિભૂતાઃ ।
ઇત્યૂઢગર્વં હૃદિ ૧ભાવયન્તિ
      સ્વાન્તસ્સ્થષડ્વૈરિજયેઽપ્યદક્ષાઃ ॥ ૧૦.૬૫॥

૧. ચિન્તયન્તિ ।

અહમ્પદસ્યાત્ર કિમીશ! વાચ્યો
દેહો મનઃ કિન્નુ કિમિન્દ્રિયાણિ ।
કિં વા ધનાગારવધૂસુતાદ્યા-
સ્તટિત્પ્રભાસ્ફૂર્જિતચઞ્ચલાનિ ॥ ૧૦.૬૬॥

શરીરચેતઃકરણાદિકાના-
મન્તરિસ્થતઃ પ્રેરક એક આસ્તે ।
ત્વત્તઃ સ ભિન્નઃ કિમુત ત્વમેવ
ધ્રુવં ત્વમેવેતિ મહાત્મનાં ધીઃ ॥ ૧૦.૬૭॥

તસ્માજ્જગત્ ત્વન્મયમેવ ભાવયન્
નિરસ્તવૈરઃ સકલેષુ જન્તુષુ ।
સર્વાત્મના ત્વય્યખિલં સમર્પયે-
દહઙ્કૃતિં હન્ત વિસૃજ્ય દૂરતઃ ॥ ૧૦.૬૮॥

ક્રીતસ્ય યદ્વદ્ગજઘોટકાદેઃ
ક્રેતુર્ભવેત્ પોષણતત્પરત્વમ્ ।
ન્યસ્તાત્મનસ્ત્વય્યખિલેશ્વરે સ્યાત્
સંરક્ષણે ધૂર્વહતા તથા તે ॥ ૧૦.૬૯॥

મુકુન્દ ! કે કે ન તથા મહાન્તઃ
સમર્પ્ય સર્વં ત્વયિ વિશ્વબન્ધૌ ।
અવાપુરામોદરસૈકસાન્દ્રં
તવાઙ્ઘ્રિયુગ્મં પરમશ્રમેણ ॥ ૧૦.૭૦॥

જિતાન્ સ્વપુત્રાન્ બલિના નિરીક્ષ્ય
ખિન્નાદિતિઃ કાશ્યપસૂપદિષ્ટમ્ ।
સા દ્વાદશાહં સ્મ પયોવ્રતં વૈ
ચચાર ભક્ત્યા વરમાપ્તુકામા ॥ ૧૦.૭૧॥

યથાવરાપ્તિ શ્રવણર્ક્ષયુક્તે
સા ૧દ્વાદશીપુણ્યદિને ભવન્તમ્ ।
વટુસ્વરૂપં સુષુવેઽતિધન્યા
તોષ્ટૂય્યમાનં સુરસિદ્ધસઙ્ઘૈઃ ॥ ૧૦.૭૨॥

૧. દ્વાદશીતિ તિથિવિશેષસ્ય સંજ્ઞા ।

હરેઽવતીર્ણસ્ય સ કાશ્યપોઽસૌ
    ભાગ્યામ્બુધિઃ સાધુ સમં સ્વપત્ન્યા ।
તજ્જાતકર્માદિકમાશુકર્મ
    ચક્રે પ્રમોદાશ્રુપરિપ્લુતસ્તે ॥ ૧૦.૭૩ ॥

તતઃ કદાચિદ્બલિયજ્ઞવાટં
    પ્રાપ્તો ભવાંસ્તસ્ય મદાપનુત્ત્યૈ ।
સ્તુત્વા યયાચેઽથ પદત્રયેણ
    મેયાં ભુવં નાથ! વિનીતવેષઃ ॥ ૧૦.૭૪ ॥

કાવ્યેન શપ્તોઽપિ તદીયવાક્ય-
    સ્યોલ્લઙ્ઘનાન્નો બત ભો દિશેતિ ।
પદત્રયં હન્ત દદૌ સ તુભ્યં
    સુરારિનાથો વિભવાવલિપ્તઃ ॥ ૧૦.૭૫ ॥

પદદ્વયેનૈવ સમસ્તલોક-
    માક્રમ્ય મે દેહિ પદં તૃતીયમ્ ।
ઇત્યર્થિતોઽસૌ ભવતા મદીયે
    મૌલૌ નિધેહીતિ ભવન્તમૂચે ॥ ૧૦.૭૬ ॥

બદ્ધોઽથ નાગૈઃ સ્વપિતામહેન (સ્વ - પ્રહ્લાદેન)
    સંસાન્ત્વિતશ્ચાથ પિતામહસ્ય ।
વાચા વિમુક્તો ભવદાજ્ઞયૈવ
    રસાતલે વીતમદો ન્યવાત્સીત્ ॥ ૧૦.૭૭ ॥

ઐશ્વર્યગર્વાન્વિતમાનસોઽપિ
    સ સર્વમપ્યર્પિતવાન્ યતસ્તે ।
તતો ગૃહદ્વારિ ગદાધરોઽસ્ય
    ગદાગ્રજસ્ત્વં સતતં વિભાસિ ॥ ૧૦.૭૮ ॥

સ્વર્ગાધિપત્યં બલશાસનાય
    વિતીર્ય ભૂમન્ ! સહજૈઃ સ્વકીયૈઃ ।
તામધ્યવાત્સીરમરાવતીં ત્વ-
    મુપેન્દ્રસંજ્ઞાલસિતો મુરારે ! ॥ ૧૦.૭૯ ॥

ઇયં હિ ગાથા વટુરૂપિણસ્તે
    પ્રકાશયન્તી બલિગર્વભઙ્ગમ્ ।

જયત્યભીક્ષ્ણં ધનિનો મદાદ્દ્રાગ્
 વિમુચ્ય ભક્તિં ત્વયિ વર્ધયન્તી ॥ ૧૦.૮૦॥

યુધિષ્ઠિરો દિગ્જયલબ્ધસમ્પદં
 નિરીક્ષ્ય સીમારહિતાં મહીપતિઃ ।
યથાર્હમેનામુપયોક્તુમુદ્યતઃ
 સમાહ્વયત્ ત્વાં સુકૃતી સ્વપત્તનમ્ ॥ ૧૦.૮૧॥

સમાગતે ત્વય્યથ ભક્તવશ્યે
 પુરં સ્વકીયં સ ભવન્નિયોગાત્ ।
આરબ્ધવાનચ્યુત! રાજસૂયા-
 હ્વયં ક્રતું દ્રાગ્વિધિવત્ સદીક્ષઃ ॥ ૧૦.૮૨॥

અવન્તિચીનદ્રમિલાઙ્ગવઙ્ગ-
 કશ્મીરકર્ણાટકગુર્જરેશાઃ ।
મહીભૃતો ધર્મસુતં યથાર્હં
 કૃતોપચારાઃ સહસા પ્રણેમુઃ ॥ ૧૦.૮૩॥

ક્રતોઃ સમાપ્તૌ ક ઇહાગ્ર્યપૂજા-
 મર્હત્યુપેતેષ્વિતિ સંશયાનમ્ ।
નૃપં સમાશ્વાસ્ય શશંસ ભીષ્મ-
 સ્તવૈવ પૂજ્યત્વમિહાખિલાત્મન્ !॥ ૧૦.૮૪॥

ઋતેઽથ ચૈદ્યપ્રમુખાન્ સમસ્તે
 તુષ્ટે જને તાં નિશમય્ય વાર્તામ્ ।
ધૌમ્યં પુરસ્કૃત્ય તવાગ્ર્યપૂજાં
 સર્વાત્મના ધર્મસુતો વિતેને ॥ ૧૦.૮૫॥

અમર્ત્યમર્ત્યાસુરસિદ્ધનાગ-
 ગન્ધર્વવિદ્યાધરયાતુયક્ષાઃ ।
મૃગાઃ ખગાઃ ભૂરુહવીરુધોઽપિ
 તદા વિસીમાં કિલ તૃપ્તિમાપુઃ ॥ ૧૦.૮૬॥ (તદા - ત્વદગ્રપૂજાકરણસમયે)
ભવદ્વિનિન્દાપરભાષિતાનિ
 ચૈદ્યેન તાવદ્બહુ જલ્પિતાનિ ।
દ્રુતં તૃણીકૃત્ય ભવત્પ્રશંસાં
 મધ્યેસભં શાન્તનવશ્ચકાર ॥ ૧૦.૮૭॥ (શાન્તનવઃ - ભીષ્મઃ)

સમુદ્યતં ૧તં ત્વથ યજ્ઞભઙ્ગં (તં - શિશુપાલમ્)
કર્તું નૃપે સાન્ત્વયિતું પ્રવૃત્તે ।
નિવાર્ય ભીષ્મોઽકથયત્ ખલાનાં
વક્તા હરિસ્તૂત્તરમિત્યશઙ્કમ્ ॥ ૧૦.૮૮॥

શૌરે ! ત્વયાગશ્શતકેઽપિ સોઢે
ભૂયોઽપરાધપ્રવણસ્ત્વયીશે ।
ચક્રે સ ચક્રેણ નિકૃત્તશીર્ષ-
સ્તતસ્ત્વદૈક્યં સ યયૌ વિશુદ્ધઃ ॥ ૧૦.૮૯॥

તતઃ સમાપ્તેઽજિત ! રાજસૂયે
ક્રતૌ નૃપેન્દુર્યશસા વિરાજન્ ।
વિધાય સદ્યોઽવભૃથં નગર્યાં
સ્વબન્ધુવર્ગૈઃ સસુખં ન્યવાત્સીત્ ॥ ૧૦.૯૦॥

સર્વાત્મનેત્થં ભવદર્પણેન
સન્તોઽભિજગ્મુર્મુદમવ્યયાં યત્ ।
તસ્માદિયં ચાત્મનિવેદનાખ્યા
ભક્તિર્નિષેવ્યા ભુવિ સર્વલોકૈઃ ॥ ૧૦.૯૧॥

ઇતીહ ભૂમન્ ! કથિતા મયાસૌ
તવેશ! ભક્તિર્નવધા સ્મૃતા સા ।
યામાહ પૂર્વં દનુજાર્ભકેભ્યઃ
કાયાધવસ્ત્વત્પદસક્તચિત્તઃ ॥ ૧૦.૯૨॥ (કાયાધવ - પ્રહ્લાદઃ)
એકત્ર ચાપ્યાસુ હિ ભક્તિપદ્ધતિ-
ષ્વાસજ્જમાનો ન ભવાય કલ્પતે ।
પાથોજનાભાથ નવસ્વપીહ યઃ
સંસક્તચેતાઃ સ પુમાંસ્તુ કિં પુનઃ ॥ ૧૦.૯૩॥

સુદુર્લભં પ્રાપ્ય તતો નરત્વં
તત્રાપિ વર્ણે જનનં પ્રશસ્તે ।
ત્વત્પાદપઙ્કેરુહભક્તિમેવ
યતેત લબ્ધું મનુજો મનીષી ॥ ૧૦.૯૪॥

યાવન્મનો વૈ વિષયેષુ લોલં
ભવેન્ન તાવત્ સ્થિરતા હિ ભક્તેઃ ।

અતશ્ચ તામર્જયિતું સદૈવ
 પુંસા વિરક્તિઃ સહસાવલમ્બ્યા ॥ ૧૦.૯૫॥

યદૃચ્છયાऽऽપ્તેન ધનેન તુષ્ટઃ
 સુખેષ્વસૌ વૈષયિકેષ્વસક્તઃ ।
નિરસ્તમાનશ્ચ ભવેદવૈરઃ
 સમસ્તભૂતેષુ દયાપરશ્ચ ॥ ૧૦.૯૬॥

સ પુણ્યતીર્ત્થીટનતત્પરશ્ચ
 નયેત કાલં તવ સત્કથાભિઃ ।
વિહાય વૈ લૌકિકભાષિતાનિ
 જપેચ્ચ દામોદર ! માધવેતિ ॥ ૧૦.૯૭॥

ઇત્થં વિરક્તિઃ સુદૃઢોદિતા ચે-
 જ્જાયેત ભક્તિઃ સ્વયમેવ પુંસઃ ।
તયા પુનર્જ્ઞાનમુદેતિ તેન
 પ્રાપ્નોતિ મુક્તિં ચ ચતુષ્પ્રકારામ્ ॥ ૧૦.૧૮॥

સલોકતા ચૈવ સમીપતા ચ
 સારૂપ્યસાયુજ્યગતી ઇતીશ ! । (સારૂપ્યગતિઃ સાયુજ્યગતિશ્ચ)
મુમુક્ષવો મુક્તિગતિં ચતુર્ધા
 વિદુર્બુધાસ્ત્વત્કૃપયૈવ લભ્યામ્ ॥ ૧૦.૯૯॥

સલોકતા સ્યાદ્વસતિર્વિકુણ્ઠે
 સમીપતા સ્યાત્ ત્વદુપાન્તલબ્ધિઃ ।
સારૂપ્યમુક્તિશ્ચ ૧દરારિમત્ત્વં (શઙ્ખચક્રવત્ત્વમ્)
 સાયુજ્યમુક્તિસ્ત્વયિ લીનતા સ્યાત્ ॥ ૧૦.૧૦૦॥

ઈદૃગ્વિધા મુક્તિગતીરવાપ્તું
 ભોક્તું ચ કામાન્ ભુવનેષ્વભીષ્ટાન્ ।
યા હેતુભૂતા તવ પાદભક્તિ-
 રુદેતુ સેયં મનસિ સ્થિરા મે ॥ ૧૦.૧૦૧॥

ઇતિ સ્વાતિશ્રીરામવર્મવઞ્ચિમહારાજવિરચિતાયાં
ભક્તિમઞ્જર્યાં દશમશતકમ્ ।

ગ્રન્થવિષયા કવિપ્રાર્થના ।

ઇત્થમચ્યુત! ભવત્કૃપાલવાત્
   પૂર્તિમદ્ય ગમિતા કથઞ્ચન ।
પ્રીતિમાવહતુ પદ્મનાભ ! તે
   ત્વત્પદામ્બુરુહભક્તિમઞ્જરી ॥

પુષ્પસઙ્ગમવશાદ્ધિ સૂત્રમ -
   પ્યુહ્યતે શિરસિ માનવૈર્યથા ।
વર્ણ્યવૈભવવશાત્ સતાં મુદે
   સ્યાત્ તથેયમપિ ભક્તિમઞ્જરી ॥

સમાપ્તા ચેયં ભક્તિમઞ્જરી ।
શુભં ભૂયાત્ ।

Bhakti Manjari by Sri Rama Varma Kulasekhara
   Perumal, Maharaja of Trvancore, 1904

The footnotes are retained as in print,
but moved close to their occurrence so
the reader can spot the note right away.

See the links for the scanned original PDF.

Proofread by PSA Easwaran
(dashaka 1-2 initially proofread by DKM Kartha)

*Bhaktimanjari*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*